# नीतिशास्त्रम्

## कक्षा ८



नेपालसर्वकारः
शिक्षाविज्ञानप्रविधिमन्त्रालयः
पाठ्यक्रमविकासकेन्द्रम्
सानोठिमी-भक्तपुरम्

# नीतिशास्त्रम्

## कक्षा ८



नेपालसर्वकारः
शिक्षाविज्ञानप्रविधिमन्त्रालयः
पाठ्यक्रमविकासकेन्द्रम्
सानोठिमी–भक्तपुरम्

प्रकाशकः

**नेपालसर्वकारः**

**शिक्षाविज्ञानप्रविधिमन्त्रालयः**

**पाठ्यक्रमविकासकेन्द्रम्**

**सानोठिमी–भक्तपुरम्**

प्रस्तुतपाठ्यपुस्तकसम्बन्धिनः सर्वेऽधिकाराः पाठ्यक्रमविकासकेन्द्रस्य स्वामित्वेऽन्तर्निहितास्सन्ति। लिखितां स्वीकृतिं विनाऽस्य पुस्तकस्य पूर्णभागस्य एकांशस्य वा यथावत् प्रकाशनम्, परिवर्त्य प्रकाशनं तथा केनाऽपि वैद्युतेन साधनेन अन्येन प्रविधिना वा यन्त्रप्रयोगेण प्रतिलिपिनिस्सारणञ्च सर्वथा निषिद्धं वर्तते ।

सर्वेऽधिकाराः प्रकाशकाधीनाः

प्रथमसंस्करणम् - २०८०

# अस्मदीयं कथनम्

विद्यालयस्तरीयशिक्षामुद्देश्यप्रधानां व्यावहारिकीं सामयिकीं वृत्तिदायिनीं च विधातुं समये समये पाठ्यक्रम-पाठ्यपुस्तकविकास-परिमार्जनानुकूलनकार्याणि निरन्तरं सञ्चाल्यमानानि सन्ति । विद्यार्थिषु राष्ट्रराष्ट्रियते प्रति सम्मानभावनामुद्भाव्य नैतिकानुशासन-स्वावलम्बनादि-सामाजिक-चारित्रिक-गुणानामाधारभूत-भाषिकशिल्पस्य विकासपूर्वकं सहयोगात्मकस्य दायित्वपूर्णस्य चाऽऽचरणस्य विकासोऽद्यत्वे आवश्यको दृश्यते । अस्या एवावश्यकतायाः परिपूर्तये शिक्षासम्बद्धैर्महानुभावैः सम्मिलितानां गोष्ठीनामन्तःक्रियायाश्च निष्कर्षेण निर्मितं २०७८ तमस्य वैक्रमाब्दस्य पाठ्यक्रममनुसृत्य पुस्तकमिदं निर्मितं वर्तते । शिक्षा विद्यार्थिषु वर्तमानस्य ज्ञानपक्षस्यान्वेषणं विधाय शिक्षणशिल्पेन जीवनस्य सम्बन्धं स्थापयति । शिक्षया विद्यार्थिषु स्वाधिकारस्य, स्वतन्त्रतायाः, समानतायाश्च प्रवर्धनाय, स्वस्थजीवनस्याभ्यासाय, तार्किकविश्लेषणेन निर्णयाय, वैज्ञानिकविश्लेषणेन व्यक्ति-समाज-राष्ट्राणां सबलविकासाय चाग्रेसरणशीलं सामर्थ्यं विकसनीयम् । एवं व्यक्तेः नैतिकाचरणप्रदर्शनाय, सामाजिकसद्भावप्रवर्धनाय, पर्यावरणस्य समुचितप्रयोगशिक्षणाय, दृढशान्तौ प्रतिबद्धतायै च शिक्षायाः आवश्यकता समाजे अवलोक्यते । तेन समाजसापेक्षतया ज्ञान-शिल्प-सूचना-सञ्चार-प्रविधीनां प्रयोगसमर्थाः, स्वावलम्बिनः, व्यावसायिकशिल्पाभ्यासनिरताः, राष्ट्रं राष्ट्रियतां राष्ट्रियादर्शं च प्रति सम्मानविधायकाः, समाज-स्वीकार्याः, सदाचरणशीलाः, स्वसंस्कृति-संस्कारपालनपराः, परसंस्कृत्यादिषु सहिष्णवश्च नागरिकाः शिक्षया निर्मातव्याः । एवं कल्पनाशीलानां रचनाशिल्पिनाम्, नैरन्तरिकपरिश्रमेणोद्यमशीलानाम्, विचारे उदात्तानाम्, व्यवहारे आदर्शमयानाम्, सामयिकसमस्यानां व्यवस्थापने साफल्याधायकानाम्, स्वावलम्बिनाम्, देशभक्तानाम्, परिवर्तनोद्यतानाम्, चिन्तनशीलानाम्, समावेशिसमाजनिर्माणे योगदानं करिष्यमाणानां च नागरिकाणां निर्माणं शिक्षया विधातव्यमिति समाजस्यापेक्षा दृश्यते । इमानेव पक्षान् विचार्य 'राष्ट्रिय-पाठ्यक्रम-प्रारूप, २०७६' इत्यनुसारेण निर्मितस्य नीतिशास्त्रविषयकपाठ्यक्रमस्याधारेण अष्टम्याः कक्षायाः पाठ्यपुस्तकमिदं विकसितं वर्तते ।

इदं पुस्तकं रोहिणीराजः तिमिल्सिना, टुकराजः अधिकारी, नारायणः घिमिरे, पुरुषोत्तमः घिमिरे-प्रभृतीनां महानुभावानां कार्यदलेन परिमार्जितं सम्पादितञ्चास्ति । अस्य पाठ्यपुस्तकस्य विकासे पाठ्यक्रमसिद्धान्तसंरचनयोः नवीनतमधारणामनुसृत्य परम्परागतानां शिल्पानामनुसरणं

कृतमस्ति । अस्मिन् कार्ये अस्य केन्द्रस्य महानिर्देशकः वैकुण्ठप्रसादः अर्याल, प्रा.डा. माधवशरणः उपाध्याय, प्रा.डा. आनन्दप्रसादः घिमिरे, प्रा.डा. ऋषिरामः पौडेल, शिवराजः लामिछाने, निश्चलः अधिकारी, गणेशः तिमिल्सिना, पर्वतराजः घिमिरे, केशवः भट्टराई, भीमप्रसादः खतिवडा-प्रभृतीनां महानुभावानां विशेषसहयोगो विद्यते । अस्य रूपसज्जा भक्तबहादुरः कार्की इत्याख्येन महानुभावेन कृतमस्ति ।

पाठ्यपुस्तकं शिक्षणप्रक्रियाया महत्त्वपूर्णसाधनं भवतीति नाविदितं शेमुषीमताम् । सानुभवाः शिक्षकाः, जिज्ञासवश्छात्राः, सविधिकर्मकराश्च पाठ्यक्रमलक्ष्यीकृतान् विषयान् नैकविधस्रोतसां साधनानाञ्चोपभोगेन अध्यापयितुमध्येतुं कर्म कर्तुं च प्रभवन्ति । अनेकैः कारणैः सर्वेष्वेव विद्यालयेषु सरलतया पाठ्योपकरणानामुपलब्धेरभावाद् अध्ययनकार्यं केवलं पाठ्यपुस्तकाश्रितं भवतीति तथ्यमात्मसात्कृत्य प्रस्तुतमिदं पाठ्यपुस्तकं यथासम्भवं स्तरयुतं विधातुं प्रयासो विहितः, तथापि पाठ्यपुस्तकेऽस्मिन् यत्र यत्र त्रुटयोऽल्पताश्च विदुषां दृष्टिपथमागच्छेयुस्तत्र तत्र परिष्कारे परिवर्धने च दृग्गोचरीभूतानां त्रुटीनां परिमार्जनादिकार्यजाताय परामर्शप्रदानविधौ शिक्षकच्छात्राभिभावकपाठकविशेषज्ञानां महती प्रभावकारिणी भूमिका भवति । अत उक्तविषयेषु रचनात्मकपरामर्शदानेनोपकर्तुं पाठ्यक्रमविकासकेन्द्रमिदं तांस्तान् सर्वानेव महानुभावान् सप्रश्रयमभ्यर्थयते ।

नेपालसर्वकारः

**शिक्षाविज्ञानप्रविधिमन्त्रालयः**

**पाठ्यक्रमविकासकेन्द्रम्**

# विषयसूची


| पाठसङ्ख्या | पाठः | पृष्ठसङ्ख्या |
|---|---|---|
| प्रथमः पाठः | राष्ट्रमेवाधिकं प्रियम् | १ |
| द्वितीयः पाठः | धूर्तः शृगालः | ९ |
| तृतीयः पाठः | भक्षकाद् रक्षकः श्रेष्ठः | १४ |
| चतुर्थः पाठः | सङ्गच्छध्वं संवदध्वम् | २१ |
| पञ्चमः पाठः | कपोतहिरण्यककथा | ३० |
| षष्ठमः पाठः | समयपालनम् | ४० |
| सप्तमः पाठः | नीतिमान् जनः | ४७ |
| अष्टमः पाठ | सज्जनप्रशंसा | ५६ |
| नवमः पाठ | जीवनस्य सौन्दर्यम् | ६४ |
| दशमः पाठ | छात्रगुणः | ७१ |
| एकादशः पाठ | वचनं पालनीयम् | ७९ |
| द्वादशः पाठ | अर्थशुचिता | ८६ |
| त्रयोदशः पाठ | शास्त्राज्ञापालनम् | ९४ |
| चतुर्दशः पाठ | भोजनामृतम् | १०२ |
| पञ्तदशः पाठ | कर्तव्यपालनं धर्मः | १११ |
| षोडशः पाठ | स्वधर्मे निधनं श्रेयः | ११९ |
| सप्तदशः पाठ | अद्भुतो नकुलः | १२८ |
| अष्टादशः पाठ | सत्पात्रता | १३७ |
| एकोनविंशः पाठ | गार्गी | १४५ |

# राष्ट्रमेवाधिकं प्रियम्

मित्राणि धनधान्यानि प्रजानां सम्मतानिव ।
जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ॥१॥
अपि स्वर्णमयी लङ्का न मे लक्ष्मण रोचते ।
जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ॥२॥
अज्ञात-वीवधाऽऽसार-तोय-शस्यो व्रजेत् तु यः ।
परराष्ट्रं न भूयः स स्वराष्ट्रमधिगच्छति ॥३॥
सज्जनानां प्रियं शीलं सत्यं शीलवतां प्रियम् ।
सत्यनिष्ठावतां नित्यं राष्ट्रमेवाधिकं प्रियम् ॥४॥
हिमशैलादिभी रम्यां नदी-तीर्थस्थलैर्युताम् ।
वीर-वीराङ्गनापूर्णां नौमि नेपालमातरम् ॥५॥
भारं वहति सर्वेषां दुःखं नयति दूरताम् ।
अङ्के निधाय या पाति वन्दे तां काश्यपीं सदा ॥६॥

**१**
**पदच्छेदः**

मित्राणि, धनधान्यानि, प्रजानाम्, सम्मतानिव, जननी, जन्मभूमिः, च, स्वर्गात्, अपि, गरीयसी ।

### अन्वयः

मित्राणि धनधान्यानि प्रजानां सम्मतानिव जननी जन्मभूमिः च स्वर्गात् अपि गरीयसी ।

**सरलार्थः**

लोके जनाः मित्राणि, धनानि, अन्नादीनि च सम्मानभावेन पश्यन्ति। तेषां कृते मित्राणां धनानामन्नादीनाञ्च स्थानमवश्यमुच्चं वर्तते परन्तु तेभ्योऽपि उच्चतरं स्थानं जन्मदायिन्या जनन्याः, जन्मभुवश्च वर्तते। यतो हि जननी जन्मभूमिश्च स्वर्गादपि श्रेष्ठा भवति।

**२**
**पदच्छेदः**

अपि, स्वर्णमयी, लङ्का, न, मे, लक्ष्मण, रोचते, जननी, जन्मभूमिः, च, स्वर्गात्, अपि, गरीयसी।

**अन्वयः**

लक्ष्मण स्वर्णमयी अपि लङ्का मे न रोचते जननी जन्मभूमिः च स्वर्गात् अपि गरीयसी (भवति)।

**सरलार्थः**

रावणस्योपरि विजयानन्तरं सौविध्यपूर्णां सुन्दरीं लङ्कानगरीं प्रति समाकृष्टं लक्ष्मणं सम्बोध्य श्रीरामः कथयति– लक्ष्मण ! स्वर्णमयी अपि लङ्का मम कृते रुचिकरी नास्ति। अतोऽहमत्र स्थातुं नेच्छामि। यतो हि जननी जन्मभूमिश्च स्वर्गादपि गरीयसी भवति। मह्यन्तु मम जननी यत्र विराजते, तादृशी मम जन्मभूमिः अयोध्यानगरी एव रोचते। अहं तत्रैव गन्तुं निवस्तुञ्च इच्छामि।

**३**
**पदच्छेदः**

अज्ञात-वीवधासार-तोय-शस्यः, व्रजेत्, तु, यः, परराष्ट्रम्, न, भूयः, सः, स्वराष्ट्रम्, अधिगच्छति।

**अन्वयः**

यस्तु अज्ञात-वीवधासार-तोय-शस्यः (सन्) परराष्ट्रं व्रजेत्, सः भूयः स्वराष्ट्रं नाधिगच्छति।

**सरलार्थः**

यो यात्रामार्गम्, सुहृद्बलम्, अन्नजलयोरापूर्तिञ्चाविज्ञाय सम्यक् तद्योजनामकृत्वैव परदेशं गच्छति, स ततः प्रत्यागन्तुं न पारयति । अतो स्वदेशं सर्वथा परित्यज्य परदेशो न गन्तव्यः, ततः स्वदेशं प्रत्यागमनाय पूर्वयोजनां कृत्वैव कार्यवशात् परदेशेषु गन्तव्यमिति भावः ।

**४**
**पदच्छेदः**

सज्जनानाम्, प्रियम्, शीलम्, सत्यम्, शीलवताम्, प्रियम्, सत्यनिष्ठावताम्, नित्यम्, राष्ट्रम्, एव, अधिकम्, प्रियम् ।

**अन्वयः**

सज्जनानां (कृते) शीलं प्रियं (भवति), शीलवतां सत्यं प्रियं (भवति), सत्यनिष्ठावतां (कृते तु) नित्यं राष्ट्रमेवाधिकं प्रियम् (भवति) ।

**सरलार्थः**

सज्जनाः शीलप्रियाः भवन्ति । शीलवन्तः सत्यप्रियाः भवन्ति । सत्यनिष्ठावन्तः जनास्तु सदा राष्ट्रप्रियाः भवन्ति । राष्ट्रमेव तेषां कृते आधिक्येन प्रियं भवति ।

**५**
**पदच्छेदः**

हिमशैलादिभिः, रम्याम्, नदी-तीर्थस्थलैः, युताम्, वीर-वीराङ्गनापूर्णाम्, नौमि, नेपालमातरम् ।

**अन्वयः**

हिमशैलादिभिः रम्यां नदी-तीर्थस्थलैः युतां वीर-वीराङ्गनापूर्णां (च), नेपालमातरं, नौमि ।

**सरलार्थः**

उत्तरदिशि हिमशैलशृङ्खलाः सुशोभन्ते । हिमशैलेभ्यो निरन्तरं नद्यः प्रवहन्ति । नदीभिः पवित्रितानि तीर्थस्थलानि चात्र बहूनि सन्ति । भूरियं वीर-वीराङ्गनाभिः परिरक्षिता, ताभिः परिपूर्णा च वर्तते । ईदृशीं नेपालमातरमहं वन्दे ।

**६**
**पदच्छेदः**

भारम्, वहति, सर्वेषाम्, दुःखम्, नयति, दूरताम्, अङ्के, निधाय, या, पाति, वन्दे, ताम्, काश्यपीम्, सदा ।

### अन्वयः

या सर्वेषां भारं वहति, दुःखं दूरतां नयति, अङ्के निधाय (अस्मान्) पाति तां काश्यपीं सदा वन्दे ।

**सरलार्थः**

वयं धरण्यां निवसामः । इयं धरणी सर्वेषां भारं वहति । अन्नजलैः अस्माकं दुःखमपनयति । सदा अस्मानङ्के स्थापयित्वा रक्षति । एतादृशीं कश्यपपुत्रीं धरणीमहं नित्यं नमामि ।

### शिक्षणालोकः

अस्य पाठस्य माध्यमेन छात्राः धरित्र्याः, स्वराष्ट्रस्य च महत्त्वविषये बोधनीयाः । स्वराष्ट्रं प्रति गौरवबोधार्थं ते भावनीयाः । शिक्षकेण स्वदेशप्रेम्णो विषयेऽन्यानि पद्यानि, नैकाः कथाश्चान्विष्य श्रावणाय ते समुत्प्रेरणीयाः ।

## अभ्यासः

### पाठानुशीलनम्

१. **शुद्धमुच्चारयत**

सज्जनानां प्रियं शीलं सत्यं शीलवतां प्रियम् ।
सत्यनिष्ठावतां नित्यं राष्ट्रमेवाधिकं प्रियम् ॥

२. **शुद्धं लिखत**

अपि स्वर्णमयी लङ्का न मे लक्ष्मण रोचते ।
जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ॥

३. **नेपालीभाषायामर्थं लिखत**

भारं वहति सर्वेषां दुःखं नयति दूरताम् ।

अङ्के निधाय या पाति वन्दे तां काश्यपीं सदा ॥

४. **परस्परं मेलयत**

| **खण्डः 'क'** | **खण्डः 'ख'** |
|---|---|
| हिमशैलादिभी रम्यां | दुःखं नयति दूरताम् । |
| वीर-वीराङ्गनापूर्णां | वन्दे तां काश्यपीं सदा । |
| भारं वहति सर्वेषां | नदी-तीर्थस्थलैर्युताम् । |
| अङ्के निधाय या पाति | नौमि नेपालमातरम् । |

५. **रिक्तस्थानं पूरयत**

(क) वयं ………… निवसामः । (जले, आकाशे, धरण्याम्)

(ख) इयं धरणी ………… भारं वहति । (सर्वेषाम्, मम, तस्य)

(ग) सदा अस्मान् ………… स्थापयित्वा रक्षति । (गृहे, अङ्के, प्रासादे)

(घ) धरणी अन्नजलैः अस्माकं ………… अपनयति । (सुखम्, धनम्, दुःखम्)

६. **सङ्क्षेपेण उत्तरयत**

(क) के शीलप्रिया भवन्ति ?

(ख) शीलवन्तः किं प्रीणन्ति ?

(ग) कयोः स्थानमुच्चतरं वर्तते ?

(घ) श्रीरामः कुत्र स्थातुं नेच्छति ?

(ङ) कः परदेशात् प्रत्यागन्तुं न पारयति ?

(च) लक्ष्मणः कां प्रति समाकृष्ट आसीत् ?

(छ) राष्ट्रं केषां कृते आधिक्येन प्रियं भवति ?

(ज) लोके जनाः कानि सम्मानभावेन पश्यन्ति ?

(झ) स्वदेशं सर्वथा परित्यज्य कुत्र न गन्तव्यम् ?

(ञ) जननी जन्मभूमिश्च कस्माद् गरीयसी भवति ?

७. **'जननी जन्मभूमिश्च स्वर्गादपि गरीयसी' इत्यस्य तात्पर्यं प्रकाशयत ।**

८. **सत्यासत्यं विवेचयत**

(क) शीलवन्तो जनाः सत्यं प्रीणन्ति ।

(ख) स्वदेशः सम्माननीयः, न तु मित्राणि ।

(ग) अस्मद्देशः वीर-वीराङ्गनाभिः पालितः ।

(घ) सौविध्ययुक्तमपि परराष्ट्रं नाश्रयणीयम् ।

९. **सन्धिविच्छेदं कुरुत**

स्वर्गादपि, जन्मभूमिश्च, शीलवतां प्रियम्, हिमशैलादिभी रम्या ।

१०. **विभक्तिनिर्देशं कुरुत**

प्रजानाम्, स्वर्गात्, यः, रम्याम्, नेपालमातरम् ।

११. **वाक्यप्रयोगं कुरुत**

अङ्के, पाति, वन्दे, नयति, सदा, रम्या, तीर्थस्थलम्, हिमशैलः, नदी, सज्जनाः ।

१२. **अर्थं लिखत**

जन्मभूमिः, अज्ञातम्, परराष्ट्रम्, भूयः, अधिगच्छति, नौमि ।

१३. **अधस्तनं पद्यं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि दत्त**

नक्रः स्वस्थानमासाद्य गजेन्द्रमपि कर्षति ।
स एव प्रच्युतः स्थानाच्छुनापि परिभूयते ॥

(क) स्वस्थानस्थः को गजेन्द्रं कर्षति ?

(ख) स्वस्थानात् प्रच्युतो नक्रः केन परिभूयते ?

(ग) 'परिभूयते' इत्यस्य धातुलकारनिर्देशं कुरुत ।

(घ) 'स्थानात्' इत्यस्य विभक्तिवचननिर्देशं कुरुत ।

**१४. प्रदत्तां कथां पठित्वा प्रश्नानुत्तरयत**

साहसः, धैर्यम्, उद्यमशीलता च मनुष्यस्य शोभनाः गुणाः । यस्य पार्श्वे एते गुणा भवन्ति, तस्य सदा उन्नतिर्भवति । स साहसेन कार्यमारभते । धैर्येण परिणामप्राप्तिं यावत् कार्यं कुरुते । परिणामं प्राप्य च उद्यमशीलतां न कदापि जहाति । स सदा उद्यमशीलो भवति । अतः सदैव उन्नतिशीलो भवति । निरन्तरमुद्यमं कृत्वा नैरन्तर्येण सुपरिणामं प्राप्नोति । उन्नतिं कर्तुं परदेशगमनस्य आवश्यकता न भवति । स स्वदेशे, स्वस्थाने एव स्थित्वा उन्नतिं करोति । एतादृशो जनः समाजेऽन्येषां कृते चोदाहरणीयो भवति । उन्नतिकामास्तमनुगच्छन्ति ।

**(अ) एकपदेनोत्तरयत**

(क) मनुष्यः कथं कार्यमारभते ?

(ख) किं प्राप्य च स उद्यमशीलतां न जहाति ?

(ग) शोभनो मनुष्यः कदा यावत् कार्यं कुरुते ?

(घ) साहसः, धैर्यम्, उद्यमशीलता च कस्य शोभनाः गुणाः ?

**(आ) एकवाक्येनोत्तरयत**

(क) कस्य सदा उन्नतिर्भवति ?

(ख) के उद्यमशीलं जनमनुगच्छन्ति ?

(ग) गुणवान् जनः कदा उद्यमशीलो भवति ?

(घ) किमर्थं परदेशगमनस्य आवश्यकता न भवति ?

## व्यवहारानुशीलनम्

१. **युष्माकं मनसि कीदृशी राष्ट्रभक्तिर्वर्तते ? कक्षायां श्रावयत ।**

२. **जीवनवृत्त्यर्थं विदेशं गन्तुकामानं जनानां स्वदेशे एव स्थित्वा कार्यकारणार्थं यूयं तान् किं कथयथ ? क्रमेण वदत ।**

३. **'जननी जन्मभूमिश्च स्वर्गादपि गरीयसी' इति रामस्य वचनं कथं समीचीनं मन्यध्वे उता समीचीनम् ? सतर्कमुपस्थापयत ।**

४. **समुचितमुत्तरं (✓) चिह्नेन दर्शयत**

(क) स्वदेशं परित्यज्य परदेशगमनं कथं मन्यसे ?

(अ) केवलं जीविकायै उत्तमम् ।

(आ) स्वदेशे एव उद्यमशीलता उत्तमा ।

(इ) देशस्य गौरववर्धनाय तत्र गमनं वरम् ।

(ई) तत्र सौविध्यं भवति चेद् देशत्यागः अपि शोभनः ।

**(ख) राष्ट्रभक्तिः कदा महनीया भवति ?**

(अ) यदा राष्ट्रं महद् भवति ।

(आ) यदा राष्ट्रं समृद्धं भवति ।

(इ) यदा राष्ट्रे उद्यमशीलता वर्धते ।

(ई) राष्ट्रं यादृशमपि भवतु, राष्ट्रभक्तिर्महनीयैव ।

**(ग) राष्ट्रे समस्याऽऽगच्छति चेत् किं करणीयम् ?**

(अ) राष्ट्रं परित्यज्य परराष्ट्रं गन्तव्यम् ।

(आ) समस्याः समाधातुं प्रयत्नः करणीयः ।

(इ) समस्याः अविगणस्य तथैव स्थातव्यम् ।

(ई) समस्यानां विषये चिन्ता करणीया ।

**(घ) राष्ट्रस्य गौरवं वर्धयितुं त्वं किं करोषि ?**

(अ) जलतरणं करोमि ।

(आ) पर्वतारोहणं करोमि ।

(इ) अधिकं धनमर्जयामि ।

(ई) विश्वबोधकं सत्कार्यं करोमि ।

# धूर्तः शृगालः



एकदा कश्चिच्छृगालो बुभुक्षितः सन्नाहारार्थं नगरोपान्ते परिभ्रमन्नासीत् । तदा तत्रस्थाः श्वानाः तमाक्रामन् । ततः स तिरोधातुं झटिति एकस्मिन् गृहे प्राविशत् । तद् रजकस्यागारमासीत् । भयसन्त्रस्तः शृगालः तिरोधानक्रमे वस्त्ररञ्जकनीलीभाण्डे निपत्य ततो निर्गन्तुमसमर्थोऽभवत् । येन केनापि वा प्रकारेण ततो निर्गत्य स वनं प्रत्यगमत् । तदाऽसौ नीलवर्णेन रञ्जित आसीत् । तस्मात्पूर्वं वन्याः पशवः कदापि नीलवर्णयुक्तं शृगालं दृष्टवन्तो नासन् । अतस्तं दृष्ट्वा सर्वे पलायन्त । स 'ममैव रूपं विलोक्य सर्वे पलायिता' इति ज्ञातवान् । ततः स सर्वान् जन्तूनाहूय अवोचत्, "भो प्रेयांसः सखायः ! भयं मा कुरुत, भगवता अस्मिन्नरण्येऽहं नृपत्वेनाभिषिक्तः, मम राज्ये यूयं सानन्दं तिष्ठति" इति ।

तदनन्तरं वनेऽवस्थिताः सिंहगजव्याघ्रशृगालगण्डकादयः सर्वे जन्तवस्तं नीलवर्णं शृगालं राजानं मत्वा साष्टाङ्गपातं प्रणम्याब्रुवन्, "यथाज्ञापयति महाराज ! इतः परं भवदाज्ञयैव वयं कार्यं

सम्पादयिष्यामः" इति । ततस्तस्मिन्नरण्ये प्रधानमन्त्रिपदे सिंहो नियुक्तः । अन्येऽपि जन्तवः अन्यमन्त्रिपदे नियुक्ताः । परं मन्त्रिमण्डलविस्तरणक्रमे सदसि शृगालानवलोक्यावज्ञया तेन स्वज्ञातयः सर्वे दूरीकृताः ।

ततः सिंहादयोऽन्ये जन्तवो मृगयाद्वारा तं परितोषयन्ति स्म । सोऽपि स्वस्योदरं पूरयित्वैवावशिष्टं मांसमन्येभ्यः प्रददाति स्म । एतावता तेन किञ्चित्कालो व्यतीतः । एकदाऽऽश्चर्यमभूत् । सोऽतिदूरात् समायातं शृगालध्वनिमश्रौषीत् । ततः सखीनां ध्वनिमाकर्ण्य स्वाभाविकरूपेण सोऽप्यक्रोशत् । स्वस्य राज्ञः शृगालध्वनिं श्रुत्वा अन्ये जन्तवः शङ्किता अभवन् । अतो नीलो जीवो भगवताऽभिषिक्तो राजा नास्ति, स तु शृगालो वर्तते इति विज्ञाय सर्वैः पशुभिः तदैव स दूरीकृतः । अत एव-

**यः स्वभावो हि यस्यास्ति स नित्यं दुरतिक्रमः ।**
**श्वा यदि क्रियते राजा स किं नाश्नात्युपानहम् ?**

**शिक्षणालोकः** – कदापि धूर्तव्यवहारो न कर्तव्य इति बोधयित्वा सदैव शोभने कर्मणि प्रवर्तनाय छात्राः प्रेरणीयाः ।

## अभ्यासः

### पाठानुशीलनम्

१. **सङ्क्षेपेण उत्तरयत**

(क) शृगालः किमर्थं परिभ्रमन्नासीत् ?
(ख) शृगालः कुत्र निपतितः ?
(ग) जन्तवः किमर्थं पलायन्त ?
(घ) शृगालः किं ज्ञातवान् ?
(ङ) जन्तवः शृगालं प्रति किमवोचन् ?
(च) शृगालः किमश्रौषीत् ?
(छ) प्रधानमन्त्री क आसीत् ?
(ज) वनपशवः किमर्थं शङ्किता आसन् ?

२. **पाठस्य प्रथमानुच्छेदस्यानुलेखनं कुरुत ।**

३. **पाठस्यान्तिमानुच्छेदं वाचयत ।**

**४. पाठस्य सारांशं कथयत ।**

**५. पाठाधारेण सत्यासत्यं विवेचयत**

(क) शृगालः ज्ञानी आसीत् ।

(ख) गण्डकः प्रधानमन्त्रिपदे नियुक्तः ।

(ग) शृगालः रजकस्यागारे प्रविष्टः ।

(घ) गजो वनस्य राजाऽभवत् ।

(ङ) शृगालो बुभुक्षित आसीत् ।

**६. अधोलिखितं श्लोकं पठित्वा शिक्षकस्य साहाय्येन अर्थं विचारयत**

यः स्वभावो हि यस्यास्ति स नित्यं दुरतिक्रमः ।

श्वा यदि क्रियते राजा स किं नाश्नात्युपानहम् ?

**७. अधस्तनानि कथनानि पठित्वा वक्तृणां नामानि लिखत**

(क) भो प्रेयांसः सखायः !

(ख) यथाज्ञापयति महाराज !

(ग) मम राज्ये यूयं सानन्दं तिष्ठत ।

(घ) इतः परं भवदाज्ञयैव वयं कार्यं सम्पादयिष्यामः ।

**८. कथाया आशयं लिखित्वा कक्षायां श्रावयत ।**

**९. निम्नलिखितमनुच्छेदं पठित्वा प्रश्नानुत्तरयत**

## चतुरः शृगालः

गौरिग्रामसमीपे एकमरण्यमासीत् । तत्र एकश्चतुरः शृगालो वसति स्म । स सदैव व्याघ्र आगत इति उद्घोषयति स्म । सर्वे ग्रामजनाः व्याघ्रं दूरीकर्तुं वनं गच्छन्ति स्म । तस्मिन्नेव समये स ग्राम्यजनानां कुक्कुटानपहरति स्म । यदा गृहस्य कुक्कुटाः लुप्ताः, तदा ग्रामवासिनः शङ्किता

अभवन् । अपरेद्युः सर्वे मिलित्वा शृगालं गृहीत्वा ताडयितुमारब्धवन्तः । ततः शृगालोऽवदत्, “मम शरीरं व्यथितमासीत्, अहो ! कियानानन्दोऽजायत ।” ग्राम्यजनास्ततोऽपि क्रुद्धा अभवन् । शृगालं बद्ध्वा पाषाणयुक्ते चत्वरे अघर्षयन् । पुनश्च सोऽवदत्, “मम शरीरं कण्डूयमानमासीत्, अतोऽतीवानन्दमनुभवन्नस्मि । परन्तु दूर्वायुक्तस्थाने एतादृशं कार्यं नैव विधेयम्, तत्र तु अतीव कष्टं भवति” इति । तदनन्तरं यदा ग्रामवासिनः तृणयुक्तचत्वरे घर्षयन्ति स्म तदा सः ‘अहो ! अतीव कष्टमभूत्, मां मुञ्चन्तु’ इति वदति स्म । ग्रामजनाः यावत्पर्यन्तं श्रान्ता नाभवन् तावत् हरिते तृणयुक्ते चत्वरे शृगालं घर्षितवन्तः । शृगालोऽतीव प्रसन्न आसीत् किन्तु दुःखीव प्रतीयते स्म । तदनन्तरं जना उच्चैः स्थानात् शृगालं पातयितुमुद्यता अभवन् । शृगालः पुनरकथयत्, “मां बद्ध्वा एव क्षिपन्तु यतो हि कन्दुकवद् धावनमुत्प्लवनं च सुखदं भवति ।” ग्राम्यजनाः क्षेपणात् पूर्वं तं बन्धनाद् मुक्तवन्तः । तदनन्तरं सः ततः पलायितः ।

(क) शृगालः किमुद्घोषयति स्म ?

(ख) कदा ग्रामवासिनः शङ्किता अभवन् ?

(ग) किमर्थं शृगालः प्रस्तरखण्डयुक्ते चत्वरे ‘आनन्दमनुभवामि’ इति कथयति स्म ?

(घ) शृगालः किमर्थं ‘बद्ध्वा क्षिपन्तु’ इति कथयति ?

(ङ) अस्याः कथायाः सन्देशः कः ?

**१०. अधः प्रदत्तानां शब्दानामर्थं वदत**

झटिति, बुभुक्षितः, आगारम्, आहूय, अरण्यम्, नृपः, रजकः, आकर्ण्य, व्यतीतः ।

**११. परस्परं मेलयत**

| | |
|---|---|
| प्रेयांसः | वृक्षः |
| अरण्यम् | शृगालः |
| नीलः | सखायः |
| विशालः | वनम् |
| धूर्तः | वर्णः |

**१२. असत्यभाषणस्य परिणामः सम्यग्भवति न वा ? पञ्चभिर्वाक्यैः स्फुटीकुरुत ।**

## व्यवहारानुशीलनम्

**१. पाठस्य शृगालस्य व्यवहारः तुभ्यमरोचत उत वा ? सतर्कं स्फुटीकुरुत ।**

**२. तव विचारे दुष्टता का ? स्वविचारं प्रस्तौहि ।**

**३. तव स्वभावः कीदृशोऽस्ति ? तव स्वभावस्य परिवर्तनीयाः पक्षाः के ? आत्मनं समीक्षणं कुरुत ।**

**४. समुचिते विकल्पे स्वविचारेण (✓) चिह्नं दत्त**

**(क) दुष्कर्मणि संलग्नान् सखीन् दृष्ट्वा किं करोषि ?**

(अ) धन्यवादमर्पयामि ।

(आ) स्वयमपि संलग्नो भवामि ।

(इ) तस्मान्निवारयितुं प्रयते ।

(ई) प्रशंसां करोमि ।

**(ख) गुरुणा प्रदत्तं गृहकार्यं त्वया नैव कृतं तर्हि कक्षायां किं करोषि ?**

(अ) रुग्णताया अभिनयं करोमि ।

(आ) क्षमां संयाच्य श्वः कर्तास्मीति प्रतिजाने ।

(इ) पुस्तिकां विस्मृतवानिति कथयामि ।

(ई) गृहकार्यं कर्तुं न शक्नोमीति वदामि ।

**(ग) तुभ्यं कीदृशो जनो रोचते ?**

(अ) धूर्तः

(आ) लुब्धः

(इ) मूढः

(उ) ज्ञानी

**(घ) त्वं कीदृशं व्यवहारं कर्तुमिच्छसि ?**

(अ) दुष्टम्

(आ) धूर्तम्

(इ) प्रियम्

(ई) अप्रिय

# भक्षकाद् रक्षकः श्रेष्ठः



कस्मिंश्चन देशे एक आमिषप्रियो राजाऽसीत् । स कदापि निर्मांसं भोजनं न करोति स्म । राज्ञे मृगमांसमतीव रोचते स्म । स प्रायेण मृगयार्थं स्वयमेव गच्छति स्म, कदाचिदेव स्वसैनिकान् सारमेयं च प्रेषयति स्म । राज्ञा मृगयार्थमरण्यानीषु कतिचिद् दिवसानि व्यतीतानि । आखेटक्रमे एव तेन महारण्येषु कतिचित् यामिन्योऽपि व्यतीताः ।

राजप्रासादे एकः सारमेयो मृगयार्थमेव पोषित आसीत् । स राजप्रासादस्य सर्वेषां स्नेहभाजनमासीत् । सारमेयः प्रतिदिनं सुस्वादु भोजनं प्राप्नोति स्म । तस्य शुश्रूषायां न काचिदपि न्यूनताऽऽसीत् । अतः सारमेयः स्वादलिप्तो भोजनलोलुपश्चासीत् । सति भोजनदर्शने स किमपि कार्यं न करोति स्म ।

संयोगादेकदा एको मृगो राजभवननिकटे समागच्छत् । महारण्यपरिवृतेऽपि राजप्रासादे इतः पूर्वं मृगो दृष्टो नासीत् । मृगदर्शनेन राजनि तन्मांसभोजनाभिलाषा समुत्पन्ना । तदानीं राजा

स्वयमेव मृगयार्थं तत्परो नासीत्। राजा सारमेयस्य आखेटकलां दिदृक्षुरासीत्। अतो राजा सैनिकानाहूतवान्। ततः स तानादिदेश, "राजप्रासादे आखेटायैव सारमेयोऽस्ति। अद्यावधि मया स्वयमेव तस्य मृगयाकौशलं न दृष्टम्। अधुना राजभवनसमीपे एक मृग आयातो वर्तते। अहं सारमेयस्य मृगयां द्रष्टुमिच्छामि।" नृपस्य आशयं विज्ञाय सैनिका अपि आखेटार्थं सारमेयं बन्धनमुक्तं चक्रुः।



मृगमांसभक्षणलोलुपः सारमेयोऽअपि मृगं प्रति अधावत्। बहुकालपर्यन्तं मृगश्वानयोः दर्शनादर्शनं प्राचलत्। परन्तु सारमेयो मृगयायै असमर्थः सञ्जातः। मृगो राजप्रासादप्राङ्गणात् पलायितः। नृप-मन्त्रि-सचिवादयश्च एतत्सर्वं राजप्रासादात् पश्यन्तः आसन्। राजभवनपरिसराद् बहिर्गमनानन्तरं मृगो मार्गस्थेन सारमेयेन सह क्रीडितुमारब्धः। इदं दृश्यं दृष्ट्वा विस्मितमना राजा मन्त्रिणं पप्रच्छ, "अस्माभिरत्र राजप्रासादे बहु मूल्यं विभज्य आखेटाय सज्जीकृत्य पालितः सारमेयो मृगं हन्तुमक्षमः। परन्तु मार्गचरः सामान्यः सारमेयो यदि इच्छति तर्हि मृगं व्यापादयितुं शक्नोति। एतत्कथं सम्भवति ?" नृपवचनं श्रुत्वा मन्त्री अवोचत्, "हे राजन्! मार्गचरः सारमेयो मृगस्य कृतेऽत्ययो नास्ति, स मृगस्य मनोविनोदाय क्रीडन् वर्तते, अतो मृगस्तस्य व्यवहारे मैत्रीं पश्यति, तं सारमेयं प्रति मृगो विश्वस्तो वर्तते। अतः स रक्षकवद् वर्तते। अस्माकं सारमेयस्तु मृगं व्यापाद्य भक्षयितुमिच्छति। मृगस्तदाशयं जानाति, तेन सोऽस्मात् पलायते। अतो मृगव्यापादनायाऽसमर्थः।" अत एवोऽच्यते -

**भक्षकाद् रक्षकः श्रेष्ठः।**

# अभ्यास

## पाठानुशीलनम्

१. **पाठस्य सस्वरवाचनं कुरुत ।**

२. **शुद्धमुच्चारयत**

निर्मांसम्, मृगयार्थम्, अरण्यानीषु, राजप्रासादः, महारण्यपरिवृते, दिदृक्षुः, सज्जीकृत्य, व्यापादितुम्, जीवनरक्षार्थम्, भक्षकात्, स्वादलिप्तः, सुस्वादु, आखेटः ।

३. **पाठाधारेण संशोध्य लिखत**

(क) राज्ञा मृगयार्थं राजप्रासादेषु कतिचिद् दिवसानि व्यतीतानि ।

(ख) सारमेयस्य शुश्रूषायां न्यूनता आसीत् ।

(ग) सति भोजनदर्शने स कार्यं करोति स्म ।

(घ) मया स्वयमेव तस्य मृगयाकौशलं दृष्टम् ।

(ङ) सैनिकानां आशयं विज्ञाय नृपोऽपि आखेटार्थं सारमेयं बन्धनमुक्तं चकार ।

(च) राजप्रासादे पोषितः सारमेयः मृगस्य कनोविनोदाय क्रीडन् वर्तते ।

(छ) रक्षकाद् भक्षकः श्रेष्ठः ।

४. **परस्परं मेलयत**

| **'अ' समूहः** | **'आ' समूहः** |
|---|---|
| राज्ञा | रोचते स्म । |
| राज्ञे | द्रष्टुमिच्छामि । |
| यामिन्यः | दिवसानि व्यतीतानि । |
| अहं | समागच्छत् । |
| एको मृगः | व्यतीताः । |

५. **पाठाधारेण रिक्तस्थानं पूरयत**

(क) इदं दृश्यं दृष्ट्वा ..................... राजा मन्त्रिणं पप्रच्छ ।

(ख) यदि इच्छति तर्हि .................... शक्नोति ।

(ग) ............. मया .............................. न दृष्टम् ।

(घ) .................... आमिषप्रियः .................... आसीत् ।

(ङ) मृगदर्शनेन ........................... समुत्पन्ना ।

**६. पाठस्य सारांशं स्वभाषया कथयत ।**

**७. अधस्तनपदानि प्रयुज्य वाक्यानि रचयत**

मृगया, आहूतवान्, सारमेयम्, मार्गस्थेन, सुस्वादु, निर्मांसम्, अरण्यानीषु, रोचते स्म, भक्षकात् ।

**८. सङ्क्षेपेण उत्तरयत**

(क) राजा कीदृश आसीत् ?

(ख) सारमेयः प्रतिदिनं किं प्राप्नोति स्म ?

(ग) मार्गचर-राजप्रासादस्थितयोः सारमेययोः को भेदः ?

(घ) राज्ञा किमर्थम् अरण्यानीषु दिवसानि व्यतीतानि ?

(ङ) राजा किमर्थं सैनिकानाहूतवान् ?

**९. पर्यायं निश्चित्य लिखत**

(क) सारमेयः = ............................... (श्वानः, कच्छपः, शशकः)

(ख) यामिनी = ...............................(निशा, दिशा, मृषा)

(ग) महारण्यम् = ...............................(राजप्रासादः, अरण्यानी, पण्यम्)

(घ) लोलुपः = ...............................(लोपः, लोभः, लुब्धः)

(ङ) आखेटः = ...............................(मृगया, अक्षोटः, कृपया)

**१०. पाठस्य द्वितीयानुच्छेदस्यानुलेखनं कुरुत ।**

११. **कथां पठित्वा प्रश्नानुत्तरयत**

एकदा एक वृद्धव्याघ्रः स्नातः कुशहस्तः सरस्तीरे ब्रूते, "भो ! भो ! पान्थाः ! इदं सुवर्णकङ्कणं गृह्यताम् ।" ततो लोभाऽऽकृष्टेन केनचित्पान्थेन मनसाऽऽलोचितम्, "भाग्येन एतत्सम्भवति । किन्तु अस्मिन् आत्मसन्देहे प्रवृत्तिर्न विधेया ।" यतः-

**अनिष्टादिष्टलाभेऽपि न गतिर्जायते शुभा ।**
**यत्रास्ते विषसंसर्गोऽमृतं तदपि मृत्यवे ॥ इति ॥**

किन्तु सर्वत्र अर्थार्जने प्रवृत्तौ सन्देह एव । तथा चोक्तम्-

**'न संशयमनारुह्य नरो भद्राणि पश्यति ।**
**संशयं पुनरारुह्य यदि जीवति पश्यति ॥**
**तन्निरूपयामि तावत् ।'**

प्रकाशं ब्रूते, "कुत्र तव कङ्कणम् ?" व्याघ्रो हस्तं प्रसार्य दर्शयति । पान्थोऽवदत्, "कथं मारात्मके त्वयि विश्वासः ?" व्याघ्र उवाच, "शृणु रे पान्थ ! प्रागेव यौवनदशायाम् अहमतिदुर्वृत्त आसम् । अनेकानां गोमानुषाणां वधान्मे पुत्रा मृता दाराश्च । वंशहीनश्चाहम् । ततः केनचिद्धार्मिकेण अहमादिष्टः- दानधर्मादिकं चरतु भवान् इति । तदुपदेशाद् इदानीमहं स्नानशीलो दाता वृद्धो गलितनखदन्तः कथं न विश्वासभूमिः ? मम एतावान् लोभविरहो येन स्वहस्तस्थमपि सुवर्णकङ्कणं यस्मै कस्मैचिद्दातुम् इच्छामि । अतोऽत्र सरसि स्नात्वा सुवर्णकङ्कणं गृहाण ।" ततो यावदसौ पान्थस्तद्वचनात्प्रतीतः लोभात् सरसि स्नातुं प्रविशति, तावन्महापङ्के निमग्नः पलायितुमक्षमः ।



तं पङ्के पतितं दृष्ट्वा व्याघ्रोऽवदत्, “अहह ! महापङ्के पतितोऽसि, अतस्त्वामुत्थापयामि ।” इत्युक्त्वा शनैः शनैरुपगम्य तेन व्याघ्रेण धृतः स पान्थोऽचिन्तयत् - ‘तन्मया भद्रं न कृतं यदत्र मारात्मके विश्वास कृतः ।’ इति चिन्तयन्नेवासौ व्याघ्रेण व्यापादितः, खादितश्च ।

**(अ) एकपदेनोत्तरयत**

(क) व्याघ्रो यौवनदशायां कीदृश आसीत् ?

(ख) व्याघ्रस्य हस्ते किमासीत् ?

(ग) व्याघ्रेण लुब्धः पान्थः किं कृतः ?

(घ) नरो भद्राणि किमनारूह्य न पश्यति ?

(ङ) पान्थः कस्मात् कारणात् मृतः ?

**(आ) एकवाक्येनोत्तरयत**

(क) कुत्र शुभा गतिर्न जायते ?

(ख) इदानीं व्याघ्रः कीदृशोऽस्तीति तस्य वचनम् ?

(ग) पङ्के पतितं पान्थं व्याघ्रः किं ब्रूते ?

(घ) नरः कदा भद्राणि पश्यति ?

(ङ) अस्याः कथायाः कः सन्देशः ?

## व्यवहारानुशीलनम्

१. **काञ्चन प्रेरणाप्रदायिनीं कथां श्रावयित्वा ततः प्राप्तं सन्देशं व्यवहारे कथमनुशीलयसि ? कथयत ।**

२. **कथेयं तव व्यवहारं परिवर्तयितुं क्षमाऽस्ति न वा ? अस्ति चेत् तव को व्यवहारः परिवर्तितो भविष्यतीति कथयत ।**

३. **जनेन रक्षकेण इव व्यतहर्तव्यम् उत वा भक्षकेण इव ? कारणसहितं लिखत ।**

४. **समुचिते विकल्पे स्वविचारेण (✓) चिह्नं दत्त**

**(क) त्वं शरणागतं प्राणिनं कीदृशं व्यवहारं करोषि ?**

(अ) रक्षकेण इव व्यवहारं करोमि ।

(आ) भक्षकेण इव व्यवहारं करोमि ।

(इ) आत्मनः प्रतिकूलं व्यवहारं करोमि ।

(ई) यथासम्भवं दुष्टं व्यवहारं करोमि ।

**(ख) त्वं कीदृशो भवितुमर्हषि ?**

(अ) लुब्धः (आ) अलसः

(इ) परिश्रमी (ई) आक्रामकः

**(ग) अन्यान् वशीकर्तुं त्वं कीदृशमुपायमवलम्बसे ?**

(अ) स्नेहं करोमि । (आ) वशीकर्तुमादिशामि ।

(इ) धनेन क्रीणामि । (ई) ताडयामि ।

**(घ) त्वं कथं महान् भवितुमिच्छषि ?**

(अ) धनार्जनेन (आ) ज्ञानार्जनेन

(इ) परिश्रमेण (ई) उपरितनसर्वकर्मणा

# सङ्गच्छध्वं संवदध्वम्

सङ्गच्छध्वं संवदध्वं सं वो मनांसि जानताम् ।
देवा भागं यथा पूर्वे संजानाना उपासते ॥१॥
समानो मन्त्रः समितिः समानी समानं मनः सहचित्तमेषाम् ।
समानं मन्त्रमभिमन्त्रये वः समानेन वो हविषा जुहोमि ॥२॥
समानी व आकूतिः समाना हृदयानि वः ।
समानमस्तु वो मनो यथा वः सुसहासति ॥३॥
कृते मन्त्रप्रयोगे वा त्रेतायां तन्त्रसाधने ।
द्वापरे व्यूहरचने शक्तिः सङ्घे कलौ युगे ॥४॥
गणमुख्यैस्तु सम्भूय कार्यं गणहितं मिथः ।
पृथग्गणस्य भिन्नस्य विततस्य ततोऽन्यथा ॥
अर्थाः प्रत्यवसीदन्ति तथानर्था भवन्ति च ॥५॥

**१**
**पदच्छेदः**

सङ्गच्छध्वम्, संवदध्वम्, सम्, वः, मनांसि, जानताम्, देवाः, भागम्, यथा, पूर्वे, सञ्जानाना, उपासते ।

### अन्वयः

सङ्गच्छध्वं संवदध्वं वः मनांसि सं जानतां पूर्वे यथा देवाः भागं सञ्जानाना उपासते ।

**सरलार्थः**

सहैव चलामः । परस्परं संवदेम । पारस्परिकं मनोभावं जानीयाम । अस्माकं लक्ष्यमेकं भवतु । पुरा विबुधाः यथा परस्परं मिलित्वा नियतं कार्यं सम्पादयन्ति स्म, वयमपि तथैव सहकार्येण कार्यं सम्पादयाम । एवं कार्यसम्पादनेनैव साफल्यं प्राप्यते ।

**२**
**पदच्छेदः**

समानः, मन्त्रः, समितिः, समानी, समानम्, मनः, सहचित्तम्, एषाम्, समानम्, मन्त्रम्, अभिमन्त्रये, वः, समानेन, वः, हविषा, जुहोमि ।

**अन्वयः**

मन्त्रः समानः (भवतु) समितिः समानी मनः समानमेषां सहचित्तं (च भवतु) वः समानं मन्त्रं अभिमन्त्रये समानेन हविषा वः जुहोमि ।

**सरलार्थः**

सर्वेषां लक्ष्यमेकं भवतु । कार्यस्य सङ्कल्पस्य विकल्पस्य च कृते मनः समानं भवतु । विचारितस्य कार्यस्य स्मरणाय चित्तं समानं भवतु । परस्परं मिलित्वा कार्यं कुर्वाणानां लक्ष्यं समानं भवति । ते परस्परं विमर्शं कृत्वा कार्यं कुर्वन्ति । अतः परस्परं मिलित्वा विचारपूर्वकं निष्कर्षं प्राप्तुमहं युष्मभ्यं समानं परामर्शं यच्छामि ।

**३**
**पदच्छेदः**

समानी, वः, आकूतिः, समाना, हृदयानि, वः, समानम्, अस्तु, वः, मनः, यथा, वः, सुसहासति ।

**अन्वयः**

व आकूतिः समानी (भवतु), वः हृदयानि समाना (भवतु), वः मनः समानमस्तु, यथा वः सुसहासति ।

**सरलार्थः**

कस्यापि विचारस्य निश्चयनार्थं बुद्धिः समाना भवतु । मननकर्तुर्मनः समानं भवतु । समानमुद्देश्यं गृहीत्वा कर्मणि तथा प्रवर्तनं भवतु यथा सफलता प्राप्येत ।

**४**
**पदच्छेदः**

कृते, मन्त्रप्रयोगे, वा, त्रेतायाम्, तन्त्रसाधने, द्वापरे, व्यूहरचने, शक्तिः, सङ्घे, कलौ, युगे ।

**अन्वयः**

कृते मन्त्रप्रयोगे त्रेतायां तन्त्रसाधने द्वापरे व्यूहरचने कलौ युगे सङ्घे वा शक्तिः (भवति) ।

**अर्थः**

सत्ययुगीना जना मन्त्रप्रयोगेण शक्तिमर्जयन्ति स्म, तां प्रदर्शयन्ति स्म च । त्रेतायुगे तु शक्तिः तन्त्रसाधनायामासीत् । द्वापरे च जना युगे सैन्यानां व्यूहरचनया शक्तिप्रयोगं कुर्वन्ति स्म परन्तु कलौ युगे शक्तिः सङ्गठने वर्तते । अतः सम्प्रति कलियुगे सङ्गठिता भूत्वा कार्यसाधनमेव बुद्धिपूर्णं भवति ।

**५**
**पदच्छेदः**

गणमुख्यैः, तु, सम्भूय, कार्यम्, गणहितम्, मिथः, पृथग्गणस्य, भिन्नस्य, विततस्य, ततः, अन्यथा, अर्थाः, प्रत्यवसीदन्ति, भवन्ति, च ।

**अन्वयः**

गणमुख्यैः तु मिथः सम्भूय गणहितं कार्यं पृथग्गणस्य भिन्नस्य विततस्य (च गणस्य) ततः अर्थाः प्रत्यवसीदन्ति अन्यथा तथा अनर्थाः भवन्ति च ।

**सरलार्थः**

समरे गणमुख्यः शूरः गणसदस्यैः सह मिलित्वा गणहितं कुर्यात् । गणे यदि कश्चन विभेदः, भावात्मकं विखण्डनं वा आगच्छति चेत् स गणमुख्यः शूरः तद्विपरीतमेव आचरति । यतो

हि स्वशक्त्याश्रिते गणे च भेद उत्पद्यते चेत् गणप्रयोजनं विनश्यति । ततोऽनर्थो जायते । अतः गणमुख्यः शूरः अननुकूलं गणमपाकृत्य केवलमनुकूलैः शूरैरेव मिलित्वा समरे विजयं लब्धुं प्रयतते । गणे यदा वैचारिको भेद उत्पद्यते, तदा गणाबद्धानां मिथो भावैक्यं न भवति । भावैक्यं विना समरे विजयोऽसम्भवः खलु । समरे एव न, अपि तु यत्र कुत्रापि कार्यसाधनाय समूहसदस्येषु भावैक्यमनिवार्यमिति भावः ।

## शिक्षणालोकः

अस्य पाठस्याध्यापनेन छात्रा सङ्घशक्तेर्महत्त्वविषये ज्ञापनीयाः । सङ्घबद्धा भूत्वा कार्यसम्पादनाय ते प्रेरणीयाश्च । शिक्षकेण सङ्घशक्तेर्महत्त्वप्रतिपादकानि अन्यानि पद्यानि अन्वेष्टुञ्च छात्राः समुत्प्रेरणीयाः ।

## अभ्यासः

## पाठानुशीलनम्

१. **शुद्धमुच्चारयत**

कृते मन्त्रप्रयोगे वा त्रेतायां तन्त्रसाधने ।
द्वापरे व्यूहरचने शक्तिः सङ्घे कलौ युगे ॥

२. **शुद्धं लिखत**

समानी व आकूतिः समाना हृदयानि वः ।
समानमस्तु वो मनो यथा वः सुसहासति ॥

३. **नेपालीभाषायाम् अर्थं लिखत**

समानो मन्त्रः समितिः समानी समानं मनः सहचित्तमेषाम् ।
समानं मन्त्रमभिमन्त्रये वः समानेन वो हविषा जुहोमि ॥

४. **सङ्क्षेपेण उत्तरयत**

(क) कलौ युगे शक्तिः कुत्र वर्तते ?

(ख) कलियुगे किं बुद्धिपूर्णं भवति ?

(ग) कदा शक्तिस्तन्त्रसाधनायामासीत् ?

(घ) द्वापरे युगे कथं शक्तिप्रयोगं कुर्वन्ति स्म ?

(ङ) सत्ययुगीनाः जनाः कथं शक्तिमर्जयन्ति स्म ?

५. **परस्परं मेलयत**

| **खण्डः 'क'** | **खण्डः 'ख'** |
|---|---|
| समानः | मनः |
| समानी | हविषा |
| समानम् | मन्त्रः |
| समानेन | समितिः |

६. **पाठाधारेण रिक्तस्थानं पूरयत**

(क) चित्तं ............ करोति । (स्मरणम्, पानम्, रक्षणम्)

(ख) अहं ............ यच्छामि । (धनम्, विद्याम्, परामर्शम्)

(ग) सर्वेषां ........... एकं भवतु । (भोजनम्, वस्त्रम्, लक्ष्यम्)

(घ) विबुधाः मिलित्वा .......... कार्यं सम्पादयन्ति स्म । (महत्, नियतम्, लघु)

७. **'शक्तिः सङ्घे कलौ युगे' इत्यस्य तात्पर्यं विशदयत ।**

८. **पाठाधारेण सत्यासत्यं विवेचयत**

(क) मनो निश्चयं करोति ।

(ख) गणे भेदोऽनर्थमुत्पादयति ।

(ग) मनः समानं भवतु, न तु चित्तम् ।

(घ) कार्यसाधनाय समूहसदस्येषु भावैक्यमनिवार्यम् ।

९. **सन्धिविच्छेदं कुरुत**

सं वः, देवा भागम्, समानो मन्त्रः, ततोऽन्यथा, वो हविषा, मनो यथा, गणमुख्यैस्तु, प्रत्यवसीदन्ति ।

१०. **विभक्तिनिर्देशं कुरुत**

युगे, एषाम्, हविषा, पूर्वे, मनांसि, भागम् ।

११. **वाक्येषु प्रयोगं कुरुत**

अन्यथा, मिथः, कलौ, हृदयानि, यथा, चित्तम्, जुहोमि ।

१२. **अर्थं लिखत**

अवसीदन्ति, गणहितम्, सम्भूय, विततस्य, आकूतिः, अभिमन्त्रये, मन्त्रप्रयोगे ।

१३. **अधस्तनश्लोकं पठित्वा प्रदत्तप्रश्नानामुत्तराणि दत्त**

अल्पानामपि वस्तूनां संहतिः कार्यसाधिका ।
तृणैर्गुणत्वमापन्नैर्बद्ध्यन्ते मत्तदन्तिनः ॥

(क) मत्तदन्तिनः कैर्बद्ध्यन्ते ?

(ख) केषां वस्तूनां संहतिः कार्यसाधिका भवति ?

(ग) 'अल्पानाम्' इत्यत्र का विभक्तिः प्रयुक्ता वर्तते ?

(घ) पद्ये 'तृणैः' इत्यस्य किं विशेषणपदं प्रयुक्तमस्ति ?

१४. **प्रदत्तां कथां पठित्वा प्रश्नानुत्तरयत**

समुद्रतीरे पक्षियुगलं निवसति स्म । पक्षिण्या अण्डोत्पादनस्य, समयः सञ्जायमान आसीत् । सा अण्डस्योत्पादनाय, स्फोटनाय च सुरक्षितं स्थानमन्वेष्टुं पक्षिणमवदत् । समुद्रतीरमेव उचितं स्थानमिति पक्षी पक्षिणीमवदत् । समुद्रस्य तरङ्गोऽण्डं वहेदिति पक्षिणी आशङ्कां प्रकटितवती । तदा पक्षी अवदत्, "अस्मदण्डं वाहयितुं को दुःसाहसं करिष्यतीति वयमपि द्रक्ष्यामः ।"

समुद्रः पक्षिणः कथनं श्रुतवान् । स 'पक्षिणोऽभिमानभङ्गायोपायं चिन्तितवान् । पक्षिणी समुद्रस्य तीरे एव अण्डमुत्पादितवती । क्षणानन्तरं समुद्रः स्वतरङ्गैस्तदण्डं वाहितवान् । अण्डं वहद् दृष्ट्वा सा पक्षिणी रुदितवती । पक्षी समुद्रात् अण्डं प्रत्यानेष्यामीति प्रतिज्ञाय पक्षिणां सभामाकारयत् । सर्वे पक्षिणो मिलन्ति चेत् समुद्रमपि शुष्कं कर्तुं शक्यते इति स विचारं प्रकटितवान् ।

ते सर्वे मिलित्वा समुद्राच्चञ्चुना जलमानीय भूमौ त्यक्तुं प्रारब्धवन्तः । बहुकालं यावत् जलस्य निःसारणेनापि समुद्रे कश्चन प्रभावो नाभवत् । ततः पक्षिणो व्यचारयन्– अस्माकं बलमेव न पर्याप्तम् । अतोऽस्माकं राजानं गरुडमाह्वयाम इति । सर्वे पक्षिणः पक्षिराजस्य गरुडस्य पार्श्वे गत्वा सर्वं वृत्तान्तं न्यवेदयन् । पक्षिणां वचनं श्रुत्वा गरुडस्तेषां साहाय्यं कर्तुं निश्चितवान् । गरुडस्तस्मिन् दिने स्वस्वामिनं भगवन्तं विष्णुं सेवितुं न गतवान् । गरुडमाह्वातुं भगवान् विष्णुर्दूतं प्रेषितवान् परन्तु गरुडः 'पक्षिणां साहाय्यार्थं व्यस्तोऽस्मी'त्युक्त्वा न गतवान् । तत्कारणं विज्ञाय विष्णुस्तत्र पक्षिणां साहाय्यार्थं भगवान् विष्णुः स्वयं गतवान् । पक्षिणां साहाय्यार्थं समागच्छन्तं भगवन्तं विष्णुं दृष्ट्वा समुद्रो भयमवाप्नोत् । भयेन स झटिति पक्षिण्या अण्डमानीय दत्तवान् । पक्षिणां संगठितत्वात् समुद्रेण वाहितमण्डमपि पुनः प्राप्तुं ते समर्था अभवन् ।

**(अ) एकपदेनोत्तरयत**

(क) समुद्रः कस्य कथनं श्रुतवान् ?

(ख) पक्षियुगलं कुत्र निवसति स्म ?

(ग) समुद्रः कैरण्डं वाहितवान् ?

(घ) पक्षिणी सुरक्षितं स्थानमन्वेष्टुं कमवदत् ?

**(आ) एकवाक्येनोत्तरयत**

(क) पक्षिण्या आशङ्का का आसीत् ?

(ख) समुद्रः किं भङ्गयितुं चिन्तितवान् ?

(ग) सुरक्षितस्य स्थानस्य विषये पक्षी किमवदत् ?

(घ) कीदृशस्य कार्यस्य समयः सञ्जायमान आसीत् ?

(इ) **कथाधारेण उचितमनुचितं वा सङ्केतयत**

(क) अस्माकं बलं पर्याप्तमासीत् ।

(ख) पक्षिणां संगठनं सफलमभवत् ।

(ग) पक्षिणस्तेषां राजानं गरुडमाह्वयन् ।

(घ) पक्षिणां वचनं श्रुत्वा गरुडः क्रुद्धो जातः ।

(ङ) पक्षिणां कार्येण समुद्रे महान् प्रभावोऽजायत ।

(च) समुद्रो झटिति पक्षिण्या अण्डमानीय दत्तवान् ।

(छ) भगवतो विष्णोर्दूतं दृष्ट्वा समुद्रो भयमवाप्नोत् ।

(ज) गरुडः स्वस्वामिनं भगवन्तं विष्णुं सेवितुं न गतः ।

(झ) पक्षिणां साहाय्यार्थं भगवान् विष्णुः स्वदूतं प्रैषयत् ।

(ञ) सर्वे पक्षिणो मिलित्वा समुद्रं शोषयितुमुद्यममकुर्वन् ।

## व्यवहारानुशीलनम्

१. **सङ्घे शक्तिर्भवतीति विषये स्वानुभवं प्रकटयत ।**

२. **विद्यालयस्य स्वच्छीकरणाय सर्वैश्छात्रैर्मिलित्वा किं किं कर्तव्यमिति सूचीं निर्मात ।**

३. **कीदृशं कार्यं सामूहिकरूपेण कार्यम् ? सामाजिकानां कार्याणामुदाहरणेन स्पष्टयत ।**

४. **समुचितमुत्तरं (✓) चिह्नेन दर्शयत**

(क) तव पार्श्वे क्रीडनकमस्ति चेत् किं करोषि ?

(अ) एकाकी क्रीडामि ।

(आ) सखिभिः सह क्रीडामि ।

(इ) क्रीडनकं कमपि न दर्शयामि ।

(ई) क्रीडनकं गृहे स्थापयित्वा बहिः क्रीडामि ।

**(ख) मित्राणि मिलित्वा कार्यकरणेन किं भवति ?**

(अ) कार्यं जटिलं भवति ।

(आ) कार्यं शीघ्रं न सम्पद्यते ।

(इ) कार्यस्य फलं न्यूनं भवति ।

(ई) कार्यं सहजमुचितफलदञ्च भवति ।

**(ग) मार्गेऽपघातयुक्तं जनं दृष्ट्वा किं करोषि ?**

(अ) चिकित्सार्थं तस्मै धनं ददामि ।

(आ) तस्य निकटे उपविश्य रोदिमि ।

(इ) तस्य समीपं गत्वा सहानुभूतिं प्रकटयामि ।

(ई) तमुत्थाप्य चिकित्सालयं नेतुमुपायं करोमि ।

**(घ) देशस्य विकासाय किमावश्यकम् ?**

(अ) मनसि उत्साहः ।

(आ) बहोर्धनस्य व्ययः ।

(इ) जनेषु पारस्परिकः सद्भावः ।

(ई) सङ्घशक्तिः, उद्यमशीलता च ।

## पञ्चमः पाठः

# कपोतहिरण्यककथा

महिलारोप्यनगरस्य गहने वने विशालो वटवृक्ष आसीत् । तस्य फलान्युपभुज्य तत्र नीडं च निर्माय अनेके विहङ्गाः स्वशावकैः समेता निवसन्ति स्म । पथिकाश्च विश्रामार्थं तस्य छायायां निवसन्ति स्म । तस्यैव विशालस्य वटवृक्षस्य एकस्यां शाखायां लघुपतनकनामा कश्चन काको वसति स्म । कालक्रमेण कस्मिंश्चन दिने लघुपतनकः आहारार्थमितस्ततो निरीक्षमाण आसीत् । तदैव स कञ्चन कुरूपं भयानकञ्च मनुजमपश्यत् । पाशहस्तः स मनुष्यः तस्यैव वटवृक्षस्य समीपमागच्छन्नासीत् । यमदूतमिव विकरालं तं दृष्ट्वा भयाक्रान्तः स मनसि अचिन्तयत्, "हन्त ! एष खलु व्याध इत एवागच्छन् विद्यते, वृक्षस्य समीपे पाशं यदि विन्यसिष्यति तर्हि बहवो विहङ्गमाः पाशबद्धा भविष्यन्ति । अतः शीघ्रं गत्वा वृक्षस्थान् पक्षिबान्धवान् वदिष्यामि, यतस्ते कणलोभेन पाशे न पतेयुः !" इति । उच्यते च -

**जिह्वा-लौल्य-प्रसक्तानां जल-मध्य-निवासिनाम् ।**
**अचिन्तितो वधोऽज्ञानां मीनानामिव जायते ॥ इति ।**

जिह्वालौल्येन (रसलोभेन) यथा जलनिवासिनो मत्स्या बडिशे पतन्ति, तथैव रसलोभिनोऽन्येऽपि कालपाशे निपतन्ति ।

एवं विचार्य स काक उड्डीय शीघ्रं वटवृक्षं गत्वा तारस्वरेणावोचत्, "भो पक्षिबान्धवाः ! कश्चन दुष्टो व्याधो हस्ते पाशमादाय इत एवागच्छन्नस्ति । शीघ्रमेव सोऽत्रागमिष्यति । पाशं निधाय समीपे तण्डुलकणांश्च विकिरिष्यति । किन्तु कणलोभेन पाशसमीपे मा गच्छत । कालकूटमिव मत्वा दूरे एव निवसत" इति ।

क्षणानन्तरं व्याधो वटवृक्षस्य समीपमागच्छत् । ततः पाशं निधाय तण्डुलकणान् निक्षिप्य समीपस्थे कुञ्जे निभृतोऽतिष्ठत् । वटवृक्षस्य सर्वे पक्षिणस्तान् तण्डुलकणान् दृष्ट्वा लुब्धा अपि काकस्य वचनं स्मारं स्मारं मरणभिया तत्र नागच्छन् ।



तस्मिन्नेव समये चित्रग्रीवनामकः कश्चन कपोतराजो बन्धुभिः सहितस्तत्रागच्छत्। आहारार्थमुड्डीयमानः स तान् तण्डुलकणान् दृष्ट्वा पाशमविचार्यैव तत्र प्रविष्टः। तेन सहागता अन्येऽपि कपोतास्तमनुसरन्तस्तण्डुलकणान् भक्षयितुमारब्धवन्तः। यावच्च द्वित्रान् तण्डुलकणान् अभक्षयन्, तावदेव सर्वेऽपि पाशबद्धा अभवन्। पाशबद्धांस्तान् कपोतान् वीक्ष्य कुञ्जस्थो व्याधो हृष्टोऽभवत्।

व्याधो दण्डं हस्ते निधाय पाशबद्धान् तान् कपोतान् मारयितुमागतवान्। पाशबद्धास्ते कपोता भयभीता अभवन्। भयभीतान् तान् दृष्ट्वा कपोतराजः चित्रग्रीवोऽवदत्, "अयि भो ! भीता मा भवत। विपत्तौ धैर्येण उपायेन च प्राणा रक्षणीयाः। चञ्चुभिः जालमादाय यदि सर्वे उड्डीयामहे, तर्हि अस्माकं प्राणानां रक्षा भविष्यति। केनाप्युपायेन पश्चाद् जालच्छेदं विधास्यामः। यदि च भयभीता अत्रैव निवसामस्तर्हि अस्माकं मरणं सुनिश्चितमेव।" इति। चित्रग्रीवस्य तादृशमुपायं श्रुत्वा सर्वे कपोताः स्वीयचञ्चुभिः जालमादाय उदडीयन्त। आकाशे उड्डीयमानान् तान् कपोतान् वीक्ष्य व्याधस्तानन्वसरत्। क्षणेन ते कपोताः अदृष्टा अभवन्। 'कपोतानां लोभेन जालमपि मे विनष्टम्' इति विचार्य दुःखितः सन् गृहं प्रति गतवान्।

क्षणानन्तरं चित्रग्रीवोऽपि व्याधमदर्शनीभूतं दृष्ट्वा पाशच्छेदनायोपायं विचारितवान्। स स्मृतवान्, "अस्यैव नगरस्य प्रागुत्तरदिग्भागे मम सुहृद् हिरण्यकनामको मूषको निवसति। स

एवास्माकं पाशं विच्छिद्य अस्मान् मोचयिष्यति" इति । ततः स स्वबान्धवानुक्तवान्, "अयि भो ! अस्यैव नगरस्य प्रागुत्तरदिग्भागो गम्यताम् । तत्र मम सुहृद् हिरण्यकोऽस्माकं जालं विच्छिद्यास्मान् मोचयिष्यति" । चित्रग्रीवस्य वचनं श्रुत्वा सर्वे पाशबद्धाः कपोताः प्राणरक्षार्थं हिरण्यकबिलदुर्गं प्रापुः । हिरण्यकस्य बिलदुर्गं प्राप्तश्चित्रग्रीवश्चिन्तितवान् -

**सर्वेषामेव मर्त्यानां व्यसने समुपस्थिते ।**

**वाङ्मात्रेणापि साहाय्यं मित्रादन्यो न सन्दधे ॥**

**जीवानां दुःखस्य समये मित्रमेव सहयोगं कुरुते, नान्यद् । इति ।**

इत्थं विचिन्त्य स उवाच, "अयि भो मित्र हिरण्यक ! सत्वरं बहिरागच्छ, मम महती व्यसनावस्था वर्तते" इति । हिरण्यकश्च स्वस्य बिलदुर्गे निर्भयः सन् स्थित आसीत् । स उदतरत्, "भोः ! को भवान् ? किमर्थमत्र सम्प्राप्तः ? किं कारणम् ? का ते व्यसनावस्था ? सर्वं कथय" इति । स्वमित्रस्य हिरण्यकस्य वचनं श्रुत्वा हृष्टश्चित्रग्रीवोऽवदत्, "भोः ! अहं तव सखा कपोतराजश्चित्रग्रीवोऽस्मि । सत्वरं बहिरागच्छ । गुरुतरं प्रयोजनं वर्तते ।"

स्वमित्रस्य वचनं श्रुत्वा हिरण्यकः प्रसन्नोऽभवत् । मित्रस्य सहयोगाय सत्वरं बिलाद् बहिरागतवान् । बहिरागत्य स्वमित्रं सपरिवारं पाशबद्धं समालोक्य स सविषादमवदत्, "अयि भोः ! किमेतत् ?" चित्रग्रीवोऽवदत्, "मित्र ! पश्यन्नपि किं पृच्छसि ? जिह्वालौल्येन वयं पाशबद्धा अभवाम । साम्प्रतं सर्वं परित्यज्य शीघ्रं पाशच्छेदनं कुरु ।"

चित्रग्रीवस्य तां दशां दृष्ट्वा हिरण्यको दुःखितोऽभवत् । ततश्चित्रग्रीवस्य पाशं छेत्तुमुद्यतोऽभवत् । तद् दृष्ट्वा चित्रग्रीव उवाच, "भद्र ! प्रथमं तावन्मम भृत्यानां पाशच्छेदं कुरु । तदनु मम कुरु ।" इति । तच्छ्रुत्वा हिरण्यकोऽवदत्, "मित्र ! अनुचितम् त्वया उक्तम् । पूर्वं स्वामिनो मोचनमुचितम् ।" हिरण्यकस्य वार्तां श्रुत्वा चित्रग्रीवोऽवदत्, "तथा मा वद मित्र ! एते सर्वे मदाश्रयाः सन्ति । स्वकुटुम्बं सन्त्यज्य विश्वासेनैते मत्पार्श्वे समागताः सन्ति । एतेषां रक्षणं मम कर्तव्यम् । यदि पाशच्छेदसमये तव दन्तभङ्गो भविष्यति, अथवा लुब्धकः कश्चन समायास्यति, तर्हि एतेषां मरणमेव । नाहं पापभाग् भवितुं वाञ्छामि" इति ।

उदारमनसः स्वमित्रस्य चित्रग्रीवस्य वचः श्रुत्वा हिरण्यकः प्रसन्नोऽभवत् । ततश्चित्रग्रीवस्य वचनानुसारं पूर्वं भृत्यानां पाशच्छेदं विधाय पश्चात् चित्रग्रीवस्य पाशमच्छिनत् । ततश्च सोऽवदत्, "मित्र ! गम्यतां स्वाश्रयं प्रति । व्यसने प्राप्ते पुनरागम्यताम्" इति ।

एतावता उपायेन, धैर्येण, मित्रस्य साहाय्येन च पाशान्मुक्तश्चित्रग्रीवो हृष्टमनाः स्वाश्रयमगच्छत् । हिरण्यकोऽपि मित्रस्य साहाय्यं विधाय प्रहृष्टः सन् बिलं प्रविष्टवान् ।

### शिक्षणालोकः

विपत्तौ किं कर्तुं शक्यते ? इति प्रश्नं कृत्वा तदनु विपत्तौ धैर्येण, उपायेन च कार्यं साधनीयम् इति बोधयित्वा कथानुसारेण छात्राः बोधनीयाः । समूहशक्तेश्च विषये तथैवोदाहरणेन सम्बोधनीयाः ।

## अभ्यासः

### पाठानुशीलनम्

१. **पाठस्य तृतीयमनुच्छेदं पठित्वा तस्याशयं प्रकाशयत ।**

२. **अधस्तनानि पदानि पाठे कस्मिन् सन्दर्भे समागतानि सन्ति ? अन्विषत**

भयाक्रान्तः, जिह्वा-लौल्य-प्रसक्तानाम्, मरणभिया, पाशबद्धाः, उड्डीयमानान्, प्राणरक्षार्थम्, व्यसनावस्था, अच्छिनत् ।

३. **पाठाधारेण कथनानि संशोध्य पुनर्लेखनं कुरुत**

(क) वटवृक्षे बहवः पशवो निवसन्ति स्म ।

(ख) लघुपतनकः कणलोभेन पाशे न्यपतत् ।

(ग) कपोता भयभीताः पाशे एव संस्थिताः ।

(घ) हिरण्यकश्चित्रग्रीवस्य शत्रुरासीत् ।

(ङ) चित्रग्रीवस्यानुसारेण प्रथमं स्वस्य पश्चादन्येषां पाशच्छेद उचितः ।

४. **कथां पठित्वा तस्याः सारांशं स्वमातृभाषायां सरलसंस्कृतभाषायां वा कक्षायां श्रावयत ।**

५. **एकवाक्येनोत्तरयत**

(क) वटवृक्षः कुत्र आसीत् ?

(ख) कथानुसारेण काकस्य नाम किम् ?

(ग) व्याधः कीदृश आसीत् ?

(घ) मत्स्याः केन कारणेन बडिशे निपतन्ति ?

(ङ) व्याधः पाशं निधाय कुत्रातिष्ठत् ?

(च) कपोतराजस्य किं नामधेयम् ?

(छ) विपत्तौ प्राणाः कथं रक्षणीयाः ?

(ज) हिरण्यको नगरस्य कस्यां दिशि निवसति ?

(झ) हिरण्यकः किमर्थं दुःखितोऽभवत् ?

(ञ) पाशं विच्छिद्य हिरण्यकश्चित्रग्रीवं किमवदत् ?

६. **कथानुसारं परस्परं मेलयत**

| **समूहः क** | **समूहः ख** |
|---|---|
| लघुपतनकः | पाशच्छेदं विधाय मित्राणां प्राणान् अरक्षत् । |
| व्याधः | कलहेन पाशबद्धाः सञ्जाताः । |
| चित्रग्रीवः | पक्षिबान्धवान् सम्बोधयामास । |
| हिरण्यकः | धैर्येण उपायेन च प्राणान् रक्षितुं समर्थः सञ्जातः । |
| | क्षणं कपोतानन्वसरत् । |

७. **अधस्तनानानि कथनानि उचितानि अनुचितानि वेति निश्चिनुत**

(क) कणलोभेन पाशसमीपे मा गच्छत । कालकूटमिव मत्वा दूरे एव निवसत ।

(ख) भीता मा भवत । विपत्तौ धैर्येण उपायेन च प्राणा रक्षणीयाः ।

(ग) कपोतानां लोभेन जालमपि मे विनष्टम् ।

(घ) जिह्वालौल्येन वयं पाशबद्धा अभवाम ।

(ङ) अनुचितं त्वया उक्तम् । पूर्वं स्वामिनो मोचनमुचितम् ।

८. **'जिह्वालौल्यप्रसक्तानाम्...' इति श्लोकं प्रपूर्य तस्य सरलार्थं लिखत ।**

९. **पाठाधारेण रिक्तस्थानं पूरयत**

(क) लघुपतनकः .............. इतस्ततो निरीक्षमाण आसीत् ।

(ख) व्याधः हस्ते .............. आदाय आगच्छन् अस्ति ।

(ग) पक्षिणः लुब्धा अपि .............. तत्र नागच्छन् ।

(घ) .............. पाशं विच्छिद्य कपोतान् मोचयिष्यति ।

(ङ) कपोताः स्वकुटुम्बं सन्त्यज्य .............. चित्रग्रीवस्य पार्श्वे समागताः सन्ति ।

१०. **कथायाः पद्यमनुसृत्य 'व्यसने मित्रमेव साहाय्यं कुरुते' इत्यस्मिन् विषये विमर्शं कुरुत ।**

११. **गद्यमनुसृत्य तदनुवर्तिप्रश्नानुत्तरयत**

जीवने सर्वदा सुखमेव न भवति । विपत्तिरपि भवति । प्रायो जना विपत्तौ दुःखस्य वार्तां कुर्वन्ति । रोदित्वा समयं यापयन्ति । किन्तु धैर्यशीलः सज्जनो विपत्तौ रोदित्वा न तिष्ठति । स विपत्तेर्निवारणस्य उपायं चिन्तयति । तस्य कृते विपत्तयः शिक्षाया अवसराः सन्ति ।

अस्मिन् प्रसङ्गे थोमस-अल्भा-एडिसननामा वैज्ञानिक उदाहरणीयो वर्तते । तस्य परिवारः सम्पन्नो नासीत् । बाल्ये स शिक्षायै अवसरं न लब्धवान् । तथापि स धैर्यशील आसीत् । जीवनयापनाय बाल्ये एव स समाचारपत्राणि विक्रीणाति स्म । किन्तु स न केवलं तान् विक्रीणाति, तत्र प्रकाशिताः विज्ञानसम्बद्धा कथाश्च पठति स्म । ताः कथाः पठित्वा तस्य मनसि विज्ञाने प्रविधौ च रुचिरुत्पन्ना अभवत् ।

कालक्रमेण थोमसमहाभागः प्रसिद्धो वैज्ञानिकोऽभवत् । वैद्युतयन्त्राणां निर्माणे तस्य नाम अद्यापि स्मर्यते । स सहस्राधिकान् आविष्कारान् च अकरोत् । उच्यते, विद्युद्वर्तिकायाः आविष्कारसमये सहस्रतमे एव प्रयासे स सफलोऽभवत् । सामान्यतो जना द्विवारं त्रिवारं वा प्रयासं कुर्वन्ति । किन्तु थोमसमहाभागः सहस्रवारं परीक्ष्य विद्युद्वर्तिकामाविष्कृतवान् । धैर्यस्य एतादृगुदाहरणम् न कुत्रापि लब्धुं शक्यते ।

एकदा थोमसमहाभागस्य प्रयोगशाला अग्निप्रकोपेण नष्टप्राया अभवत् । किन्तु थोमसमहाभागः उक्तवान्, "अहं दुःखितो नास्मि । मम निष्फलानि सर्वाण्यपि कृत्यानि

दग्धानि अभवन् । पुनरहं ततोऽधिकां प्रयोगशालां निर्माय कार्याणि सफलानि करिष्यामि” इति ।

निष्फलता तस्य कृते शिक्षाया अवसरभूता आसीत् । विपत्तिश्च तस्य कृते ऊर्जादायिनी आसीत् । सः सर्वेषामपि मानवानां प्रेरणास्रोतोभूतो वर्तते ।

**(अ) एकपदेनोत्तरयत**

(क) जीवने किं सर्वदा न भवति ?

(ख) जीवनयापनाय थोमसः किं विक्रीणाति स्म ?

(ग) थोमसः कति आविष्कारान् अकरोत् ?

(घ) थोमसः कस्य उदाहरणम् वर्तते ?

**(आ) एकवाक्येनोत्तरयत**

(क) धैर्यशीलो जनो विपत्तौ किं चिन्तयति ?

(ख) थोमसः कीदृशीः कथाः पठति स्म ?

(ग) थोमसस्य प्रयोगशाला केन कारणेन विनष्टा ?

(घ) विनष्टां प्रयोगशालां दृष्ट्वा थोमसः किम् अवदत् ?

**(इ) परस्परं मेलयत**

| **समूहः क** | **समूहः ख** |
|---|---|
| धीरो जनः | सहस्रवारं प्रयासः |
| थोमसस्य बाल्यकालः | प्रयोगशालायाः विनाशः |
| कथापठनम् | विपत्तौ धैर्यम् |
| विद्युद्वर्तिकाविष्कारः | समाचारपत्रस्य विक्रयः |
| अग्निप्रकोपः | विज्ञाने प्रविधौ च रुचिः |

१२. **कथां पठित्वा कः सन्देशो लभ्यते ? विमृश्य लिखत ।**

१३. **अधस्तनं नीतिपद्यं पठित्वा समुचितेषु उत्तरेषु (✓) चिह्नं दर्शयत**

सुहृदः स्नेहसम्पन्ना लोचनानन्ददायिनः ।
गृहे गृहवतां नित्यं नागच्छन्ति महात्मनाम् ॥
मित्रवान् साधयत्यर्थान् दुःसाध्यानपि वै यतः ।
तस्मान्मित्राणि कुर्वीत समानान्येव चात्मनः ॥

मित्राणि स्नेहशीलानि भवन्ति । तादृशानि मित्राणि विलोक्य जनानां लोचनयोरानन्दः प्रसरति । तादृशानि मित्राणि सर्वदा गृहे नागच्छन्ति । यदागच्छन्ति तदा तेषां सत्कारो विधेयः ।

मित्रवान् जनः दुःसाध्यानि अपि कार्याणि सरलतया साधयति । अत आत्मतुल्यानि मित्राणि विधातव्यानि ।

**प्रश्नाः**

(क) **मित्राणि कीदृशानि भवन्ति ?**

(अ) धैर्यशीलानि (आ) दानशीलानि (इ) स्नेहशीलानि

(ख) **मित्राणि विलोक्य नेत्रयोः किं प्रसरति ?**

(अ) क्रोधः (आ) आनन्दः (इ) दुःखम्

(ग) **मित्राणामागमने किं कर्तव्यम् ?**

(अ) सत्कारः (आ) तर्जनम् (इ) विलापः

(घ) **कः सरलतया कार्याणि साधयति ?**

(अ) शत्रुमान् (आ) धनवान् (इ) मित्रवान्

(ङ) **मित्राणि कीदृशानि आवश्यकानि ?**

(अ) आत्मविपरीतानि (आ) आत्मतुल्यानि (इ) धनिकानि

## व्यवहारानुशीलनम्

१. 'धैर्यशीलो जन एव कार्याणि साधयितुं शक्नोति' इति विषये प्रेरकप्रसङ्गमन्विष्य तस्मिन् प्रसङ्गे स्वस्य धैर्यशीलतायास्तुलनां विधत्त ।

२. 'मित्राणां सहयोगाय त्वं किं कर्तुं शक्नोषि ?' सूचीं निर्माय वदत । सति चावश्यके सहयोगं कुरुत ।

३. उदाहरणं दृष्ट्वा तादृशीमेव सारिणीं निर्माय कक्षायां स्थापयत

| यस्य बहवो मित्राणि सन्ति | यस्य बहवो वैरिणः सन्ति |
|---|---|
| १. सः आनन्दं सन्तोषं च लभते । | १. सः सर्वदा क्रुद्धो भवति । |
| २. ........................................ | २. ........................................ |
| ३. ........................................ | ३. ........................................ |
| ४. ........................................ | ४. ........................................ |
| ५. ........................................ | ५. ........................................ |
| ६. ........................................ | ६. ........................................ |
| ७. ........................................ | ७. ........................................ |
| ८. ........................................ | ८. ........................................ |
| ९. ........................................ | ९. ........................................ |

४. समुचितविकल्पे (✓) चिह्नं दर्शयत

(अ) त्वं कीदृशस्य मित्रस्य सङ्गतिं करोषि ?

(क) यः परेषां निन्दां करोति, स्वस्य च प्रशंसां करोति ।

(ख) यः परेषां सहयोगं करोति, मधुरं च वदति ।

(ग) यो वृद्धजनान् तिरस्करोति ।

(घ) यो बलवान् वर्तते ।

**(आ) मित्रस्य पार्श्वे पुस्तकं नास्ति चेत् किं करोषि ?**

(क) मित्रेण सह मिलित्वा पठामि ।

(ख) स्वस्य अपि पुस्तकं न पठामि ।

(ग) अपरस्य पुस्तकं चोरयित्वा मित्राय ददामि ।

(घ) किमपि न करोमि ।

**(इ) मित्राणां परस्परं कलहं दृष्ट्वा किं कुरुषे ?**

(क) स्वयं च कलहे संलग्नो भवामि ।

(ख) दूरे स्थित्वा पश्यामि ।

(ग) कलहमवरोध्य मित्राणि बोधयामि ।

(घ) गुरुजनानाहूय दर्शयामि ।

**(ई) विपत्तौ आपतितायां किं करोषि ?**

(क) भयभीतः सन् तिष्ठामि ।

(ख) धैर्येण उपायेन वा कार्यं साधयामि ।

(ग) तारस्वरेण रोदितुमारेभे ।

(घ) मित्राणां सहयोगं याचे ।

**(उ) स्वस्य मित्रं रुष्टं चेत् किं करोषि ?**

(क) तेन सह वार्तालापं न करोमि ।

(ख) तेन सह कलहं करोमि ।

(ग) क्षमां याचे, स्वस्याशयं च वदामि ।

(घ) अन्येन मित्रेण सह गत्वा निवसामि ।

# समयपालनम्

काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् ।
व्यसनेन च मूर्खाणां निद्रया कलहेन वा ॥१॥

आदानस्य प्रदानस्य कर्तव्यस्य च कर्मणः ।
क्षिप्रमक्रियमाणस्य कालः पिबति तद्रसम् ॥२॥

नष्टं द्रव्यं प्राप्यते ह्युद्यमेन
नष्टा विद्या प्राप्यतेऽभ्यासयुक्त्या ।
नष्टारोग्यं सूपचारैः सुसाध्यं
नष्टा बेला या गता सा गतैव ॥३॥

यथा बीजाङ्कुरः सूक्ष्मः प्रयत्नेनाभिरक्षितः ।
फलप्रदो भवेत् काले तद्वल्लोकः सुरक्षितः ॥४॥

अप्राप्त-कालं वचनं बृहस्पतिरपि ब्रुवन् ।
लभते बह्ववज्ञानमपमानं च पुष्कलम् ॥५॥

**१**
**पदच्छेदः**

काव्यशास्त्रविनोदेन, कालः, गच्छति, धीमताम्, व्यसनेन, च, मूर्खाणाम्, निद्रया, कलहेन, वा ।

### अन्वयः

धीमताम् कालः काव्यशास्त्रविनोदेन गच्छति । मूर्खाणां (कालः) च व्यसनेन, निद्रया, कलहेन वा (गच्छति) ।

**सरलार्थः**

बुद्धिमन्तो विद्वांसः समयं व्यर्थं न यापयन्ति । ते काव्यादीनां शास्त्रादीनां च चर्चां कृत्वा कालं यापयन्ति । मूर्खास्तु व्यसनादिषु रमन्ते । ते परिश्रमं न कुर्वन्ति, प्रत्युत स्वपन्ति । तावता एव न तेषां कालः परस्परं कलहादिकं कृत्वा च व्यतीतो भवति । अतोऽस्माभिः काव्यशास्त्राणां चर्चया परिश्रमेण च समयो यापनीयः, न तु व्यसनेन, कलहेन, निद्रया वा ।

**२**
**पदच्छेदः**

आदानस्य, प्रदानस्य, कर्तव्यस्य, च, कर्मणः, क्षिप्रम्, अक्रियमाणस्य, कालः, पिबति, तद्रसम् ।

**अन्वयः**

कालः क्षिप्रम् अक्रियमाणस्य आदानस्य, प्रदानस्य, कर्तव्यस्य च कर्मणः तद्रसं पिबति ।

**सरलार्थः**

जीवने बहूनि कार्याणि सम्पादनीयानि भवन्ति । कदाचिद् आदानस्य कार्यं भवति चेत् कदाचित् प्रदानस्य कार्यं भवति । मानवस्य पितरौ प्रति, समाजं प्रति, राष्ट्रं प्रति च कर्तव्यानि भवन्ति । यदि मानवः एतादृशानि कार्याणि समये एव न विदधाति चेदेतेषां फलं समयः पिबति । मानवः फलं प्राप्तुं न शक्नोति । अतः समये एव कार्यं सम्पादनीयम् ।

**३**
**पदच्छेदः**

नष्टम्, द्रव्यम्, प्राप्यते, हि, उद्यमेन, नष्टा, विद्या, प्राप्यते, अभ्यासयुक्त्या, नष्टारोग्यम्, सूपचारैः, सुसाध्यम्, नष्टा, बेला, या, गता, सा, गता, एव ।

**अन्वयः**

उद्यमेन हि नष्टं द्रव्यं प्राप्यते । अभ्यासयुक्त्या नष्टा विद्या प्राप्यते । सूपचारैः नष्टारोग्यं सुसाध्यम् (परन्तु) या नष्टा बेला गता, सा गता एव ।

**सरलार्थः**

अस्माभिः परिश्रमः क्रियते चेन्नष्टं धनमपि अर्जयितुं शक्यते । विस्मृता विद्या अभ्यासेन महता प्रयासेन चाधिगन्तुं शक्यते । स्वास्थ्यं प्रतिकूलमस्ति चेदपि उपचारैरारोग्यं लभ्यते । परन्तु समयो नष्टश्चेत् स कदापि नागच्छति । कालः कस्मैचिदपि न प्रतीक्षते, स गतस्तु गत एव । अतः समयस्य सदुपयोगः कर्तव्यः ।

**४**
**पदच्छेदः**

यथा, बीजाङ्कुरः, सूक्ष्मः, प्रयत्नेन, अभिरक्षितः, फलप्रदः, भवेत्, काले, तद्वत्, लोकः, सुरक्षितः ।

**अन्वयः**

यथा प्रयत्नेन अभिरक्षितः सूक्ष्मः बीजाङ्कुरः काले फलप्रदः भवेत्, तद्वत् काले सुरक्षितः लोकः (फलप्रदः भवेत्) ।

**सरलार्थः**

प्रथमं भूम्यां बीजस्य वपनं भवति । ततस्तस्मादङ्कुरो जायते । स च सूक्ष्मो भवति । मनुष्यास्तं सूक्ष्मं बीजाङ्कुरं प्रयत्नेन रक्षन्ति । कालानन्तरं स विटपो भवति, वृक्षो भवति फलति च । अतो यथा सूक्ष्मः अपि बीजाङ्कुरः रक्षितः सन् काले फलदायी भवति तथैव राज्ञा रक्षिताः प्रजा देशस्य विकासाय अन्तःशुल्कादिकं प्रदातुं क्षमा भूत्वा काले फलप्रदाः भवन्ति ।

**५**
**पदच्छेदः**

अप्राप्तकालम्, वचनम्, बृहस्पतिः, अपि, ब्रुवन्, लभते, बहु, अवज्ञानम्, अपमानम्, च, पुष्कलम् ।

**अन्वयः**

बृहस्पतिः अपि अप्राप्तकालं वचनं ब्रुवन् बहु अवज्ञानं पुष्कलम् अपमानं च लभते ।

**सरलार्थः**

अनुपयुक्ते समये किमपि न कथनीयम् । असान्दर्भिकमपि न कथनीयम् । समुचिते काले एव वक्तव्यं भवति । बृहस्पतिर्देवगुरुरस्ति । सोऽपि समयमविचार्य किमपि कथयति चेद् बहु अपमानं लभते । अतोऽप्राप्तकालं वचनं हानये भवति न तु लाभाय ।

# अभ्यासः

## पाठानुशीलनम्

१. **शुद्धमुच्चारयत**

काव्यशास्त्रविनोदेन, व्यसनेन, अक्रियमाणस्य, उद्यमेन, अभ्यासयुक्त्या, नष्टारोग्यम्, सूपचारैः, अभिरक्षितः, अप्राप्तकालम्, ब्रुवन् ।

२. **पाठस्थान् श्लोकान् सस्वरं वाचयत ।**

३. **पाठस्थं तृतीयं श्लोकं शिक्षकमुखात् श्रुत्वा लिखत ।**

४. **श्लोकांशान् परस्परं मेलयत**

| | |
|---|---|
| काव्यशास्त्रविनोदेन | कालः पिबति तद्रसम् । |
| फलप्रदो भवेत् काले | कर्तव्यस्य च कर्मणः । |
| आदानस्य प्रदानस्य | निद्रया कलहेन वा । |
| क्षिप्रमक्रियमाणस्य | प्रयत्नेनाभिरक्षितः । |
| यथा बीजाङ्कुरः सूक्ष्मः | कालो गच्छति धीमताम् । |
| व्यसनेन च मूर्खाणां | तद्वल्लोकः सुरक्षितः । |

५. **पदानि संशोध्य लिखत**

धिमताम्, मुर्खाणाम्, छिप्रम्, पिबति, नश्टम्, सुषाध्यम्, सुक्ष्मः, बिजाङ्कुरः, बहू, पुस्कलम् ।

**६. पाठाधारेण उचितम् ☑ अनुचितं ☒ च कथनं निर्दिशत**

(क) बुद्धिमन्तो विद्वांसः समयं व्यर्थं यापयन्ति । ☐

(ख) जीवने बहूनि कार्याणि सम्पादनीयानि भवन्ति । ☐

(ग) समये एव कार्यं न सम्पादनीयम् । ☐

(घ) स्वास्थ्यं प्रतिकूलमस्ति चेदपि उपचारैरारोग्यं लभ्यते । ☐

(ङ) समयस्य सदुपयोगः कर्तव्यः । ☐

(च) बीजादङ्कुरो न जायते । ☐

(छ) अनुपयुक्ते समये किमपि न कथनीयम् । ☐

**७. अधस्तनानि पदानि प्रयुज्य वाक्यानि रचयत**

कालः, गच्छति, कलहेन, आदानस्य, पिबति, क्षिप्रम्, द्रव्यम्, प्राप्यते, बेला, यथा, फलप्रदः, प्रयत्नेन, वचनम्, लभते, पुष्कलम् ।

**८. अधस्तनात् श्लोकात् षष्ठ्यन्तपदानि अन्विष्य लिखत**

आदानस्य प्रदानस्य कर्तव्यस्य च कर्मणः ।
क्षिप्रमक्रियमाणस्य कालः पिबति तद्रसम् ॥

**९. उचितपदेन रिक्तस्थानं पूरयत**

(प्रयत्नेन, समयः, देवगुरुः, मूर्खाः, अभ्यासेन)

(क) ................ व्यसनादिषु रमन्ते ।

(ख) एतेषां फलं ............... पिबति ।

(ग) विद्या ..................अधिगन्तुं शक्यते ।

(घ) मनुष्याः बीजाङ्कुरं ................. रक्षन्ति ।

(ङ) बृहस्पतिः .................... अस्ति ।

१०. **सङ्क्षेपेण उत्तरयत**

(क) अस्माभिः कथं कालो यापनीयः ?

(ख) किमर्थं समये एव कार्यं सम्पादनीयम् ?

(ग) धनं कथमर्जयितुं शक्यते ?

(घ) समयस्य सदुपयोगः किमर्थं कर्तव्यः ?

(ङ) बीजाङ्कुरः कथं फलति ?

(च) राज्ञा प्रजाः किमर्थं रक्षितव्याः ?

(छ) बृहस्पतिरपि कदा अपमानं लभते ?

(ज) अप्राप्तकालस्य वचनस्य परिणामः को भवति ?

११. **श्लोकं पठित्वा प्रश्नानुत्तरयत**

उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः ।
न हि सुप्तस्य सिंहस्य विशन्ति वदने मृगाः ॥

(अ) कार्याणि केन सिध्यन्ति ?

(आ) कार्याणि कैः एव न सिध्यन्ति ?

(इ) सुप्तस्य सिंहस्य कुत्र मृगा न विशन्ति ?

(ई) कार्यं सम्पादयितुं किं कर्तव्यम् ?

१२. **सरलार्थं विलिख्य कक्षायां श्रावयत**

सत्पात्रं महती श्रद्धा देशे काले यथोचिते ।
यद्दीयते विवेक-ज्ञैस्तदनन्ताय कल्पते ॥

## व्यवहारानुशीलनम्

१. **स्वानुभूतां घटनां संस्मृत्य समयस्य दुरुपयोगेन जातायाः हानेर्विषये कक्षायां श्रावयत ।**

२. **पितृभ्यां सह पृष्ट्वा तयोः समयस्य सदुपयोगः कथं भवति इति कक्षायां कथयत ।**

३. **पाठस्य पठनानन्तरं कथं समयस्य सदुपयोगः कर्तुं शक्यते इति विचिन्त्य स्वसमयसारिणीं निर्माय प्रदर्शयत ।**

४. **समुचितविकल्पं चिनुत**

**(क) समयस्य पालनाय सर्वप्रथमं किं करोषि ?**

(अ) उत्तिष्ठामि । (आ) समयसारिणीं निर्मापयामि ।

(इ) मातरम् अनुरुणध्मि । (ई) घटिकां क्रीणामि ।

**(ख) कदा महता परिश्रमेण पठनीयम् ?**

(अ) परीक्षासमये (आ) अभिभावकनिर्दिष्टे समये

(इ) मध्यरात्रौ (ई) प्रतिदिनम्

**(ग) सन्तुलितभोजनस्यावश्यकता कदा भवति ?**

(अ) रोगाक्रान्तावस्थायाम् (आ) प्रातः काले

(इ) सर्वदा (ई) रात्रौ

**(घ) त्वं कदा वस्तूनि सम्यक् स्थापयसि ?**

(अ) वस्तूनां प्रयोगानन्तरम् (आ) प्रातरुत्थाय

(इ) विद्यालयाद् गृहं प्रत्यागत्य (ई) शयनसमये

# नीतिमान् जनः




पशवो न जानन्ति यत्, 'किमुचितं किं चानुचितम्' इति । मनुष्यास्तद्विपरीता भवन्ति । ते उचितानुचितयोर्विवेकेन व्यवहर्तुं क्षमन्ते । एतस्या एव क्षमताया विद्यमानत्वेनैव मनुष्या 'विवेकशालिनः प्राणिनः' इति व्यवह्रियन्ते । अत एव मनुष्यसमुदायस्य कृते 'समाजः', समाजशब्दस्य पशुसमुदायस्य कृते समजशब्दस्य प्रयोगव्यवस्था शास्त्रेषु विहिताऽस्ति ।

मनुष्यः समाजे निवसति । तस्मात् तेन सामाजिकी मर्यादा पालनीया भवति । सामाजिकमर्यादाया अपालनेन स समाजादेव बहिष्कृतो भवति । समाजे वर्तमानेषु मानवेषु वैविध्यं भवति । तेषां स्वजात्यनुकूला संस्कृतिरपि भिन्ना भवितुं शक्नोति । समाजे वर्तमानमेतादृशं वैविध्यं समाजस्यालङ्काराय भवति । नैतिकसमाजे विविधतायामपि एकता दृश्यते, यतस्तत्र सर्वे

सर्वेषां व्यवहाराणां सम्मानं कुर्वन्ति । किन्तु यस्मिन् समाजे नैतिकता क्षीणा वर्तते, तत्र जनाः परस्परं कलहं कुर्वन्ति । 'स्वपक्ष एव बलीयान्' इति मत्वा परेषां सामाजिकसंस्काराणां विरोधं कुर्वन्ति । तथा नोचितम् । यथोद्याने विकसितानि नानावर्णविचित्रतानि, नानाविधसुगन्धयुतानि च कुसुमानि उद्यानस्य सौन्दर्यं गुणवत्त्वं च वर्धयन्ति तथैव समाजस्य सौन्दर्यार्थमपि वैविध्यमपेक्षितं भवति । जात्या, धर्मेण, वयसा, जीवनवृत्त्या, समृद्ध्या वा कोऽपि न हेयः । सर्वे सम्माननीयाः । विविधेषु सामाजिककार्येषु सर्वेषां समाना उपस्थितिर्भूयादिति विचार्य सामाजिकमर्यादा पालनीया ।

अद्यतनो मनुष्यो भौतिकं सौविध्यं वाञ्छति । तस्य सौविध्यस्य प्रयोगेण सहैव सोऽत्यन्तं महत्त्वाकाङ्क्षी जायमानो वर्तते । एतेन तस्मिन् भोगलोलुपता, अहम्मानिता, स्वार्थपरायणता चेत्यादयो दुर्गुणा वृद्धिङ्गताः सन्ति । स्वार्थस्य परिपूर्तये सामाजिकीं मर्यादामुपेक्षितुं च स कदाचित् लज्जां नानुभवति । एतादृशो मनुष्यो विस्मरति यद्– 'अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः' इति । वस्तुतो भौतिकसमृद्ध्या हीनोऽपि जनो नैतिकसमृद्ध्या सम्पन्नः सन् समाजे पूजनीयो भवति । अतो भौतिकी समृद्धिश्च नीत्या समर्जनीया । नैतिकतां परित्यज्य अर्जिताया भौतिकसमृद्धेः कोऽर्थः ? नैतिकतां परित्यज्य समर्जितापि भौतिकी सम्पत् पुनर्नैतिकपतनस्यैव कारणेन पश्चात् शून्यतां गमिष्यति ।

भौतिकतां प्रति समाकृष्टस्य अद्यतनसमाजस्य कृते आध्यात्मिकताया महदावश्यकता वर्तते । भौतिकचिन्तनं मनुष्यं पुरुषार्थेन वस्तुप्राप्तिं प्रति प्रेरयति । पुरुषार्थ उचितरीत्या भवेद्, अनुचितरीत्या वा, तत्राभीष्टप्राप्तिरूपं लक्ष्यं मनसि आधाय मनुष्यः प्रयत्नरतो भवति । अभीष्टप्राप्तेरनन्तरं स स्वात्मानं सफलं मन्यते । इत्थं प्राप्तं साफल्यं सच्चारित्र्यस्य पक्षे विपक्षे वापि भवितुं शक्नोति । परन्तु आध्यात्मिकविचारेण विहितं भौतिकचिन्तनं केवलं सच्चारित्र्यं परिपोषयति । अध्यात्मपक्ष आदर्शजीवनशैल्याः समर्थको वर्तते । नीतेः परिपालनपूर्वकं पुरुषार्थं विधातुं स निर्दिशति । ततो मनुष्यस्य न्याय्यात् पथो विचलनं कदापि न जायते । अभीष्टसिद्धये कदाचिन्नीतेः परित्यागः अपेक्षितश्चेदाध्यामिको जनस्तदभीष्टसाधकं कार्यमेव परित्यजति ।




नीतिनिष्ठो जनः सदा सामाजिकीं मर्यादां परिपालयति। सोऽनुशासनस्य परिधिं कदापि नोल्लङ्घयति। नीतिपूर्णेन प्रयत्नेन कदाचिल्लक्ष्यीकृतं फलं न प्राप्यते चेदपि नीतिमान् जनः सन्मार्गाद् विचलितो न भवति। स सदा संयमितभावेन कार्यं सम्पादयति। सामाजिकस्य सद्भावस्य विनशनं यथा भवति, तथाविधं कार्यं स कदापि न करोति। एवं वित्तशक्तेश्चरित्रशक्तिरेव गरीयसीति विचार्य तादृशेनैव व्यवहारेण यो जीवनं यापयति स समाजे श्लाघनीयः, स्वजीवने सफलश्च भवति।

## शिक्षणालोकः

भौतिकसमृद्धिमर्जितवानपि अयं समाजः शान्तिं नालभत इति विषये बोधयित्वा स्थायिनीं शान्तिं प्राप्तुं चरित्रशक्तिः समर्जितव्येति पाठाधारेण छात्रा बोधनीयाः।

## अभ्यासः

## पाठानुशीलनम्

१. **पाठस्य प्रथमद्वितीयौ अनुच्छेदौ पठित्वा कक्षायां तस्य भावार्थं श्रावयत।**

२. **अधस्तनानि पदानि पदावलीर्वा उच्चार्य सामाजिकसन्दर्भे तेषामाशयं प्रकाशयत**

उचितानुचितयोर्विवेकः, मनुष्यसमुदायः, सामाजिकी मर्यादा, विविधतायामपि एकता, भौतिकसमृद्धिः, नैतिकपतनम्, सच्चारित्र्यम्, वित्तशक्तेश्चरित्रशक्तिरेव गरीयसी

३. **पाठाधर्तानां प्रदत्तानां प्रश्नानां सर्वसमुचिते उत्तरे स्वीकृतिसूचकं (✓) चिह्नं दत्त**

**(क) मनुष्याः कथं व्यवहरन्ति ?**

(अ) विवेकं परित्यज्य (आ) विवेकपूर्वकम् (इ) यथाकथञ्चित्

**(ख) पशवः कुत्र निवसन्ति ?**

(अ) समाजे (आ) एकान्ते (इ) समजे

**(ग) कीदृशे समाजे जनाः कलहं कुर्वन्ति ?**

(अ) नैतिकताहीने (आ) नैतिके (इ) सुशिक्षिते

**(घ) अद्यत्वे जनाः किं वाञ्छन्ति ?**

(अ) नैतिकसमृद्धिम् (आ) भौतिकसमृद्धिम् (इ) सरलजीवनम्

**(ङ) अध्यात्मपक्षः कीदृशजीवनशैल्याः समर्थको वर्तते ?**

(अ) सामान्यजीवनशैल्याः (आ) व्यस्तजीवनशैल्याः (इ) आदर्शजीवनशैल्याः

४. **सङ्क्षेपेण उत्तरयत**

(क) पशवः किं न जानन्ति ?

(ख) पशुसमुदायः केन नाम्ना व्यवह्रियते ?

(ग) समाजे मनुष्यद्वारा किं पालनीयं भवति ?

(घ) किं समाजस्यालङ्काराय भवति ?

(ङ) कीदृशे समाजे जनाः परस्परं कलहं कुर्वन्ति ?

(च) जनाः कथं नैव हेयाः ?

(छ) जनेषु कीदृशा दुर्गुणा वृद्धिङ्गता दृश्यन्ते ?

(ज) कीदृशो जनः समाजे पूजनीयो भवति ?

(झ) कीदृशी सम्पत् पश्चात् शून्यतां गमिष्यति ?

(ञ) अधुना समाजस्य कृते किमत्यावश्यकं दृश्यते ?

(ट) न्याय्यात् पथः को न विचलति ?

(ठ) अनुशासनस्य परिधौ को निवसति ?

(ड) वित्तशक्तिचरित्रशक्त्योः का गरीयसी ?

५. **अधस्तनं पद्यं साशयबोधं पठित्वा तस्य पाठस्य चाशयं समानं न वेति विमृशत**

रूपद्रविणहीनोऽपि यः सदाचारवान् नरः ।
श्रद्दधानोऽनसूयश्च शतं वर्षाणि जीवति ॥

६. **समुचितमर्थं विचार्य परस्परं योजयत**

| **समूहः क** | **समूहः ख** |
|---|---|
| नैतिको जनः | मनुष्यसमुदायः |
| विवेकशाली | कलहः |
| नानाविधकुसुमानि | मर्यादापालनम् |
| नैतिकताहीनः समाजः | भौतिकसमृद्धिः |
| | उद्यानस्य सौन्दर्यम् |

७. **असत्यानि वाक्यानि सत्यानि विधाय पुस्तिकायां लिखत**

(क) पशव उचितानुचितयोर्विवेकं कर्तुं शक्नुवन्ति ।

(ख) मनुष्याणां समाजे वैविध्यं न भवति ।

(ग) समाजे सर्वेषां सम्मानो नैव विधेयः ।

(घ) अद्यत्वे जना नैतिकीं समृद्धिं वाञ्छन्ति ।

(ङ) धनिको जनः पूजनीयो भवति सच्चरित्रवान् तु पूजनीयो न भवति ।

८. **अधस्तनानि पदानि प्रयुज्य सच्चरित्रस्य विषयेऽनुच्छेदमेकं रचयत**

चरित्रवान्, सज्जनः, समाजः, प्रशस्यते, दुर्जनः, निन्दितः, शान्तिः, कलहः, सहयोगः ।

९. **'वित्तशक्तेश्चरित्रशक्तिर्गरीयसी' इति विषये कक्षायां विमर्शं कुरुत ।**

१०. **अधस्तनं गद्यं पठित्वा तदनुवर्तिप्रश्नानुत्तरयत**

एकस्मिन् ग्रामे एको विद्यालय आसीत् । सुशीला तत्रत्या भाषाशिक्षिका आसीत् । सा पञ्चम्याः कक्षायाः कक्षाशिक्षिका चासीत् । अनुशासनविषये छात्राणामुद्‌बोधनम्, निरीक्षणं च कक्षाशिक्षिकाया एव दायित्वं भवति स्म । एकदा सा तस्यां कक्षायां प्रथमे कालांशे उद्‌बोधनसन्दर्भे कथितवती यद्- 'वयम् उचितमनुचितं वा किमपि कुर्मः, ईश्वरस्तत् सर्वं पश्यति । ईश्वरोऽस्माकं सर्वं कार्यं जानाति । अतो निर्जनेऽपि स्थाने अनुचितं किञ्चिन्नाचरणीयम्' इति ।

कक्षाशिक्षिकाया जन्मदिवसस्याग्रिमे दिने छात्रा अजानन् यत्- 'तस्या जन्मदिवसः श्वो भविता' इति । सा 'श्व उपहारमानेष्यामः' इति कथयतश्छात्रान् सा कथितवती- 'उपहारानानयन्तु, परं न कोऽपि जानीयात् ।' श्वस्तनदिवसे सर्वेऽपि छात्रा उपहारानानीतवन्तः परन्तु समज्ञानाम्नी एका छात्रा नानीतवती । अपरैश्छात्रैः 'उपहारं किमर्थं नानीतवती' इति पृष्टा सा उत्थाय शिक्षिकां प्रति कथितवती- 'अहम् उपहारमानेतुं विचारितवती परन्तु 'न कोऽपि जानीयात्' इति ह्यो भवती कथितवती आसीत् । ईश्वरः सर्वं जानाति, इति भवती एव शिक्षितवती । अत ईश्वरस्तु जानाति एव इति मत्वा उपहारं नानीतवती ।'

समज्ञाया उत्तरं श्रुत्वा अन्ये सर्वेऽपि छात्रा आश्चर्यं प्राप्तवन्तः । स्वप्रदत्तायाः शिक्षाया व्यवहारेऽनुशीलनं छात्राः कुर्वन्ति न वेति परीक्षणायैव शिक्षिका पूर्वस्मिन् दिने 'उपहारान् आनयन्तु परं न कोऽपि जानीयाद्' इति कथितवती आसीत् । अतः समज्ञायास्तथाविधं सतर्कमुत्तरं निशम्य सात्यन्तं प्रसन्नाभवत् । समज्ञायै सा पारितोषिकं च दत्तवती ।

**(अ) एकपदेनोत्तरयत**

(क) विद्यालयः कुत्र आसीत् ?

(ख) का उपहारं नानीतवती ?

**(आ) एकवाक्येनोत्तरयत**

(क) सुशीला का आसीत् ?

(ख) कोऽस्माकं सर्वं कार्यं जानाति ?

(ग) समज्ञा किं मत्वा उपहारं नानीतवती ?

(घ) कक्षाशिक्षिका कस्यै पारितोषिकं दत्तवती ?

**(ङ) उदाहरणानुसारेण रिक्तस्थानं पूरयत**

| **कथनानि** | | |
|---|---|---|
| १. अनुचितं किञ्चित् नाचरणीयम् । | सुशीला | छात्रान् प्रति |
| २. श्व उपहारम् आनेष्यामः । | ........ | ................ |
| ३. उपहारं किमर्थं नानीतवती ? | ........ | ................ |
| ४. ईश्वरः सर्वं जानाति, इति भवती एव शिक्षितवती । | ........ | ................ |
| ५. उपहारान् आनयन्तु परं न कोऽपि जानीयात् । | ........ | ................ |

**११. अधस्तनौ श्लोकौ पठित्वा तदनुवर्तिप्रश्नानुत्तरयत**

मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम् ।

मनस्यन्यद् वचस्यन्यत् कर्मण्यन्यद् दुरात्मनाम् ॥

दुराचारो हि पुरुषो लोके भवति निन्दितः ।

दुःखभागी च सततं व्याधितोऽल्पायुरेव च ॥

सज्जनाः यथा विचारयन्ति तथा वदन्ति व्यवहरन्ति च । दुर्जनाश्च मनस्यन्यद् विचारयन्ति, अन्यदेव वदन्ति, अन्यथैव च कर्माणि कुर्वन्ति । तादृशा दुर्जना लोके निन्दिता भवन्ति । स्वस्य दुष्कर्मणा ते दुःखं प्राप्नुवन्ति । व्याधिताः भवन्ति । अत एव ते अल्पायुषोऽपि भवन्ति ।

(क) महात्मनां व्यवहारः कीदृशो भवति ?

(ख) दुरात्मानः किं कुर्वन्ति ?

(ग) लोके दुराचारिणां काऽवस्था भवति ?

(घ) दुराचारस्य त्रीणि फलानि लिखत ।

(ङ) सज्जनानां दुर्जनानां च पार्थक्यं दर्शयत ।

१२. **अधस्तनपद्यमनुसृत्य महतां व्यवहारं वर्णयत**

उदये सविता रक्तो रक्तश्चास्तमये तथा ।
सम्पत्तौ च विपत्तौ च महतामेकरूपता ॥

१३. **अधस्तनस्य पद्यस्य भावार्थं कक्षायां श्रावयत**

सज्जनस्य हृदयं नवनीतं यद् वदन्ति कवयस्तदलीकम् ।
अन्यदेहविलसत्परितापात् सज्जनो द्रवति नो नवनीतम् ॥

## व्यवहारानुशीलनम्

१. **सच्चिारित्र्यं परिपाल्य कृत उद्यमः कथं फलदायी भवतीति विषये स्वानुभवं कक्षायां श्रावयत ।**

२. **'अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः' इत्यस्याशयविषये कक्षायां विमृश्य समाजस्य तथाविधमुदाहरणं चान्विष्य कक्षायां श्रावयत । तस्मादुदाहरणप्रसङ्गाच्च युष्माभिः कः सन्देशो गृहीत ? तच्च कक्षायां कथयत ।**

३. **मनुष्यस्य विवेकशीलता कीदृशे चारित्रिकव्यवहारे समाश्रिता वर्तते ? इति विषये पक्षं विपक्षं च उद्भाव्य परिचर्चां कुरुत ।**

४. **वित्तबलेन किं किं कर्तुं शक्यते ? चरित्रबलेन च केषां लाभो जायते ? इति कर्गजपट्टयोः तालिके निर्माय कक्षायां सूचनपट्टे, गृहस्य स्वाध्ययनकक्षे भित्तौ च संयोजयत ।**

५. **समुचितविकल्पे (✓) चिह्नं दर्शयत**

(अ) **प्रतिवेशिनं गृहमागतं दृष्ट्वा किं कुरुषे ?**

(क) गृहाभ्यन्तरं गत्वा निवसामि ।

(ख) तमपश्यन्निव वसामि ।

(ग) स्वागतं व्याहरामि, कुशलं च पृच्छामि ।

(घ) मातरमाहूय श्रावयामि ।

२. **मार्गे कञ्चन वृद्धं स्वजनं दृष्ट्वा किं कुरुषे ?**

(क) तस्य तिरस्कारं करोमि ।

(ख) तूष्णीं वसामि ।

(ग) तं प्रणमामि, यथोचितां सेवां करोमि ।

(घ) दूरत एव पलाये ।

३. **मार्गेऽवकरान् दृष्ट्वा किं कुरुषे ?**

(क) तत्रान्यानपि अवकरान् क्षिपामि ।

(ख) अवकरान् मार्गस्य पार्श्वे क्षिपामि ।

(ग) अवकरं स्वस्य मञ्जूषायां स्थापयामि ।

(घ) तान् सङ्गृह्य अवकरपात्रे क्षिपामि ।

४. **कस्मिन्नपि समारोहे गत्वा किं करोषि ?**

(क) मित्रैः सह मिलित्वा कोलाहलं करोमि ।

(ख) मिष्टान्नभोजनं कृत्वा गृहं प्रत्यावर्ते ।

(ग) मान्यानामादरं कृत्वा, शान्तः सन् निवसामि ।

(घ) बालानेकत्र कृत्वा तेषामुपहासं करोमि ।

५. **मान्यानां वचनं श्रुत्वा किं करोमि ?**

(क) मननं कृत्वा तेषां व्यवहारे उपयोगं करोमि ।

(ख) पुस्तिकायां लेखित्वा स्थापयामि ।

(ग) यथाशीघ्रं विस्मरामि ।

(घ) तेषां वचनानां मननं कृत्वा व्यवहारे उपयोगं करोमि ।

# सज्जनप्रशंसा

उपकारिषु यः साधुः साधुत्वे तस्य को गुणः ।
अपकारिषु यः साधुः स साधुः सद्भिरुच्यते ॥१॥
महान्त एव महतामर्थं साधयितुं क्षमाः ।
ऋते समुद्रादन्यः को बिभर्ति वडवानलम् ॥२॥
मृद्घट इव सुखभेद्यो दुःसन्धानश्च दुर्जनो भवति ।
सुजनस्तु कनकघट इव दुर्भेद्यः सुकरसन्धिश्च ॥३॥
सुहृदः स्नेहसम्पन्ना लोचनानन्ददायिनः ।
गृहे गृहवतां नित्यमागच्छन्ति महात्मनाम् ॥४॥
महाजनस्य सम्पर्कः कस्य नोन्नतिकारकः ।
पद्मपत्रस्थितं तोयं धत्ते मुक्ताफलश्रियम् ॥५॥
उपकाराच्च लोकानां निमित्तान्मृगपक्षिणाम् ।
भयाल्लोभाच्च मूर्खाणां मैत्री स्याद् दर्शनात् सताम् ॥६॥

**१**
**पदच्छेदः**

उपकारिषु, यः, साधुः, साधुत्वे, तस्य, कः, गुणः, अपकारिषु, यः, साधुः, स, साधुः, सद्भिः, उच्यते ।

**अन्वयः**

यः उपकारिषु साधुः, तस्य साधुत्वे कः गुणः, यः अपकारिषु साधुः सः सद्भिः साधुः उच्यते ।

**सरलार्थः**

यः सज्जनेषु उपकारिषु च सौजन्यं दर्शयति; सद्व्यवहारं कुरुते स तु केवलं यथोचितव्यवहारकर्ता भवति । किन्तु यो दुर्जनेषु अपकारकर्तृषु कृतघ्नेषु अपि सौजन्यं प्रदर्शयति; सद्व्यवहारं च कुरुते स एव वास्तविकः सज्जनः इति साधवः कथयन्ति ।

**२**
**पदच्छेदः**

महान्तः, एव, महताम्, अर्थम्, साधयितुम्, क्षमाः, ऋते, समुद्राद्, अन्यः, कः, बिभर्ति, वडवानलम् ।

**अन्वयः**

महान्त एव महतामर्थं साधयितुं क्षमाः (भवन्ति), समुद्राद् ऋते अन्यः को वडवानलं बिभर्ति ।

**सरलार्थः**

शक्तिमन्तो जना एव असाधारणं कार्यविशेषं साधयितुं समर्था भवन्ति । वडवानलसदृशं प्रचण्डतेजसमग्निं समुद्र एव धारयितुं शक्नोति नान्यः ।

**३**
**पदच्छेदः**

मृद्घटः, इव, सुखभेद्यः, दुःसन्धानः, च, दुर्जनः, भवति, सुजनः, तु, कनकघटः, इव, दुर्भेद्यः, सुकरसन्धिः, च ।

**अन्वयः**

दुर्जनः मृद्घट इव सुखभेद्यः दुःसन्धानः च भवति । सुजनः तु कनकघट इव दुर्भेद्यः सुकरसन्धिः च भवति ।

**सरलार्थः**

दुर्जनस्य नीतिः अस्थिरा भवति । स स्वार्थवशादुचितमनुचितं वा कर्म कर्तुं शक्नोति । एतादृशो दुर्जनः प्रलोभनेन वशीकर्तुं शक्यते । सज्जनस्तु सुवर्णकलश इव अभेद्यो भवति । कदाचन भेदे जायमानेऽपि स पुनरनुकूलो जायते ।

**४**
**पदच्छेदः**

सुहृदः, स्नेहसम्पन्नाः, लोचनानन्ददायिनः, गृहे, गृहवताम्, नित्यम्, आगच्छन्ति, महात्मनाम् ।

**अन्वयः**

लोचनानन्ददायिनः स्नेहसम्पन्नाः सुहृदः गृहवतां महात्मनां गृहे नित्यम् आगच्छन्ति ।

**सरलार्थः**

स्नेहिनां सुहृदां दर्शनं नयनानन्ददायकं भवति । तादृशाः प्रीतिवर्षिणः सखायः सदा सज्जनानां गृहस्थानामेव गृहेषु आगच्छन्ति ।

**५**
**पदच्छेदः**

महाजनस्य, सम्पर्कः, कस्य, न, उन्नतिकारकः, पद्मपत्रस्थितम्, तोयम्, धत्ते, मुक्ताफलश्रियम् ।

**अन्वयः**

महाजनस्य सम्पर्कः कस्य उन्नतिकारकः न भवति, पद्मपत्रस्थितं तोयं मुक्ताफलश्रियं धत्ते ।

**सरलार्थः**

अधमवस्तु अपि उत्तमवस्तुनः सङ्गादुत्तमं वैशिष्ट्यं प्राप्नोति । यथा जलविन्दुः कमलपत्रे स्थितोऽस्ति चेत् स मुक्ताफलमिवाऽनुपमं सौन्दर्यं प्राप्नोति । एवमेव अधमजना यदि महतां जनानां सङ्गं कुर्वन्ति चेत् तेषामपि उन्नतिरेव भवति । अतः सर्वदा उत्तमजनेषु एव सङ्गतिः कर्तव्या ।

**६**
**पदच्छेदः**

उपकारकात्, च, लोकानाम्, निमित्तात्, मृगपक्षिणाम्, भयात्, लोभात्, च, मूर्खाणाम्, मैत्री, स्यात्, दर्शनात्, सताम् ।

### अन्वयः

उपकारात् लोकानाम्; निमित्तात् मृगपक्षिणाम्; भयाद् लोभाच्च मूर्खाणाम्; दर्शनात् सतां मैत्री स्यात् ।

### सरलार्थः

सामान्यजना उपकारेण मित्राणि भवन्ति । मृगाः पशवस्तु निमित्तवशात् मैत्रीं कुर्वन्ति । मूर्खा भयाद् लोभाच्च वशवर्तिनो जायन्ते । सज्जनास्तु केवलं दर्शनमात्रेण मित्रतां सम्पादयन्ति ।

## अभ्यासः

### पाठानुशीलनम्

१. **शुद्धमुच्चारयत**

सद्भिरुच्यते, समुद्रादन्यः, लोचनानन्ददायिनः, दुःसन्धानः, पद्मपत्रस्थितम्, भयाल्लोभाच्च

२. **पाठस्थानां श्लोकानां सस्वरवाचनं कुरुत ।**

३. **पाठस्थं तृतीयं पद्यं शिक्षकमुखात् श्रुत्वा लिखत ।**

४. **सङ्क्षेपेण उत्तरयत**

(क) सद्भिः कः साधुरुच्यते ?

(ख) महान्तो जनाः किं कर्तुं शक्नुवन्ति ?

(ग) दुर्जनस्य सज्जनस्य च स्वभावे को भेदः ?

(घ) स्नेहिनः सुहृदः कस्य गृहे नित्यमागच्छन्ति ?

(ङ) महाजनस्य सङ्गः कीदृशो भवति ?

(च) मूर्खाः कथं वशवर्तिनो भवन्ति ?

## ५. उचितपदेन रिक्तस्थानं पूरयत

सुहृदः, समुद्रः, दुर्जनेषु, सर्वान्, मृद्घटः

(क) साधवः ............... अपि सद्व्यवहारं कुर्वन्ति ।

(ख) ................ अतितेजसमपि वडवानलं धारयति ।

(ग) ............ इव दुर्जनो भवति ।

(घ) सतां सङ्गतिः .................. उपकरोति ।

(ङ) ............. लोचनानन्ददायिनो भवन्ति ।

## ६. परस्परं मेलयत

| | |
|---|---|
| लोकानां मैत्री | दर्शनात् |
| मृगपक्षिणां मैत्री | उपकारात् |
| मूर्खाणां मैत्री | निमित्तात् |
| सतां मैत्री | भयात् लोभाच्च |

## ७. अधस्तनानि पदानि प्रयुज्य वाक्यानि रचयत

गुणः, सुहृदः, तोयम्, अन्यः, मृद्घटः, गृहे, मैत्री, महाजनस्य

## ८. अधः प्रस्तुतां लघुकथां पठित्वा प्रश्नानुत्तरयत

एकस्मिन् ग्रामे कश्चन कर्मठः कृषको निवसति स्म । तस्य क्षेत्राणि जलसेचनाभावात् शुष्कतां गतानि । चिन्तितः स क्षेत्रे जलसेचनाय प्रतिवेशिनः कूपं मुद्राद्वयेन क्रीतवान् । अपरेद्युः कृषकः क्षेत्रे जलसेचनाय जलान्याहर्तुं कूपमागतवान् किन्तु चतुरः प्रतिवेशी तस्मै जलानि न दत्तवान् । सोऽकथयत्, "मया कूपो विक्रितः, न तु जलम् ।" वञ्चितः कृषकः न्यायं याचयितुं राज्ञः समक्षमगच्छत् । तत्र स राज्ञे सर्वं वृत्तान्तमश्रावयत् । राजा झटिति कृषकस्य प्रतिवेशिनं राजप्रासादे न्यमन्त्रयत् । प्रतिवेशी अपि यथाशीघ्रं राज्ञो निकटं प्राप्तवान् । राजा तमपृच्छत्, "त्वमात्मना विक्रीतस्य कूपस्य जलानि कृषकाय किमर्थं नाददाः ?"

"महाराज, मया कूप एव विक्रीतः नैव तत्रस्थं जलम् । अतः कृषकस्य कूपे एवाधिकारो न जलेषु ।" बद्धाञ्जलिः प्रतिवेशी उक्तवान् ।

राजा प्रतिवेशिनश्चातुर्यं ज्ञातवान् । स आदेशबलेन कृषकाय कूपस्थं जलं दातुं समर्थ आसीत्, किन्तु तथा नैवाकरोत् । आदेशबलेन जलप्रदानं विधीयते तर्हि प्रतिवेशी 'राजा मयि अन्यायमकरोत्' इति मनुते । अतो राजा प्रतिवेशिनं प्रति अवदत्, "त्वया कूपो विक्रीतः । कृषकस्य कूपे त्वया जलानि स्थापितानि वर्तन्ते । नैतदुचितम् । अतः कृषकस्य कूपात् त्वं स्वस्य जलानि अद्यैव अवकर्ष ।" कृषकस्य वञ्चनाय प्रतिवेशिना कृतः प्रयासो निष्फलो जातः । 'अतिलोभो न कर्तव्यः' इति ज्ञातवान् प्रतिवेशी क्षमां याचमानः कृषकाय जलानि दातुं वनचबद्धोऽभवत् । कृषकोऽपि जलानि प्राप्य प्रतिदिनं क्षेत्रे जलसेचनं कर्तुमारभत ।

**(अ) एकपदेनोत्तरयत**

(क) कृषकः कियता मूल्येन कूपं क्रीतवान् ?

(ख) प्रतिवेशी कीदृश आसीत् ?

(ग) राजा कस्य चातुर्यं ज्ञातवान् ?

(घ) प्रतिवेशिनः मते कृषकस्य कुत्र अधिकारो नास्ति ?

**(आ) पूर्णवाक्येनोत्तरयत**

(क) कृषकस्य चिन्तायाः कारणं किम् ?

(ख) न्यायप्राप्तये कृषकः कुत्र गतः ?

(ग) कस्य प्रयासो विफलः सञ्जातः ?

(घ) कथायाः सन्देशः कः ?

९. **अधस्तनं पद्यमाधृत्य शोकस्य परिणामः इति विषये एकमनुच्छेदं लिखत**

शोको नाशयते धैर्यं शोको नाशयते श्रुतम् ।

शोको नाशयते सर्वं नास्ति शोकसमो रिपुः ॥

१०. **सज्जनानां स्वभावविषये पाठमनुसृत्य नातिदीर्घमनुच्छेदं लिखत ।**

**११. सरलार्थं विलिख्य कक्षायां श्रावयत**

दरिद्रता धीरतया विराजते
कुरूपता शीलतया विराजते ।
कुभोजनं चोष्णतया विराजते
कुवस्त्रता शुभ्रतया विराजते ॥

**१२. पद्यं पठित्वा प्रश्नानुत्तरत**

नात्यन्तं सरलैर्भाव्यं गत्वा पश्य वनस्थलीम् ।
छिद्यन्ते सरला वृक्षाः कुब्जास्तिष्ठन्ति सर्वदा ॥

(क) अस्माभिः कीदृशैर्न भाव्यम् ?

(ख) कीदृशा वृक्षाः छिद्यन्ते ?

(ग) कुत्र कुब्जाः वृक्षाः सर्वदा दृश्यन्ते ?

(घ) अतिसरलतायां को दोषः ?

**१३. अधस्तनानि पदानि प्रयुज्य चित्रवर्णनं कुरुत**

निकटे, निर्मलजला, पर्वतः, सेतुः, यानानि, कृषकाः, वातावरणम्, विकसितः



## व्यवहारानुशीलनम्

१. सन्मित्रस्य स्वगृहे आगमनं सुखाय भवति इति कथनं स्वानुभवेन स्पष्टयत ।

२. सज्जनः कनकघट इव सुकरसन्धिः दुर्जनश्च मृद्घट इव दुःसन्धानो भवतीति कथने तव विचारः कः ? लिखत ।

३. महाजनस्य सम्पर्कः कस्य नोन्नतिकारकः इति प्रोक्तम् । महतां जनानां सम्पर्केण कथमुन्नतिः सम्भवति । स्वमतं प्रकटयत ।

४. युष्मासु सज्जनगुणाः सन्ति न वा ? सन्ति चेत् कथम् ?

५. निर्दिष्टप्रश्नानां समुचिते उत्तरे (✓) चिह्नम् अङ्कयत

(क) त्वं कं 'वास्तविकः साधुः' इति कथयसि ?

(अ) उपकारिषु साधुः (आ) अपकारिषु साधुः

(इ) अपकारिषु अपि साधुः (ई) स्वजनेषु साधुः

(ख) तव मते सज्जनः कीदृशो भवति ?

(अ) दुर्भेद्यः दुष्करसन्धिश्च (आ) सुखभेद्यः सुकरसन्धिश्च

(इ) अभेद्यः दुष्करसन्धिश्च (ई) दुर्भेद्यः सुकरसन्धिश्च

(ग) 'कैः सह कदापि सङ्गतिः न कर्तव्या ?' इति प्रश्नस्योत्तरं स्वतर्कानुसारेण परिचिनुत ।

(अ) उत्तमजनैः सह (आ) अधमजनैः सह

(इ) निर्धनैः सह (ई) ग्रामीणैः सह

# जीवनस्य सौन्दर्यम्

(द्वौ बालकौ गृहवाटिकायां चत्वरे उषित्वा संलापं कुरुतः ।)

**शुभेक्षणः** मित्र ! गतशनिवासरे त्वं कुत्र गत आसीः ?

**समीरणः** तदा ? तदा अहं मम अग्रजया सह बौद्धविहारं गत आसम् ।

**शुभेक्षेणः** किमर्थं तत्र तव गमनम् अभवत् ?

**समीरणः** विशेषस्तु कोऽपि नासीत् । अग्रजा मां नीतवती । अत एवागच्छम्, परन्तु तत्र गमनेन लाभ एव सञ्जातः ।

**शुभेक्षणः** कस्तावान् लाभः ? श्रावयसि वा ?



**समीरणः** तत्र भिक्षुरावाभ्यां पञ्चशीलस्य विषये प्रवचनमदात् ।

**शुभेक्षणः** किं नाम शीलम् ? चरित्रम् ?

**समीरणः** न न, नहि चरित्रं किन्तु चरित्ररक्षणाय पालनीयो नियमः । अस्माकं मनसो वचसः शरीराच्च न कस्मिँश्चिदपि दुष्प्रभावः समुद्भवेदिति धिया पालनीया नियमा एव शीलपदेन गृह्यन्ते ।

**शुभेक्षणः** कानि तर्हि पञ्च शीलानि ?

**समीरणः** प्राणिहिंसाया अनाचरणं प्रथमं शीलं वर्तते । तथैव चौर्यकार्यस्य व्यभिचारस्य असत्यभाषणस्य मदिरादिपानस्य चानाचरणम् अन्यानि चत्वारि शीलानि सन्ति ।

**शुभेक्षणः** एते तु सर्वेषां कृते उपयोगिनो नियमाः सन्ति । वस्तुतः प्राणिहिंसा हेया एव । यतो हि, न कोऽपि प्राणी मर्तुमिच्छति । अतो मानवानामेव न, अपितु कीटानां पशुपक्षिणां च हिंसा न कर्तव्या इति नियमस्तु शोभन एव । वेदोऽपि एतदेव उद्घोषयति- 'मा हिंस्यात् सर्वा भूतानि' इति । अहिंसाव्रतस्य आचरणेन तु मिथो मैत्री भावना उदेति ।

**समीरणः** आम्, सत्यं कथितं त्वया । पुनश्चौर्यकर्मणोऽनाचरणमपि तु शोभनम् । चौर्यं विहाय वस्तूनां परस्परं विनिमयेन कार्यं साध्यते चेत् कार्यमपि सिध्यति, असत् कर्म च न भवति । आलस्यवशात् स्वकार्यस्य समयेऽपूरणमपि चौर्यकर्मैव, तत् कार्यचौर्यं मन्यते । अतो निष्क्रियतां परित्यज्य यथाकालं कार्यसमाप्तिरपि चौर्यकर्मणोऽनाचरणम् इति तत्र भिक्षुणा प्रोक्तम् ।

**शुभेक्षणः** समीरण ! व्यभिचारशब्दस्य कोऽर्थः ?

**समीरणः** 'दुर्व्यवहारः' इति व्यभिचारशब्दस्य अर्थः । सर्वेऽपि अन्योन्यं मित्रतापूर्णं सम्बन्धं वाञ्छन्ति । अतोऽस्माभिः कदापि केनचन जनेन सहापि दुर्व्यवहारो न कर्तव्यः । पतिपत्न्योर्मध्ये च पारस्परिकीं भावनां बुद्ध्वा आचरणीयं भवति । एतेन परिवारः समाजश्च स्वस्थः सुन्दरश्च भवति ।

**शुभेक्षणः** असत्यभाषणस्यानाचरणं चतुर्थं शीलं वा ? असत्यभाषणेन सत्यस्य प्रकाशनानन्तरं पारस्परिकः कलहो जायते । अतः सर्वदा सत्यमेव वक्तव्यम् । 'सत्यं वद' इति

तु वैदिक उपदेश एवास्ति । एतस्य सत्यभाषणस्याचरणमेव चतुर्थस्य शीलस्य पालनमस्ति । सत्यं वा ?

**समीरणः** आम्, सत्यम् । तर्हि पञ्चमस्य शीलस्य विषयेऽपि वक्तुं शक्नोसि किम् ?

**शुभेक्षणः** अवश्यं शक्नोमि । मदिरापानेनास्माकं शारीरिकं स्वास्थ्यम्, सामाजिकी प्रतिष्ठा च नश्यति । मदिरोन्मत्तो जन आत्मनियन्त्रणं परिहाय यथातथं वक्ति व्यवहरति च । तेन स स्वपरिवारात् सामाजिकेभ्यश्च बहिष्कृतो भवति । मदिरया सह द्यूतक्रीडादिषु च निरतः सन् स पथभ्रष्टो भवितुं शक्नोति । अतो मदिरापानस्यानाचरणं सर्वेषां कृते सुखदं शान्तिदञ्च भवति ।

**समीरणः** पञ्चमं शीलमपि सम्यग् व्याख्यातं त्वया । यावत् सुष्ठु पञ्च शीलानि परिपाल्यन्ते, तावदेव अस्माकं मनो वचः शरीरञ्च शुद्धं भवति ।

**शुभेक्षणः** पञ्चशीलपालनस्य लाभविषये अहमपि किञ्चित् कथयामि ।

**समीरणः** कथय कथय !

**शुभेक्षणः** शीलपालनेन जनः शरीरेण स्वस्थः, वचसा शुद्धः, मनसा शान्तश्च भवति । शीलपालके सर्वे स्निह्यन्ति । स सर्वेषां प्रियपात्रो भवति । अतः पञ्चशीलानां पालनमतीव लाभकरं कार्यं वर्तते । वेदोपदिष्टानां बुद्धोपदिष्टानां चैतेषां पालनं व्यावहारिकजीवनस्य सौन्दर्यमेव ।

**समीरणः** शोभनम् । भिक्षोः प्रवचनमश्रुत्वापि त्वं पञ्चशीलानां विषये सम्यगजानाः । अस्तु तावद्, गृहं गच्छामि, पुनर्मिलाव ।

**शुभेक्षणः** अस्तु, पुनर्मिलाव ।

## शिक्षणालोकः

पाठस्याधारेण विद्यार्थिनः पञ्चशीलानां विषये सम्यग् बोधनीयाः । दैनिकजीवने कथं व्यवहर्तव्यमिति शिक्षयित्वा तथैवाचरणाय ते प्रेरणीयाश्च । सति सम्भवे विद्यार्थिनो निकटस्थं बौद्धविहारं बौद्धशिक्षालयं च नीत्वा पञ्चशीलदेशना दर्शनीया ।

# अभ्यासः

## पाठानुशीलनम्

१. **सङ्क्षेपेण उत्तरयत**

(क) समीरणः शनिवासरे कुत्र गत आसीत् ?

(ख) भिक्षुः कस्मिन् विषये प्रवचनमदात् ?

(ग) शीलपदेन के नियमा गृह्यन्ते ?

(घ) प्रथमं शीलं किम् ?

(ङ) का हेयाऽस्ति ?

(च) वेदः किमुद्घोषयति ?

(छ) केन मैत्री भावना उदेति ?

(ज) को वैदिक उपदेशः ?

२. **उदाहरणानुसारेण वक्तुर्नाम लिखत**

यथा– सर्वदा सत्यमेव वक्तव्यम् । - **शुभेक्षणः**

(क) पञ्चशीलपालनस्य लाभविषयेऽहमपि किञ्चित् कथयामि ।

(ख) अस्तु तावत्, गृहं गच्छामि, पुनर्मिलाव ।

(ग) प्राणिहिंसाया अनाचरणं प्रथमं शीलं वर्तते ।

(घ) गतशनिवासरे त्वं कुत्र गत आसीः ?

(ङ) भिक्षुरावाभ्यां पञ्चशीलस्य विषये प्रवचनमदात् ।

(च) तत्र गमनेन लाभ एव सञ्जातः ।

३. **पाठस्थं संवादं साभिनयं पठत ।**

४. **शुभेक्षणस्य पञ्चमशीलविषयकं कथनमभ्यासपुस्तिकायामनुलिखत ।**

५. **पाठाधारेण उचितम् ☑ अनुचितं ☒ च कथनं निर्दिशत**

(क) मदिरोन्मत्तो जन आत्मनियन्त्रणं परिजहाति । ☐

(ख) शीलपालके सर्वे स्निह्यन्ति । ☐

(ग) समीरणेन पञ्चमं शीलं सम्यग् व्याख्यातम् । ☐

(घ) पञ्चशीलस्य पालनमतीव लाभकरम् । ☐

(ङ) 'दुर्व्यवहारः' इति व्यभिचारशब्दस्यार्थः । ☐

(च) आलस्येन स्वकार्यस्य समयेऽपूरणं नहि चौर्यकर्म । ☐

(छ) चरित्ररक्षणाय पालनीयो नियम एव शीलम् । ☐

(ज) वस्तुतः प्राणिहिंसा हेयाऽस्ति । ☐

६. **विशेष्य-विशेषणपदानि परस्परं मेलयत**

| | |
|---|---|
| नियमाः | मैत्री |
| शीलम् | असत् |
| प्राणिहिंसा | पारस्परिकः |
| भावना | उपयोगिनः |
| कर्म | प्रथमम् |
| कलहः | हेया |
| शरीरम् | लाभकरम् |
| कार्यम् | शुद्धम् |

७. **पदानि संशोध्य लिखत**

र्दुव्यवहारः, अन्योऽन्यम्, आचरनीयम्, उत्घोषयति, अहींसा, सोभनम्, कार्यसमाप्ती, व्यभीचारः, असत्यभाशणम्, सन्जातः, प्राणि, विषेशः नीयन्त्रणम्, वैदीकः, द्युतक्रिडा, व्यवहारिकः ।

८. **पाठस्य सारांशं कथयत ।**

## ९. उपसर्गान् आधारपदानि च पृथक् कुरुत

**यथा– विशेषः** = वि + शेषः

(क) प्रवचनम्　(ख) उपयोगिनः　(ग) उपदेशः　(घ) आचरणम्

(ङ) नियन्त्रणम्　(च) दुर्व्यवहारः　(छ) सम्बन्धः　(ज) समीरणः

## १०. पदविच्छेदं भावयन् सम्यगुच्चारयत

| | | | |
|---|---|---|---|
| १. | अहिंसाव्रतस्य | २. | चौर्यकर्मणः |
| ३. | आलस्यवशात् | ४. | मदिरापानस्य |
| ५. | स्वकार्यस्य | ६. | व्यभिचारशब्दस्य |
| ७. | असत्यभाषणेन | ८. | पञ्चशीलपालनस्य |
| ९. | लाभकरम् | १०. | वेदोपदिष्टानाम् |
| ११. | पुनर्मिलाव | १२. | चरित्ररक्षणाय |
| १३. | शीलपदेन | १४. | प्राणिहिंसा |

## ११. अधो लिखितं गद्यांशं संवादे परिवर्तयत

अनिलसुशीलौ सहोदरौ स्तः। अनिलो दशवर्षीयो वर्तते। सुशीलोऽष्टवर्षीयो विद्यते। विद्यालयस्यावकाशदिने तौ मातुलगृहं गच्छतः। तत्र पूजा वर्तते। मान्यजनाः टीकां परिधाप्य ताभ्यामाशीर्वचांसि दक्षिणाश्च ददति। परेद्युस्तौ विद्यालयं गच्छतः। मार्गे आपणो वर्तते। सुशीलोऽनिलं क्षणं प्रतीक्षितुं कथयति। सुशीलः स्ववित्तेन चोष्यव्यञ्जनं क्रेतुमिच्छति। स तद् दातुमापणिकं निवेदयति। अनिलः सुशीलं चोष्यव्यञ्जनस्य क्रयणान्निवारयति। सुशीलोऽनिलाय क्रुद्धयति। सुशीलायानिलस्य निषेधनं न रोचते। अनिलः सुशीलं पर्युषितस्य चोष्यव्यञ्जनस्य हानिं बोधयति। अनिलः सुशीलं तादृशैः पदार्थैर्जायमानस्य दन्त-हृदयोदरविकारस्य सम्भावनां च वर्णयति। स रक्तविकारस्य कारणमपि तादृशमेव पदार्थं निश्चिनोति। सुशीलो भ्रातुः कथनं साधु बुद्ध्यति। स एतद् हितवचनं मनुते। सुशीलश्चोष्यव्यञ्जनं विहाय लेखनीं दातुमापणिकं निवेदयति। आपणिकस्तथैव करोति। अनिलश्च स्ववित्तेन अभ्यासपुस्तिकां दातुमापणिकमनुरुणद्धि। आपणिकस्तथैव कुरुते। आपणिको द्वौ एव भ्रातरौ बुद्धिमन्तौ इति कथयति।

## व्यवहारानुशीलनम्

१. **युष्माभिः प्रतिदिनं क्रियमाणानि कार्याणि पञ्चशीलसम्मतानि तद्विरुद्धानि वा वर्तन्ते ? कक्षायां परामृशत ।**

२. **पाठे समुद्धृतानि वेदवचनानि कर्गजपट्टे अर्थसहितानि स्थूलाक्षरैर्विलिख्य कक्षाकोष्ठस्य भित्तौ संयोजयत ।**

३. **पञ्चशीलस्य विषये लिखित्वा एकां सारिणीं निर्माय कक्षायां स्थापयत ।**

४. **पाठस्य पठनानन्तरं स्वजीवने किं किं परिवर्तनं करणीयमिति विषयेऽधस्तन्यां तालिकायां ☑ वा ☒ सङ्केतचिह्नं प्रदाय स्वमूल्याङ्कनं कुरुत**

| क्र.सं. | कार्याणि | सङ्केतचिह्नानि |
|---|---|---|
| १. | अहमसत्यं न वच्मि । | |
| २. | अहं मदिरां न पिबामि । | |
| ३. | अहं व्यभिचारकार्यं न करोमि । | |
| ४. | अहमहिंसाव्रतं पालयामि । | |
| ५. | अहं मांसभक्षणं न करोमि । | |
| ६. | अहं कार्ये आलस्यं त्यजामि । | |
| ७. | अहं द्यूतक्रीडां कदापि न करोमि । | |
| ८. | अहं दीनानां साहाय्यं करोमि । | |

५. **स्वव्यवहारानुसारेण स्वानुभवेन वा स्वमतं प्रस्तुत**

(क) अहमनुशासनं पालयामि ।
(ख) द्वेषः, निन्दा, ईर्ष्या च जीवने सुखं जनयन्ति ।
(ग) आलस्यम्, दुर्व्यसनं चास्माकं प्रतिष्ठां वर्धयत ।
(घ) मम परिवारो दीनेभ्यः सहायतां करोति ।
(ङ) सौजन्यं सौमनस्यं च जीवनस्य सौन्दर्यं तनुतः ।
(च) कलहो वीरत्वं सूचयति ।
(छ) अहं सुहृदामुपदेशं न पालयामि ।

# छात्रगुणः

**काकचेष्टो बकध्यानः श्वाननिद्रस्तथैव च ।**
**अल्पाहारी गृहत्यागी विद्यार्थी पञ्चलक्षणः ॥ १ ॥**
**सुखार्थी चेत् त्यजेद् विद्यां विद्यार्थी चेत् त्यजेत् सुखम् ।**
**सुखार्थिनः कुतो विद्या विद्यार्थिनः कुतः सुखम् ॥ २ ॥**
**अलसस्य कुतो विद्या अविद्यस्य कुतो धनम् ।**
**अधनस्य कुतो मित्रममित्रस्य कुतः सुखम् ॥ ३ ॥**
**सदा करोति विद्यार्थी सहनं सुखदुःखयोः ।**
**सुखं भवतु वा दुःखं विद्याभ्यासं करोति सः ॥ ४ ॥**
**अभिवादनशीलस्य नित्यं वृद्धोपसेविनः ।**
**चत्वारि तस्य वर्धन्ते आयुर्विद्या यशो बलम् ॥ ५ ॥**
**यदि सत्सङ्गतिरतो भविष्यसि भविष्यसि ।**
**अथ दुर्जनसंसर्गे पतिष्यसि पतिष्यसि ॥ ६ ॥**

**१**
**पदच्छेदः**

काकचेष्टः, बकध्यानः, श्वाननिद्रः, तथा, एव, च, अल्पाहारी, गृहत्यागी, विद्यार्थी, पञ्चलक्षणः ।

### अन्वयः

काकचेष्टो बकध्यानः श्वाननिद्रः तथैव अल्पाहारी गृहत्यागी च (इति) विद्यार्थी पञ्चलक्षणः (भवति) ।

**सरलार्थः**

विद्यार्जनाय कृतसङ्कल्पे विद्यार्थिनि केचन गुणा अपेक्षन्ते । विद्यार्थिनश्चेष्टा काकस्य इव भवेत् अर्थात् विद्यार्थिना सदैव चतुरेण, जिज्ञासुना च भवितव्यम् । एवं तस्य ध्यानं बकस्य इव भवेत् अर्थात् स्वकीये कार्ये एकाग्रतया विना विद्यार्थी साफल्यं न लभते । तथैव तस्य निद्रा कुक्कुरस्य इव स्वल्पा भवेत् । एवमेव विद्यार्थिनाऽल्पाहारः करणीयः, यतोऽधिकभोजनेन गरिष्ठभोजनेन च स्वास्थ्ये, पठने च बाधा उत्पद्यते । एवञ्च विद्यार्थिना विद्यार्जनकाले स्वकीयं गृहं त्यक्त्वा गुरुकुलादिषु स्थातव्यम्, यतः स मातापित्रोरन्येषाञ्च कुटुम्बकानां समीपस्थः सन् विद्यार्जने एकाग्रतामानेतुं न पारयति । अतो विद्यार्थी उक्तैः पञ्चभिर्लक्षणैर्युक्तो भवेत् ।

**२.**
**पदच्छेदः**

सुखार्थी, चेत्, त्यजेत्, विद्याम्, विद्यार्थी, चेत्, त्यजेत्, सुखम्, सुखार्थिनः, कुतः, विद्या, विद्यार्थिनः, कुतः, सुखम् ।

**अन्वयः**

सुखार्थी चेद् विद्यां त्यजेत्, विद्यार्थी चेत् सुखं त्यजेत् । (यतः) सुखार्थिनो विद्या कुतः (भवति) ? विद्यार्थिनः (च) सुखं कुतः (भवति) ?

**सरलार्थः**

बहवो जनाः सुखेन जीवितुमिच्छन्ति, परिश्रमं कर्तुं नेच्छन्ति । एतादृशाः सुखार्थिनो जना विद्यामर्जितुं नैव प्रभवन्ति । विद्याया आर्जनं सम्पादनं वा केवलमेकाग्रतया विधीयमानेन कठोरेण परिश्रमेण, सततेनाभ्यासेन च सम्भवति । तेन विद्यार्थिनः सुखभोगाद् वञ्चिता भवन्ति । अतो विद्यां प्राप्तुमिच्छद्भिर्जनैः सुखं त्यक्तव्यं भवति, सुखं भोक्तुमिच्छद्भिश्च जनैर्विद्या त्यक्तव्या एव ।

**३.**
**पदच्छेदः**

अलसस्य, कुतः, विद्या, अविद्यस्य, कुतः, धनम्, अधनस्य, कुतः मित्रम्, अमित्रस्य, कुतः, सुखम् ।

**अन्वयः**

अलसस्य विद्या कुतः ? अविद्यस्य धनं कुतः ? अधनस्य मित्रं कुतः ? अमित्रस्य सुखं (च) कुतः ?

**सरलार्थः**

आलस्ययुक्तो जनो विद्याया अधिकारी न भवति, यतः परिश्रमेण विना विद्यार्जनमसम्भवं भवति। विद्याविहीनस्य जनस्य प्रायेण धनमपि न भवति। यस्य पार्श्वे धनं न भवति, तस्य मित्राणि अपि दुर्लभानि भवन्ति। यदि मित्राणि न भवन्ति तर्हि तस्य सुखमपि न भवति। अतः सुखस्य मूलं विद्या एवास्ति।

**४. पदच्छेदः**

सदा, करोति, विद्यार्थी, सहनम्, सुखदुःखयोः, सुखम्, भवतु, वा, दुःखम्, विद्याभ्यासम्, करोति, सः।

**अन्वयः**

विद्यार्थी सदा सुख-दुःखयोः सहनं करोति। (अतः) स सुखं दुःखं वा भवतु, सदा विद्याभ्यासं करोति।

**सरलार्थः**

विद्यार्थी सुखस्य दुःखस्य च सदैव स्वाभाविकरीत्या सहनं करोतु। सुखोन्मादेन दुःखभयेन वा विद्यार्जनाद् विरमणं विद्यार्थिनः कृते न शोभते। अतः सुखं दुःखं वा किमपि भवतु, स सदैव विद्याया अभ्यासं नैरन्तर्येण करोतु। विद्यार्थिना विद्याभ्यासात् कदापि विमुखेन न भवितव्यम्।

**५. पदच्छेदः**

अभिवादनशीलस्य, नित्यम्, वृद्धोपसेविनः, चत्वारि, तस्य, वर्धन्ते, आयुः, विद्या, यशः, बलम्।

## अन्वयः

अभिवादनशीलस्य नित्यं वृद्धोपसेविनः, तस्य आयुः, विद्या, यशः, बलं (च इति) चत्वारि वर्धन्ते ।

**सरलार्थः**

यः (विद्यार्थी) विनम्रोऽस्ति, वृद्धजनानां सेवां करोति, ज्येष्ठानामाज्ञापालनञ्च करोति, तस्य आयुः, विद्या, यशः, बलञ्चेति चत्वारि वर्धन्ते । अतो वृद्धजनानां सेवा नित्यं करणीया । विद्यार्थिभिः सदा विनम्रैर्भाव्यम् ।

**६.**
**पदच्छेदः**

यदि, सत्सङ्गतिरतः, भविष्यसि, भविष्यसि, अथ, दुर्जनसंसर्गे, पतिष्यसि, पतिष्यसि ।

## अन्वयः

यदि सत्सङ्गतिरतो भविष्यसि (तदा श्रेष्ठः) भविष्यसि । अथ दुर्जनसंसर्गे पतिष्यसि (तदा कुमार्गे) पतिष्यसि ।

**सरलार्थः**

यो जनः श्रेष्ठजनेन सह सङ्गतिं करोति, तस्य जीवनमुन्नतं भवति । यश्च जनो दुर्जनेन सह सङ्गतिं करोति, स सदा अधमः (नीचः) भविष्यति । ज्येष्ठानाम्, श्रेष्ठानाम्, महात्मनाम्, विदुषां वा सङ्गत्या जीवने साफल्यं लभ्यते । सज्जनसहवासेन जनः स्वयमपि सज्जनो भविष्यति, प्रत्येकं कार्ये सफलश्च भविष्यति । यो च जनो दुर्जनैः, दुष्टैः, पतितजनैर्वा सह वासं करोति, सोऽपि दुर्जनः, दुष्टः, पतितो वा भविष्यति । तस्य पतनञ्च निश्चितं भविष्यति । अत एव विद्यार्थिभिर्दुर्जनानां सङ्गतिर्न कदापि करणीया ।

## शिक्षणालोकः

पाठस्थानां तदतिरिक्तानाञ्च विषयाणामाधारेण विद्यार्थिलक्षणानां परिचयमवाप्य स्वकीये व्यवहारे तदनुशीलनायच्छात्रा भूयो भूयः प्रेरणीयाः । सुखदुःखयोश्चिन्तनं वर्जयित्वा एकाग्रतया विद्याभ्यासे प्रवर्तनाय, आत्मनि परिष्कृतगुणानां विकासाय च शिक्षकेण विद्यार्थिनां मार्गदर्शनं विधेयम् ।

# अभ्यासः

## पाठानुशीलनम्

१. **अधस्तनानि पदानि शुद्धमुच्चार्य तेषामर्थापनं कुरुत**

काकचेष्टः, अल्पाहारी, विद्याभ्यासम्, सत्सङ्गतिरतः, वृद्धोपसेविनः, सुखार्थिनः, पञ्चलक्षणः ।

२. **पाठाधारेण एकवाक्येनोत्तरयत**

(क) को वकध्यानो भवेत् ?

(ख) विद्यार्जनाय किं त्यक्तव्यम् ?

(ग) विद्यार्थिनां निद्रा कस्य इव भवेत् ?

(घ) विद्यार्थिषु कीदृशी चेष्टा अपेक्ष्यते ?

(ङ) पञ्चलक्षणः कः ?

(च) विद्यार्थिना किं त्यक्तव्यम् ?

(छ) कस्य कृते विद्या अलभ्या भवति ?

(ज) सुखार्थी किं त्यजेत् ?

(झ) कस्य धनं न भवति ?

(ञ) सुखस्य हेतोः किमपरिहार्यं भवति ?

(ट) विद्यार्थी सुखे दुःखे च किं न त्यजति ?

(ठ) विद्यार्थिना कयोः सहनं कर्तव्यम् ?

(ड) कस्य यशो वर्धते ?

(ढ) दुर्जनसंसर्गे पतनात् किं भवति ?

(ण) अस्माभिः कस्य सङ्गतिः कार्या ?

३. **पाठाधारेण सङ्क्षेपेणोत्तरयत**

(क) विद्यार्थिनां लक्षणानि कानि ?

(ख) विद्यार्थी किं किं कुर्यात् ?

(ग) आलस्येन जायमाना हानयः काः ?

(घ) अभिवादनशीलस्य किं किं वर्धते ?

(ङ) सत्सङ्गतेर्लाभान् सूत्ररूपेण लिखत ।

(च) दुर्जनसंसर्गात् का हानिः ? तन्निवारणोपायान् च निर्दिशत ।

**४. पाठाधारेण सत्यकथने 'आम्' असत्यकथने 'न' इति लिखत**

(क) विद्यार्थी अल्पाहारी भवेत् ।

(ख) सुखार्थी विद्यार्जने सफलो भवति ।

(ग) विद्यार्थी सुखस्यैव सहनं करोति ।

(घ) दुर्जनसंसर्गः सर्वथा त्याज्यो भवति ।

(ङ) विद्यार्थिभिः सत्सङ्गतिः करणीया ।

(च) वृद्धोपसेविनामायुर्वधते ।

(छ) मित्रेण विनापि सुखं सम्भवति ।

(ज) धनार्जनाय विद्याऽऽवश्यकी भवति ।

**५. पर्यायौ परस्परं मेलयत**

| **'अ' समूहः** | **'आ' समूहः** |
|---|---|
| विद्यार्थी | वर्जयेत् |
| अविद्यः | कष्टम् |
| त्यजेत् | छात्रः |
| विद्या | नित्यम् |
| दुःखम् | विदधाति |
| सुखम् | विद्याहीनः |
| सदा | प्रमोदः |
| करोति | ज्ञानम् |

**६. पाठस्य तृतीयस्य श्लोकस्य श्रुतिलेखनं कुरुत ।**

**७. पाठामाधृत्य रिक्तस्थानं पूरयत**

(क) विद्यार्थी चेत् ......... त्यजेत् ।

(ख) विद्यार्थी ......... सहते ।

(ग) अभिवादनशीलस्य ......... वर्धन्ते ।

(घ) अधनस्य जनस्य ......... न भवति ।

(ङ) ........... विद्या कुतो भवेत् ?

**८. पाठस्थश्लोकान् यति-गति-लयसंयोजनेन प्रवाचयत ।**

**९. अधस्तनस्य श्लोकस्य भावार्थं लिखित्वा विद्यार्थिना त्यक्तव्या अष्टौ विषयाः सारिण्यां दर्शयत**

कामक्रोधौ तथा लोभं स्वादुशृङ्गारकौतुके ।
अतिनिद्रातिसेवे च विद्यार्थी ह्यष्ट वर्जयेत् ॥

**१०. पाठाधारेण विद्यार्थिना कर्तव्याकर्तव्यविषयाणां सूचीं निर्मात ।**

**११. पदानि प्रयुज्य वाक्यानि रचयत**

गृहत्यागी, काकचेष्टः, त्यजेत्, सुखार्थी, सहनम्, वृद्धोपसेवी, अभिवादनशीलः, कुतः, नित्यम् ।

**१२. पाठस्यान्तिमस्य श्लोकस्य सरलार्थं लिखत ।**

**१३. पाठमाधृत्य विद्यार्थिनां कृतेऽनिवार्यगुणानां विवेचनं कुरुत ।**

## व्यवहारानुशीलनम्

**१. 'विद्यार्थी चेत् त्यजेत् सुखम्' इत्यस्याभिप्रायं प्रकटय्य तस्य स्वकीये जीवने प्रवर्तनावस्थायाः समीक्षणं कुरुत ।**

**२. पाठे वर्णितान् विद्यार्थिलक्षणसम्बद्धविषयान् आधृत्य विद्यार्थित्वे स्वकीयं मूल्याङ्कनं विधत्त ।**

३. **विद्यार्थिनां लक्षणसम्बद्धानां श्रुतपूर्वाणां विषयाणां सत्यत्वासत्यत्वयोः परीक्षणं सखिभिः सह विमर्शनेन विधाय स्वीकर्तव्यान् विषयान् अनुशीलयत ।**

४. **विद्यार्थिनामाचरणविषये पञ्च सूत्राणि स्थूलाक्षरैर्लिखित्वा कक्षाया भित्तौ संस्थापयत ।**

५. **स्वकीयाचारव्यवहारयोराधारेण सर्वोपयुक्तं विकल्पं विचित्य प्रश्नानुत्तरयत**

(अ) **त्वं प्रातः कियद्वादने जागर्षि ?**

(क) चतुर्वादने । (ख) षड्वादने ।

(ग) सप्तवादने । (घ) अष्टवादने ।

(आ) **प्रतिदिनं कं प्रणमसि ?**

(क) मातापितारौ । (ख) अग्रजान् ।

(ग) गुरून्/शिक्षकान् (घ) उपर्युक्तान् सर्वान्

(इ) **गृहे कथमध्ययनं करोषि ?**

(क) दूरदर्शनदर्शनेन सहैव पठामि ।

(ख) चलभाषयन्त्रेण क्रीडन् पठनं विदधामि ।

(ग) पाठ्यविषयेषु एकाग्रो भूत्वा पठामि ।

(घ) सुखदुःखयोर्विषये चिन्तयन् पठामि ।

(ई) **कीदृशं भोजनं तुभ्यं रोचते ?**

(क) केवलं जिह्वायाः कृते स्वादुभोजनम् ।

(ख) अतिभोजनम् ।

(ग) उद्योगजं स्वादिष्टभोजनम् ।

(घ) हितं मितं च भोजनम् ।

(उ) **विद्या-धन-मित्र-सुखेषु किञ्चिदेकमेव चेयं चेत् किं चिनोषि ?**

(क) विद्या (ख) धनम् (ग) मित्रम् (घ) सुखम्

# वचनं पालनीयम्

हिमालयो देवसदनं वर्तते । देवानां सदनादियं पावनभूमिरस्ति । इयं महौषधानामक्षयशाला च विद्यते । हिमालय एव बह्वीनां नदीनां स्रोतश्चास्ति । एतासु नदीषु देवभूमौ नेपाले प्रवहन्त्यौ स्वर्णकौशिकी दुग्धकौशिकी चेति द्वे नद्यौ प्रथिते स्तः । जनश्रुत्यनुसारेण पुरा स्वर्णकौशिकी दुग्धकौशिकी च भगिन्यौ आस्ताम् । तयोः स्वर्णकौशिकी अग्रजा आसीत् चेद् दुग्धकौशिकी अनुजा आसीत् । तयोः परस्परमपूर्वस्नेह आसीत् ।

हिमालयादुत्पत्तेरनन्तरं ते स्ववेगशक्तिं परीक्षितुमैच्छताम् । एतदर्थं ते सङ्गमस्थलं लक्ष्यीकृत्य भिन्नधारया प्रवोढुमकामयेताम् । परं ते सङ्गमस्थलं प्राप्य भूयोऽपि सहयात्राम् इष्टवत्यौ । तयोरिच्छायाः पूर्तये उपाय अन्वेष्टव्य आसीत् । तयोः सङ्गमस्थलमतिदूरे आसीत् ।

अग्रजा स्वर्णकौशिकी अवदत्, "किं करणीयमनुजे !"

अनुजा दुग्धकौशिकी प्रत्यवदत्, "मम मनसि अस्ति कोऽपि विचारः । भवती स्वीकरोति किम् ?"



स्वर्णकौशिकी अनुजायाः कथनं स्वीकर्तुं तत्परा अजायत । दुग्धकौशिकी अभाषत, "अत्र हिमालयादावां युगपदेव प्रवहाव । या सङ्गमस्थलं प्रथमं प्राप्स्यति, तया अपरस्या आगमनस्य प्रतीक्षा विधेया । मेलनानन्तरं आवां पुनरेकीभूय सागरं प्राप्स्यावः ।" स्वर्णकौशिकी दुग्धकौशिक्याः वचनं स्वीचकार ।

भगिन्योः प्रवहणं प्रारब्धम् । सङ्गमस्थलं हिमालयादतिदूरे आसीत् । द्वे एव सङ्गमस्थलं प्रथमं प्राप्तुं सश्रमं प्रवहन्त्यौ आस्ताम् । विकटं विषमं च मार्गमतिक्रम्य प्रवहणं ताभ्यां महत् काठिन्यमनुभूतम्, तथापि ते स्ववेगं नात्यजताम् ।

प्रवहणस्य बहुकालो व्यतीतः । पूर्वकथनस्यानुसारेण स्वर्णकौशिकी महता दुःखेन सङ्गमस्थलं प्राप्तवती । तत्र प्रथमं प्राप्य सा प्रवहणपथस्य सर्वं दुःखं विस्मृतवती । सा ससन्तोषं स्ववेगं स्थिरं विधाय अनुजायाः प्रतीक्षामकरोत् ।

तया दीर्घकालो व्यतीतः परं दुग्धकौशिकी नागतवती । चिरकालं प्रतीक्षमाणा स्वर्णकौशिकी उद्विग्ना जाता । 'अनुजां प्रतीक्षमाणा अहमत्रैव शुष्का तु न भविष्यामि ?' इति विचार्य सा चिन्ताकुलाऽभवत् । साऽचिन्तयत्, 'अनुजा आगमिष्यति एव । सा मामनुगमिष्यति । मार्गस्थाः सर्वेऽपि प्राणिनः मम जलं विना जीवितुं न शक्ष्यन्ति । स्वल्पवेगेन चलिष्यामि । अनुजा मां मेलिष्यत्येव । तदनु एकीभूय सहैव चलिष्यावः । अहं सम्प्रति मन्दवेगेन चलिष्यामि चेन्मया सह मेलनाय भगिन्यै किमपि काठिन्यं न भवति ।' इति विचिन्त्य स्वर्णकौशिकी एकाकिनी एव दक्षिणदिशि शनैः शनैः प्रवहणं प्रारभत ।

स्वर्णकौशिकी सङ्गमस्थानात् किञ्चित् चलिता एव आसीत्, दुग्धकौशिकी तत्र सम्प्राप्ता । पूर्वशपथानुसारेण स्वर्णकौशिकी सङ्गमस्थले प्रतीक्षारता नासीत् । दुग्धकौशिकी स्वर्णकौशिकीमेकाकिनीमेव प्रवहन्तीमपश्यत् । अग्रजायाः वचनोल्लङ्घनं दृष्ट्वा अनुजा दुग्धकौशिकी खिन्नाऽभवत् । साऽग्रजाया जलेन सह एकीभवनं विनैव किञ्चित् स्पर्शनमेव कृत्वा स्वजलेन पृथक् प्रावहत् । सा दुःखं प्रकटयन्ती स्वर्णकौशिकीमवदत्, "भवती किमर्थं मामेकाकिनीं त्यक्तवती । भवत्या वचनं च न पालितम् । भवती मयि न स्निह्यति किमु ?" दुग्धकौशिक्याः दुःखभरितं वचनं श्रुत्वा स्वर्णकौशिकी अपि सर्वं वृत्तान्तमश्रावयत् । साऽनुजया मिलित्वा हर्षिताऽभवत् । स्वस्य किञ्चिच्चाञ्चल्यमालक्ष्य सा दुःखं च त्यक्तवती । अतिशयप्रेम्णा साऽनुजां दुग्धकौशिकीमालिङ्गितवती । 'भविष्यति प्रतिज्ञातं वचनं पूरयिष्यामि' इति सा शपथं च प्राकटयत् । अग्रजायाः स्वर्णकौशिक्याः स्नेहसिञ्चितया वाण्या दुग्धकौशिकी हर्षिताऽभवत् ।

ते पुनः परस्परं स्नेहभरितयोरादर्शभगिन्यो रूपेण एकीभूय प्रावहताम् । स्वर्णकौशिकी-दुग्धकौशिक्योर्मेलनानन्तरं किञ्चिद् दूरं यावदिदानीमपि यो भिन्नो जलरङ्गो विभाति तस्य कारणमिदमेवास्तीति लोकाः विश्वसन्ति । अत एव सुभाषितम्–

**'भोजनमपि विहाय सहयात्रा विधेया'**

## शिक्षणालोकः

नेपालस्यैव पात्र-परिवेश-परिघटनादिभरिता अन्या नीतिकथाः श्रावयित्वा छात्रा लोककथासु वर्तमानाया नीतेर्ज्ञानाय च प्रेरणीयाः । एवंविधाभिः कथाभिस्तेषु राष्ट्रगौरवानुभूतिं वर्धयितुं प्रयत्नश्च कर्तव्यः ।

# अभ्यासः

## पाठानुशीलनम्

१. **शुद्धमुच्चारयत**

अक्षयशाला, बह्वीनाम्, अग्रजा, ऐच्छताम्, प्राप्स्यावः, प्रतिवचनम्, प्रवहन्त्यौ, उद्विग्ना, वचनोल्लङ्घनम्, स्पर्शनमात्रम्, अश्रावयत्, अतिशयप्रेम्णा ।

२. **सङ्क्षेपेण उत्तरयत**

(क) के भगिन्यौ आस्ताम् ?
(ख) भगिन्यौ किमैच्छताम् ?
(ग) स्वर्णकौशिकी किं कर्तुं तत्पराऽजायत ?
(घ) सङ्गमस्थलं कुत्रासीत् ?
(ङ) सङ्गमस्थलं प्रथमं का प्राप्तवती ?
(च) का एकाकिनी शनैः शनैरचलत् ?
(छ) अनुजा किमर्थं खिन्नाऽभवत् ?
(ज) का कामालिङ्गितवती ?
(झ) स्वर्णकौशिक्या वाणी कीदृशी आसीत् ?
(ञ) भोजनसहयात्रयोः का महत्वपूर्णा भवति ?

**३. प्रदत्तानां कथनानां कथयित्री का ? कोष्ठे लिखत**

(क) किं करणीयमनुजे ? ( )

(ख) भवती स्वीकरोति ? ( )

(ग) एतदेव समीचीनं भवेत् । ( )

(घ) अनुजां प्रतीक्षमाणा अहमत्रैव शुष्का तु न भविष्यामि ? ( )

(ङ) स्वल्पवेगेन चलिष्यामि । ( )

(च) भवत्या वचनं च न परिपालितम् । ( )

**४. सत्यासत्यं चिनुत**

(क) जनश्रुतेरनुसारेण स्वर्णकौशिकी दुग्धकौशिकी च भगिन्यौ आस्ताम् । ...........

(ख) भगिन्योः परस्परमपूर्वस्नेह आसीत् । ...........

(ग) भगिन्यौ सङ्गमस्थलादुत्पन्ने आस्ताम् । ...........

(घ) स्वर्णकैशिकी अनुजायाः कथनं स्वीकृतवती । ...........

(ङ) प्रवहणमार्गो विकटो विषमश्चासीत् । ...........

(च) दुग्धकौशिकी अग्रजायाः प्रतीक्षामकरोत् । ...........

(छ) स्वर्णकौशिक्याः प्रतीक्षायामेव दुग्धकौशिकी सम्प्राप्ता । ...........

(ज) स्वर्णकौशिक्या वाणी कठोरा आसीत् । ...........

(झ) सहयात्रा कदापि न परित्यक्तव्या । ...........

**५. पाठस्यान्तिमानुच्छेदं वाचयत ।**

**६. पाठस्याशयं स्वभाषया कथयत ।**

**७. रिक्तस्थाने उपयुक्तमुत्तरं लिखत**

(क) हिमालयो बह्वीनां नदीनां ....................वर्तते ।

(अ) अक्षयशला (आ) स्रोतः

(ख) स्वर्णकौशिकी दुग्धकौशिकी च .................।

(अ) नेपाले प्रवहतः (आ) हिमालये तिष्ठतः

(ग) भगिन्यौ ..............................इच्छतः ।

(अ) सागरं प्राप्तुम् (आ) कोलाहलं विधातुम्

(घ) प्रवहणे भगिनीभ्यां ........................अनुभूतम् ।

(अ) अतिशयं सुखं (आ) महत् काठिन्यम्

(ङ) स्वर्णकौशिकी-दुग्धकौशिक्योः सङ्गमे ................ विभाति ।

(अ) भिन्नो जलरङ्गः (आ) सुन्दरस्तरङ्गः

## ८. अधोलिखितानां पदानां विभक्तिवचने निर्दिशत

देवानाम्, देवभूमौ, हिमालयात्, उपायः, अनुजे, दुःखेन, मेलनाय, एकाकिनीम्, हर्षिता, सङ्गमस्य, लोकाः, सहयात्रा ।

| यथा- | | **विभक्तिः** | **वचनम्** |
|---|---|---|---|
| | देवानाम् | षष्ठी | बहुवचनम् |

## ९. अधोलिखितानि पदानि प्रयुज्य मौलिकवाक्यानि रचयत

देवसदनम्, लक्ष्यीकृत्य, अपरस्य, अतिक्रम्य, व्यतीतः, प्रावहत्, चाञ्चल्यम्, शनैः शनैः, स्नेहसिञ्चितया, इदानीमपि ।

## १०. अधस्तनं गद्यं पठित्वा प्रश्नानुत्तरयत

बृहस्पतिर्देवानां गुरुर्वर्तते । अतो 'देवगुरुः बृहस्पतिः' इति प्रसिद्धिरस्ति । अयं धर्मनीतेः सम्यग् ज्ञाता, कुशलः प्रवक्ता चास्ति । देवेषु ये नीतियुक्ता गुणाः सन्ति, तेषां हेतुरपि अयमेव । यदा यदा देवा बृहस्पतेः नीतिवचनानि तिरश्चक्रुः, तदा तदा ते ऐश्वर्याद् वञ्चिता बभूवुः ।

सृष्टिकाले ब्रह्मणा यन्नीतिशास्त्रं प्रतिपादितं तद् भगवता शङ्करेण तस्य नीतिशास्त्रस्य सङ्क्षेपीकृतम् । बृहस्पतिना ततोऽपि सङ्क्षेपीकरणं विहीतम् । बृहस्पतिना सङ्क्षेपीकरणं तन्नीतिशास्त्रं बार्हस्पत्यं नीतिशास्त्रमिति नाम्ना प्रसिद्धमभवत् । यद्यपि शास्त्रमेतत् सम्प्रति

नैवोपलभ्यते तथापि महाभारते, बृहस्पतिस्मृतौ, गरुडपुराणे च बृहस्पतेर्नीतिवचनानि प्राप्यन्ते । गरुडपुराणे आचारखण्डस्य १०८-११४ अध्यायेषु सहस्रशः पद्यैर्या नीतिर्वर्णिता, सा बृहस्पतिप्रोक्ता नीतिरिति प्रसिद्धा वर्तते । एषु स्थलेषु धर्मनीते राजनीतेश्चोपदेष्टा बृहस्पतिः अस्ति, श्रोता च इन्द्रो वर्तते । महाभारतादिग्रन्थेषु तु युधिष्ठिरः, मान्धाता, कोसलनरेशः, वसुमना इत्यादिराजानश्च श्रोतृरूपेण उपलभ्यन्ते ।

**(अ) एकपदेनोत्तरयत**

(क) देवानां गुरुः को वर्तते ?

(ख) कदा ब्रह्मणा नीतिशास्त्रं प्रतिपादितम् ?

**(आ) एकवाक्येनोत्तरयत**

(क) देवाः कदा ऐश्वर्याद् वञ्चिता बभूवुः ?

(ख) बृहस्पतिः केषां कारणं वर्तते ?

(ग) महाभारतादिग्रन्थेषु के श्रोतृरूपेण उपलभ्यन्ते ?

(घ) का बृहस्पतिप्रोक्ता नीतिरिति प्रसिद्धा वर्तते ?

**(इ) परस्परं मेलयत**

| **विशेषणानि** | **विशेष्याणि** |
|---|---|
| कुशलः | नीतिशास्त्रम् |
| एतत् | प्रवक्ता |
| भगवता | गुणान् |
| बार्हस्पत्यं | देवाः |
| नीतियुक्तान् | शङ्करेण |
| वञ्चिताः | शास्त्रम् |

## व्यवहारानुशीलनम्

१. **स्ववचने दृढस्य कस्यापि चरितस्य विषये कक्षायां श्रावयित्वा त्वं स्ववचने दृढो वर्तसे न वा ? इति उदाहरणमुखेन प्रतिपादयत ।**

२. **भगिनीनां भ्रातॄणां च मध्ये कीदृशौ स्नेहसम्मानौ आवश्यकौ भवतः ? कक्षायां मित्रैः सह गृहे स्वपरिवारसदस्यैः सह च विमृश्य कथयत ।**

**३. त्वया कीदृशैर्जनैः सह यात्रा विहिताऽस्ति ? किं सा यात्रा शिक्षादायिनी सन्तोषकारिणी चासीत् ? विचार्य कथयत ।**

**४. अस्य पाठस्य पठनानन्तरं तव विचारे कीदृशं परिवर्तनं जातम् ?**

**५. समुचिते विकल्पे स्वविचारेण (✓) चिह्नं दत्त**

**(क) त्वं मान्यजनानामाज्ञां पालयसि ?**

(अ) यदा कदा पालयामि ।

(आ) कदापि न पालयामि ।

(इ) सदैव पालयामि ।

(ई) कदाचित् पालयामि कदाचिच्च न पालयामि च ।

**(ख) अग्रज ! मह्यं जलं देहीति उक्त्वा तवानुजा त्वाम् आज्ञापयति चेत् त्वं किं करोषि ?**

(अ) एषा मामाज्ञापयतीति उक्त्वा तां ताडयामि ।

(आ) जलं दास्यामि ।  (इ) न दास्यामि ।  (ई) कुप्यामि ।

**(ग) त्वं कस्याज्ञापालनं करोषि ?**

(अ) मातुः  (आ) पितुः

(इ) गुरोः  (ई) उपर्युक्तानां सर्वेषाम्

**(घ) गवां भाजनाय घासकर्तनं कर्तव्यमस्ति । माता घासकर्तनाय गन्तुं त्वामाह्वयन्ती वर्तते । त्वं किं करोषि ?**

(अ) पलाये ।

(आ) प्रच्छन्नो भवामि ।

(इ) घासकर्तनार्थं मात्रा सहैव गच्छामि ।

(ई) 'अहं न शक्नोमि, भगिनीं कथयतु' इति कथयामि ।

# अर्थशुचिता

आयुः कर्म च वित्तं च विद्या निधनमेव च ।
पञ्चैतानि हि सृज्यन्ते गर्भस्थस्यैव देहिनः ॥१॥
हस्तौ दानविवर्जितौ श्रुतिपुटौ सारस्वतद्रोहिणौ
नेत्रे साधुविलोकनेन रहिते पादौ न तीर्थं गतौ ।
अन्यायार्जितवित्तपूर्णमुदरं गर्वेण तुङ्गं शिरो
रे रे जम्बुक मुञ्च मुञ्च सहसा नीचं सुनिन्द्यं वपुः ॥
उपार्जितानां वित्तानां त्याग एव हि रक्षणम् ।
तडागोदरसंस्थानां परीवाह इवाम्भसाम् ॥३॥
यथा हि मलिनैर्वस्त्रैर्यत्र तत्रोपविश्यते ।
एवं चलितवृत्तस्तु वृत्तशेषं न रक्षति ॥४॥
प्रभुप्रसादजं वित्तं सुप्राप्तं यो निवेदयेत् ।
वस्त्राद्यं च दधात्यङ्गे स भवेद्राजवल्लभः ॥५॥
विद्यां वित्तं शिल्पं तावन्नाप्नोति मानवः सम्यक् ।
यावद् व्रजति न भूमौ देशाद्देशान्तरं हृष्टः ॥६॥

**१**
**पदच्छेदः**

आयुः, कर्म, च, वित्तम्, च, विद्या, निधनम्, एव, च, पञ्च, एतानि, हि, सृज्यन्ते, गर्भस्थस्य, एव, देहिनः ।

### अन्वयः

आयुः कर्म च वित्तं च विद्या निधनम् एव च हि एतानि पञ्च गर्भस्थस्य एव देहिनः सृज्यन्ते ।

**सरलार्थः**

जनानामायुः कर्म धनं विद्या मृत्युश्चेति पञ्च वस्तूनि मातुः गर्भे एव निर्धारितानि भवन्ति ।

**२**
**पदच्छेदः**

हस्तौ, दानविवर्जितौ, श्रुतिपुटौ, सारस्वतद्रोहिणौ, नेत्रे, साधुविलोकनेन, रहिते, पादौ, न, तीर्थम्, गतौ, अन्यायार्जितवित्तपूर्णम्, उदरम्, गर्वेण, तुङ्गम्, शिरः, रे रे, जम्बुक, मुञ्च, मुञ्च, सहसा, नीचम्, सुनिन्द्यम्, वपुः ।

**अन्वयः**

(यस्य) हस्तौ दानविवर्जितौ, श्रुतिपुटौ सारस्वतद्रोहिणौ, नेत्रे साधुविलोकनेन रहिते, पादौ तीर्थं न गतौ, उदरम् अन्यायार्जितवित्तपूर्णम्, शिरः गर्वेण तुङ्गम् (अस्ति), रे रे जम्बुक (त्वं तादृशं) नीचं सुनिन्द्यं वपुः सहसा मुञ्च मुञ्च ।

**सरलार्थः**

यस्य दानरहितौ हस्तौ वर्तेते; यस्य कर्णौ कदापि ज्ञानं नैवाशृणुताम्; यस्य नेत्रे सज्जनानां दर्शनं नैव अकुरुताम्; यस्य पादौ देवस्थलेषु नागच्छताम्; योऽन्यायेन उपार्जितानि वस्तूनि खादित्वा उदरम् अभरत; यस्य शिरोऽभिमानेन सदा उच्चैरभवत्, मान्यजनेषु श्रद्धया च कदापि न अनमत्; कर्मणा शृगालतुल्यस्य एतादृशस्य जनस्य जीवनं निन्द्यं भवति । स निश्चयेन भूभारः वर्तते । अतः हे शृगालतुल्य नीचजन ! तव कृते जीवनात् मृत्युरेव वरम् ।

**३**
**पदच्छेदः**

उपार्जितानाम्, वित्तानाम्, त्यागः, एव, हि, रक्षणम्, तडागोदरसंस्थानाम्, परीवाहः, इव, अम्भसाम् ।

**अन्वयः**

हि तडागोदरसंस्थानामम्भसां परीवाह इव उपार्जितानां वित्तानां त्याग एव रक्षणं (भवति) ।

**सरलार्थः**

यथा तडागस्य जलानां परीवाहनं तडागस्य स्वच्छतायै भवति तथैव, श्रमेण अर्जितस्य धनस्य लोककल्याणाय समुचितस्त्यागोऽपि अर्थशुचये भवति, अतः तादृशः त्यागः धनस्य सुरक्षा एव मन्यते, न नाशः ।

**४**
**पदच्छेदः**

यथा, हि, मलिनैः, वस्त्रैः, यत्र, तत्र, उपविश्यते, एवम्, चलितवृत्तः, तु, वृत्तशेषम्, न, रक्षति ।

**अन्वयः**

यथा हि मलिनैः वस्त्रैः यत्र तत्र उपविश्यते एवं चलितवृत्तः तु वृत्तशेषं न रक्षति ।

**सरलार्थः**

यथा मलिनवस्त्रो जनो यत्र तत्र दूषितभूमौ अपि वसति; वस्त्राणि मलिनानि भवन्ति इति भयं तस्मिन् न भवति । एवमेव यस्य चरित्रं सकृद् दूषितम्, सोऽवशिष्टं चरित्रमपि नाशयति । तादृशे जने प्रतिष्ठादिपतनस्य भयं न भवति ।

**५**
**पदच्छेदः**

प्रभुप्रसादजम्, वित्तम्, सुप्राप्तम्, यः, निवेदयेत्, वस्त्राद्यम्, च, दधाति, अङ्गे, सः, भवेत्, राजवल्लभः ।

**अन्वयः**

यः प्रभुप्रसादजं सुप्राप्तं वित्तं निवेदयेत्, वस्त्राद्यं च अङ्गे दधाति स राजवल्लभः भवेत् ।

**सरलार्थः**

प्रसन्नेन स्वामिना प्रदत्तं पारितोषिकं द्रव्यं प्राप्य यः सेवकस्तन्निकटे एव हर्षं प्रकटयति, स्वामिना प्रदत्तानि वस्त्राणि भूषणानि वा समये समये धारयति स सदा स्वामिप्रियो भवति ।

६
**पदच्छेदः**

विद्याम्, वित्तम्, शिल्पम्, तावत्, न, आप्नोति, मानवः, सम्यक्, यावत्, व्रजति, न, भूमौ, देशात्, देशान्तरम्, हृष्टः ।

### अन्वयः

मानवः हृष्टः (सन्) यावद् भूमौ देशाद् देशान्तरं न व्रजति तावद् विद्यां वित्तं शिल्पं सम्यक् न आप्नोति ।

**सरलार्थः**

जनः समुत्सुको भूत्वा स्वदेशं विदेशं वा गच्छेत् । यतो हि यावत् पर्यन्तं स देशाद् देशान्तरं न गच्छति तावत् पर्यन्तं स विद्यां धनं शिल्पकलादि च सम्यग् रूपेण प्राप्तुं न शक्नोति ।

## अभ्यासः

### पाठानुशीलनम्

१. **शुद्धमुच्चारयत**

गर्भस्थस्यैव, अन्यायार्जितवित्तपूर्णम्, सुनिन्द्यम्, तडागोदरसंस्थानाम्, चलितवृत्तः, प्रभुप्रसादजम्, वस्त्राद्यम्

२. **पाठस्थानां श्लोकानां सस्वरवाचनं कुरुत ।**

३. **पाठस्थं तृतीयं पद्यं शिक्षकमुखात् श्रुत्वा तदर्थं वदत ।**

४. **सङ्क्षेपेण उत्तरयत**

(क) गर्भे जनानां कानि पञ्च वस्तूनि सृज्यन्ते ?
(ख) कीदृशस्य मनुष्यस्य जीवनं व्यर्थम् ?
(ग) वित्तस्य रक्षणं कथं भवति ?
(घ) कस्य शेषमपि वृत्तं विनश्यति ?
(ङ) कः स्वामिप्रियो भवति ?
(च) देशान्तरं किमर्थं गन्तव्यम्

### ५. परस्परं मेलयत

| | |
|---|---|
| वित्तानां त्यागः | हीनचरित्र |
| चलितवृत्तः | स्वार्थी |
| विद्याप्राप्तये | वित्तरक्षणम् |
| अभिमानी जनः | देशान्तरगमनम् |

### ६. अधस्तनानि पदानि प्रयुज्य वाक्यानि रचयत

वपुः, सहसा, मलिनैः, सम्यक्, हृष्टः, परीवाहः, देहिनः, तुङ्गः

### ७. अधः प्रस्तुतां लघुकथां पठित्वा प्रश्नानुत्तरयत

मध्येवनमेकस्तडागः आसीत् । तत्र लघूनां दीर्घाणां च मत्स्यानां समूहो निवसति स्म । तेषु रक्तमत्स्यस्य कृष्णमत्स्यस्य श्वेतमत्स्यस्य च पारस्परिकी मित्रता आत्मीया प्रतीयते स्म । एकदा सायङ्काले तस्यैव तडागस्य मार्गेण केचन मत्स्यजीविनो धीवरा ग्रामं गच्छन्त आसन् । तडागं विलोक्य एको धीवरोऽवदत्, “इह तडागे बहवो मत्स्याः सन्तीति ज्ञायते । किं कुर्याम ? मस्त्यान् गृह्णीयाम ?” द्वितीयोऽवदत्, “नहि भो, इदानीं सूर्योऽस्तं गच्छन् वर्तते । अतः श्व प्रभाते आगत्य मत्स्यान् मारयितास्मः ।” द्वितीयस्य धीवरस्य कथने तृतीयस्यापि सहमतिरभवत् ।

धीवराणां वार्तां श्रुत्वा कृष्णमत्स्यो नितरां भीतः । स तां वार्तां श्रावयितुं मित्रद्वयस्य पार्श्वेऽगच्छत् । स सर्वं वृत्तान्तं श्रावितवान् । तस्य वचनं श्रुत्वा श्वेतमत्स्योऽकथयत्, “अस्माकं मस्त्यकुले महान् सङ्कटः समापतितः । अतो वयं परिवरजनैः सह तडागान्तरं गच्छाम ।” श्वेतमत्स्यस्य कथनेन कृष्णमत्स्यो मृत्युभयेन व्याकुलो जातः । स ससम्भ्रममवदत्, “तर्हि अद्यैव वयं तडागान्तरं गच्छाम नो चेत् श्वोऽस्माकं मृत्युरवश्यम्भावी ।” मित्रयोः कथनं श्रुत्वापि रक्तमत्स्यो निश्चिन्तो दृष्टः । स निर्भयो भूत्वाऽकथयत्, “एष तडागोऽस्माकं वर्तते । यदि वयं स्वगृहे एव आत्मानं असुरक्षितं मन्यामहे तर्हि अन्येषां गृहे कथं सुरक्षिता भवेम ? अहं तु कुत्रापि न गच्छामि । युवां गन्तुं शक्नुथः ।”

रक्तमत्स्य आत्मरक्षार्थं यथोचितोपायसाधनं नैवाकरोत् । तस्य हठं दृष्ट्वा चिन्तितौ कृष्णश्वेतमस्त्यौ सपरिवारौ तडागान्तरमगच्छताम् । अपरेद्युः प्रभाते एव धीवरास्तं तडागं प्राप्ताः । ते तत्र पाशानक्षिपन् । अन्यैर्मत्स्यैः सह पाशबद्धो रक्तमत्स्योऽपि मारितः ।

**(अ) एकपदेनोत्तरयत**

(क) तडागः कुत्र आसीत् ?

(ख) को धीवराणां वार्तां श्रुतवान् ?

(ग) कुत्र सङ्कटः समापतितः ?

(घ) धीवरैः को मारितः ?

**(आ) पूर्णवाक्येनोत्तरयत**

(क) केषां मित्रता आत्मीया आसीत् ?

(ख) कृष्णमत्स्यः किमर्थं भीतः ?

(ग) श्वेतमत्स्य आत्मरक्षार्थं कमुपायं प्रास्तौत् ?

(घ) धीवराः मत्स्यान् मारयितुं किमकुर्वन् ?

**८. उचितपदेन रिक्तस्थानं पूरयत**

देशान्तरम्, शेषम्, मातृगर्भे, अन्यायेन, स्वार्थिनाम्

(क) जनानां निधनं ............... एव निर्धारितं भवति ।

(ख) शृगालतुल्यानां ................ मनुष्याणां मृत्युरेव वरम् ।

(ग) नष्टचरितानां ............ चरितमपि नष्टं भवति ।

(घ) उदरभरणाय धनानाम् ................... उपार्जनं नोचितम् ।

(ङ) ............. गतो जनो धनादीन् उपार्जति ।

**९. अधस्तनं पद्यमाधारीकृत्य शोकस्य परिणामः इति विषये एकमनुच्छेदं लिखत**

वृत्तं यत्नेन संरक्षेद् वित्तमेति च याति च ।

अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः ॥

**१०. विद्याया विषये पाठे उल्लिखितान् विषयाँन्चाधारीकृत्य 'विद्या' इति शीर्षकेऽनुच्छेदमेकं लिखत ।**

**११. सरलार्थं विलिख्य कक्षायां श्रावयत**

अरक्षितं तिष्ठति दैवरक्षितं
सुरक्षितं दैवहतं विनश्यति ।
जीवत्यनाथोऽपि वने विसर्जितः
कृतप्रयत्नोऽपि गृहे न जीवति ॥

**१२. पद्यं पठित्वा प्रश्नानुत्तरत**

प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहिता विरमन्ति मध्याः ।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारभ्य चोत्तमजना न परित्यजन्ति

(क) नीचाः (सामान्याः) जनाः किमर्थं कार्यं न प्रारभन्ते ?

(ख) मध्याः (मध्यमाः) जनाः किं कुर्वन्ति ?

(ग) कार्येषु क आगन्तुं शक्नोति ?

(घ) उत्तमजनानां विशेषता का ?

(ङ) कार्येषु साफल्यं लब्धुं किं कर्तव्यम् ?

**१३. अधस्तनानि पदानि प्रयुज्य चित्रवर्णनं कुरुत**

विशालः, चत्वरे, कन्दुकम्, बालकाः, स्वास्थ्यम्, जीवने, व्यायामः, धावनम्



## व्यवहारानुशीलनम्

१. **विद्याधनशिल्पादिप्राप्तये देशान्तरगमनस्य आवश्यकता पाठस्थे पद्ये निर्दिष्टा । किं तत्प्राप्तये यूयं देशान्तरं गन्तुमिच्छथ ? सतर्कं कथयत ।**

२. **वित्तस्य त्यागेन वित्तरक्षणं भवतीति वचनं विरुद्धमिव श्रूयते । किं तद् वचनं विरुद्धमस्ति ? स्वस्यैवोदाहरणमुखेन स्पष्टयत ।**

३. **हीनचरितस्य शेषं चरितमपि विनश्यतीति पद्ये प्रोक्तम् । यस्य कारणवशात् चरित्रं सकृत् कलङ्कितं स पुनः स्वकर्मणा चरित्रोन्नतिं विधातुं न शक्नोति ? उदाहरणानि प्रदर्श्य स्वविचारं प्रकटयत ।**

४. **जीवनस्य सफलतायै यूयं कीदृशानि कर्माणि कुरुथ ? नातिदीर्घमनुच्छेदमेकं लिखत ।**

५. **समुचिते कथने (✓) चिह्नम् अङ्कयत**

| | | |
|---|---|---|
| (क) अहं कर्मयोगे विश्वासं करोमि । | करोमि | न करोमि |
| (ख) सकृद् दूषितं चरितमवशिष्टं चरितं वर्धयति । | वर्धयति | न वर्धयति |
| (ग) पारितोषिकं प्राप्य हर्षः प्रकटनं करोमि । | करोमि | न करोमि |
| (घ) उपार्जितानां धनानां बन्धुषु विभज्यामि । | विभज्यामि | न विभज्यामि |

# शास्त्राज्ञापालनम्

(शोभा साधना च गृहस्य वितर्द्यां समुपविश्य वार्तां कुर्वन्त्यौ स्तः ।)



**शोभा** सखि ! मम मनसि एका जिज्ञासा समुत्पन्ना ।

**साधना** का सा जिज्ञासा ?

**शोभा** सर्वेऽपि जनाः सुखमिच्छन्ति, सर्वे ज्ञानेन विभवेन च सम्पन्ना भवितुं प्रयतन्ते तथापि किमर्थं सर्वेषां कृते तन्न सम्भवति ?

**साधना** – अत्यन्तं समुचितं प्रसङ्गमुपस्थापितवती त्वम् ।

**शोभा** - एष प्रश्नोऽद्यैव न समुत्पन्नो मदीये मनसि । एतस्मिन् विषये तु अहं बहुभ्यो दिनेभ्यः पूर्वत एव चिन्तयन्ती आसम् ।

**साधना** – तर्हि बहुदिनानि यावच्चिन्तनेन जिज्ञासायाः किञ्चन समाधानं तु अवश्यं स्फुरितं स्यात् ।

**शोभा -** सम्प्रति किञ्चन उत्तरं तु मम मस्तिष्केऽपि सञ्चरति एव, तथापि वक्तुं नेच्छामि ।

**साधना -** किमर्थं वक्तुं नेच्छसि ? वद वद ! प्रथमं तवोत्तरं शृणोमि, तत एवाहमपि किञ्चिद् वदिष्यामि ।

**शोभा -** शृणु तावत् । जनानां ज्ञानाभावस्य विभवाभावस्य च मूलं कारणमालस्यमेव स्यात् इति मम विचारः ।

**साधना -** उचितं कथितं त्वया । आलस्यमेव तन्मूलमिति तु अहमपि विचारयामि । यतो हि, अलसो जनो ज्ञानार्जनाय श्रमं न करोति, न च धनार्जनाय ।

**शोभा -** अस्माकमाचार्यः पाठितवानेव- 'अलसस्य कुतो विद्या अविद्यस्य कुतो धनम् ?' इति ।

**साधना -** आम् आम्, स्मरामि । परन्तु धनार्जनाय अपरञ्च एकं महद् बाधकतत्त्वं वर्तते– असत्यभाषणम् । असत्यभाषिणि जना न विश्वसन्ति । विश्वासेन विना कथं धनार्जनम् ?

**शोभा -** अत्र तु अहङ्कारोऽपि कारणम् । अहङ्कारी जनो न कमपि परिगणयति । अतस्तादृशो जनः कस्मैचिदपि न रोचते । सर्वे तं परित्यजन्ति । सर्वैः परित्यक्तस्तादृशो जनः कथं ज्ञानवृद्धिं धनवृद्धिं च कर्तुं शक्नुयात् ?

**साधना -** अस्माभिश्छात्रैरपि आलस्यम्, असत्यभाषणम्, अहङ्कारं च परित्यज्य ज्ञानार्जनाय प्रयतितव्यम् । उचितं कथितं वा मया ?

**शोभा -** आम् आम् । शतप्रतिशतमुचितम् । अस्माकं पितापि कथयति यत्-

**'विद्या ददाति विनयं विनयाद् याति पात्रताम् ।**
**पात्रत्वात् धनमाप्नोति धनाद् धर्मः ततो सुखम्' इति ।**

**साधना -** आम्, शोभनम् । विद्यां तु न कश्चन तिरस्कर्तुं शक्यते । प्रमादोऽपि प्रगतेरभावस्य कारणमस्ति इति मम विचारः । उपनिषत्स्वपि तथैव लिखितमिति मम माता कथयति ।

**शोभा -** उपनिषदि किं लिखितमिति कथयति माता ?

**साधना –** सत्यं वद । धर्मं चर । स्वाध्यायान्मा प्रमद । सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम् । कुशलान्न प्रमदितव्यम् । भूत्यै न प्रमदितव्यम् । स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यमित्यादिकम् ।

**शोभा –** अतीव शोभनम् । उपनिषदो निर्देशनमतीव हितकारि अस्ति । तर्हि अद्यात्रैव विरम्य अध्ययनार्थं गच्छाव । स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् । पुनर्मेलिष्याव: ।

**साधना –** अस्तु, धन्यवाद: ।

## शिक्षणालोक:

पाठस्य माध्यमेन ज्ञानप्राप्तये केषां परित्यागोऽपेक्षित इति विषये छात्रा: सम्यक् शिक्षणीया: । आलस्यादियुक्ता जना ज्ञानधनप्राप्तौ कथं वैफल्यं भजन्ते ? इति विषये विविधान् कथादीनन्विष्य ते श्रावणीया: ।

# अभ्यास:

## पाठानुशीलनम्

१. **संवादं साभिनयं पठत ।**

२. **शुद्धमुच्चारयत**

धन्यवाद:, अध्ययनार्थम्, परित्यजन्ति, धनवृद्धिम्, शक्नुयात्, शतप्रतिशतम्, परिगणयति, विश्वसन्ति, असम्पन्नताया:, बहुदिनानि, स्फुरितम्, वितर्द्याम्, समुत्पन्ना, कुर्वन्त्यौ, प्रयतन्ते, समुपविश्य, अद्यैव, प्रयतितव्यम् ।

३. **सत्यकथनं ☑ चिह्नेन असत्यकथनं च ☒ चिह्नेन निर्दिशत**

(क) असत्यभाषणं धनार्जनाय एकं महद् बाधकतत्त्वम् । .....................

(ख) ज्ञानाभावस्य धनाभावस्य च मूलं कारणमालस्यम् । ......................

(ग) 'अलसस्य कुतो विद्या अविद्यस्य कुतो धनम् ?' इति एकश्छात्र: कथितवान् । ...........

(घ) सर्वे जनाः सुखमिच्छन्ति । ...........

(ङ) शोभा साधना च गृहवाटिकायां समुपविश्य संलपतः । ...........

(च) साधनाया मनसि एका जिज्ञासा समुत्पन्ना । ...........

४. **कथयितुर्नाम रिक्तस्थाने लिखत**

(क) अत्यन्तं समुचितं प्रसङ्गमुपस्थापितवती त्वम् । ..................

(ख) एषः प्रश्नोऽद्यैव न समुत्पन्नो मदीये मनसि । ..................

(ग) किमर्थं वक्तुं नेच्छसि ? ..................

(घ) विश्वासेन विना कथं धनार्जनम् ? ..................

(ङ) उचितं कथितं वा मया ? ..................

(च) अद्यात्रैव विरम्य अध्ययनार्थं गच्छाव । ..................

(ज) अस्माकं पितापि कथयति यत्- 'विद्या ददाति विनयम्' .................

५. **संवादस्य सारांशं कथयत ।**

६. **उपयुक्तेन विकल्पेन रिक्तस्थानं पूरयत**

(क) ज्ञानधनयोरभावस्य मूलं कारणम् ..................... ।

(अ) आलस्यम्

(आ) उद्यमशीलत्वम्

(ख) .................. धनार्जनाय अपरं बाधकतत्त्वम् ।

(अ) सत्यभाषणम्

(आ) असत्यभाषणम्

(ग) सर्वे .............................. जनं परित्यजन्ति ।

(अ) सदाचारिणम्

(आ) अहङ्कारिणम्

(घ) छात्रैरालस्यमसत्यभाषणम् .........................च परित्यज्य ज्ञानमर्जनीयम् ।

(अ) अहङ्कारम्

(आ) ज्ञाननिष्ठाम्

**७. सङ्क्षेपेण उत्तरयत**

(क) कस्या मनसि जिज्ञासा समुत्पन्ना ?

(ख) सर्वे जनाः किमिच्छन्ति ?

(ग) शोभा कीदृशं प्रसङ्गमुपस्थापितवती ?

(घ) ज्ञानेन विभवेन च असम्पन्नताया मूलं कारणं किम् ?

(ङ) को ज्ञानार्जनाय धनार्जनाय च श्रमं न करोति ?

(च) जनाः कस्मिन् न विश्वसन्ति ?

(छ) कीदृशो जनः कमपि न परिगणयति ?

(ज) केऽहङ्कारिणं परित्यजन्ति ?

**८. अधस्तनानि पदानि प्रयुज्य वाक्यानि रचयत**

अलसः, कुतः, सत्यभाषणम्, सञ्चरति, वदिष्यामि, उत्तरम्, वक्तुम्, समाधानम् ।

**९. अधोलिखितानां पदानां परिचयं दत्त**

**यथा–**

| | | | |
|---|---|---|---|
| छात्रैः | **शब्दः** | – | छात्र |
| | **लिङ्गम्** | – | पुंलिङ्गम् |
| | **विभक्तिः** | – | तृतीया |
| | **वचनम्** | – | बहुवचनम् |

(क) आलस्यम् (ख) विद्या

(ग) मस्तिष्के (घ) जिज्ञासायाः

## १०. परस्परं मेलयत

| विशेषणानि | विशेष्याणि |
|---|---|
| एका | विषये |
| समुचितम् | दिनेभ्यः |
| एतस्मिन् | जिज्ञासा |
| बहुभ्यः | प्रसङ्गम् |
| किञ्चन | बाधकतत्त्वम् |
| महत् | समाधानम् |

## ११. अधस्तनश्लोकान् पठित्वा प्रश्नानुत्तरयत

सुखार्थी चेत् त्यजेत् विद्यां विद्यार्थी चेत् त्यजेत् सुखम् ।
सुखिनस्तु कुतो विद्या विद्यार्थिनि कुतः सुखम् ॥
न भोजनविलम्बी स्यात् न च नारीनिबन्धनः ।
सुदूरमपि विद्यार्थं व्रजेत् गरुडहंसवत् ॥
गुरुशुश्रूषया विद्या पुष्कलेन धनेन वा ।
अथवा विद्यया विद्या चतुर्थो नोपलभ्यते ॥
शतेन गुणिता याति सहस्रेण च तिष्ठति ।
शतानां च सहस्रेण प्रेत्य चेह च तिष्ठति ॥
जलमभ्यासयोगेन शैलानां कुरुते क्षयम् ।
कर्कशानां मृदुस्पर्शः किमभ्यासान्न साध्यते ॥

### (अ) एकपदेनोत्तरयत

(क) कीदृशी विद्या याति ?

(ख) जलं कथं शैलानां क्षयं कुरुते ?

(ग) विद्यार्थी किं त्यजेत् ?

(घ) विद्यार्थी विद्यार्थं कुत्र व्रजेत् ?

(ङ) सुखार्थी किं त्यजेत् ?

**(आ) एकवाक्येनोत्तरयत**

(क) विद्यार्जनस्य उपायाः के ?

(ख) कीदृशी विद्या जीवनपर्यन्तं तिष्ठति ?

(ग) विद्यार्थी कीदृशो न भवेत् ?

(घ) अभ्यासात् किं किं साध्यते ?

**(इ) उपरितनश्लोकान् पठित्वा विद्यार्थिनां लक्षणानि वर्णयत ।**

१२. **अधस्तनश्लोकं पठित्वा धनस्य महत्त्वं प्रतिपादयत**

यस्यास्ति वित्तं स नरः कुलीनः,
सः पण्डितः सः श्रुतवान् गुणज्ञः ।
स एव वक्ता स च दर्शनीयः
सर्वे गुणाः काञ्चनमाश्रयन्ति ॥

१३. **समयस्य महत्त्वमिति विषये गुरुच्छात्रयोः संवादं रचयत ।**

## व्यवहारानुशीलनम्

१. **धनार्जनाय ज्ञानार्जनाय च पाठे प्रस्तुतानि बाधकतत्त्वानि युष्मासु वर्तन्ते न वा ? वर्तन्ते चेत् तेषां निराकरणं कथं कर्तुं शक्यते ? परामृशत ।**

२. **ज्ञानवृद्धये किं किं करणीयम् ? इति विषये पाठमाधृत्य स्वविचारेण चैकं लघुप्रबन्धं विलिख्य कक्षायां श्रावयत ।**

३. **'असत्यभाषणम्' कथं धनार्जनाय बाधकं भवतीति उदाहरणमुखेन कथयत ।**

४. **ज्ञानार्जनाय परित्यक्तव्यानि बाधकतत्त्वानि कर्गजपट्टे स्थूलाक्षरैर्विलिख्य स्वगृहेऽध्ययनकक्षस्य भित्तौ संयोजयत तस्य प्रतिदिनं दर्शनेन स्वजीवने कीदृशं व्यावहारिकं परिवर्तनं सञ्जातम् ? अनुभवं श्रावयत ।**

## ५. समुचितमुत्तरं परिचिनुत

**(क) भवान् शास्त्राणामाज्ञां परिपालयति न वा ?**

(अ) सदैव पालयामि ।
(आ) कदाचित् पालयामि ।
(इ) न पालयामि ।
(ई) मनसि परिलग्ने पालयामि ।

**(ख) ज्ञानार्जनाय भवान् किं करोति ?**

(अ) असत्यभाषणम् त्यजामि ।
(आ) आलस्यम् त्यजामि ।
(इ) अहङ्कारं त्यजामि ।
(ई) उपरितनं सर्वं करोमि ।

**(ग) भवान् धनं कथम् आर्जयति ?**

(अ) चौरकर्मणा
(आ) उत्कोचमाध्यमेन
(इ) परिश्रमेण
(ई) आलस्येन

**(घ) भवान् सुखप्राप्तये किं करोति ?**

(अ) येन केनापि प्रकारेण धनम् आर्जयामि ।
(आ) स्वाध्यायप्रवचनाभ्यां प्रमादं करोमि ।
(इ) सदैव स्वपिमि ।
(ई) फलाशां परित्यज्य स्वकर्म करोमि ।

# चतुर्दशः पाठ

# भोजनामृतम्

पश्य कर्मवशात् प्राप्तं भोज्यकालेऽपि भोजनम् ।
हस्तोद्यमं विना वक्त्रे प्रविशेन्न कथञ्चन ॥१॥
आसने शयने याने पानभोजनवस्तुषु ।
दृष्ट्वान्तरं प्रमत्तेषु प्रहरन्त्यरयोऽरिषु ॥२॥
भूशय्या ब्रह्मचर्यं च कृशत्वं लघुभोजनम् ।
सेवकस्य यतेर्यद्वद्विशेषः पापधर्मजः ॥३॥
आसनाच्छयनाद्यानात् सङ्गतेश्चापि भोजनात् ।
कृते सञ्चरते पापं तैलविन्दुरिवाम्भसि ॥४॥
अमृतं शिशिरे वह्निरमृतं प्रिय-दर्शनम् ।
अमृतं राज-सम्मानममृतं क्षीर-भोजनम् ॥५॥

**१**
**पदच्छेदः**

पश्य, कर्म-वशात्, प्राप्तम्, भोज्य-काले, अपि, भोजनम्, हस्त-उद्यमम्, विना, वक्त्रे, प्रविशेत्, न, कथञ्चन ।

### अन्वयः

कर्मवशाद् भोज्यकाले प्राप्तं भोजनम् अपि हस्तोद्यमं विना वक्त्रे कथञ्चन न प्रविशेत्, पश्य ।

**सरलार्थः**

भाग्यस्य कारणेन भोजनस्य समये एव प्राप्तं भोजनमपि उद्यमेन विना मुखे न प्रविशति। बुभुक्षाशमनाय तत्र हस्तेन परिश्रमोऽवश्यं कर्तव्यः, नोचेत् स्वाग्रे भोजने वर्तमानेऽपि जनो बुभुक्षित एव भवति। भाग्यं स्वकर्मसम्पादनायोद्यमस्य साहाय्यमपेक्षते। उद्यमेन विना तत् कथमपि कार्यं कर्तुं न शक्नोति। अतो भाग्यस्य फलीभवनाय उद्यमोऽपरिहार्यो वर्तते।

**२**
**पदच्छेदः**

आसने, शयने, याने, पान-भोजन-वस्तुषु, दृष्ट्वा, अन्तरम्, प्रमत्तेषु, प्रहरन्ति, अरयः, अरिषु।

**अन्वयः**

अरयः आसने, शयने, याने, पानभोजनवस्तुषु अन्तरं दृष्ट्वा प्रमत्तेषु अरिषु प्रहरन्ति।

**सरलार्थः**

शत्रूणां नियन्त्रणाय शत्रवोऽनेकानुपायान् कुर्वन्ति। यावत्कालपर्यन्तं शत्रूणां छिद्रं न लभ्यते, तावत्कालपर्यन्तं शत्रवो मौनमाकलयन्ति। यत्र शत्रूणां छिद्रं दृश्यते, शत्रवः तेषां नियन्त्रणाय तत्रैव प्रहरन्ति। छिद्राणि च चारमाध्यमेन शत्रवोऽवगच्छन्ति। शत्रवस्तेषां छिद्रान्वेषणं आसनस्य विषये, शयनस्य विषये, यात्रायाः विषये, पानवस्तूनां विषये, भोजनवस्तूनां विषये च कुर्वन्ति। अतस्तेषु विषयेषु जनैः सर्वदा सावधानताऽवलम्बनीया।

**३**
**पदच्छेदः**

भू-शय्या, ब्रह्मचर्यम्, च, कृशत्वम्, लघु-भोजनम्, सेवकस्य, यतेः, यद्वत्, विशेषः, पाप-धर्मजः।

**अन्वयः**

भूशय्या, ब्रह्मचर्यम्, कृशत्वम्, लघुभोजनं च यद्वत् सेवकस्य यतेः पापधर्मजः विशेषः।

**सरलार्थः**

यथा सेवको भूमौ शयनं करोति, ब्रह्मचर्यं पालयति, कृशो भवति, स्वल्पमेव भोजनं करोति, तथैव साधुस्वभावो यतिरपि भूमौ शयनं करोति, ब्रह्मचर्यं पालयति, कृशो भवति, स्वल्पमेव भोजनं करोति । यद्यपि आचरणे यतिसेवकयोस्तुल्यत्वं दृश्यते, तथापि तयोः प्रयोजनेऽन्तरं वर्तते । सेवकः स्वस्य पूर्वतनानां पापानां निवारणाय अर्थाद् दुःखेभ्यो निवृत्तये तथाऽऽचरणं करोति चेद् यतिर्भविष्यति भगवत्पदप्राप्त्यर्थं पुण्यलाभाय अर्थात् सुखप्राप्तये तथाऽऽचरणं विधत्ते । अतो भूशय्यादयो लघुभोजनान्ता गुणा दुःखानां निवृत्तिं विधाय जनेभ्यः सुखं यच्छन्ति ।

**३**
**पदच्छेदः**

आसनात्, शयनात्, यानात्, सङ्गतेः, च, अपि, भोजनात्, कृते, सञ्चरते, पापम्, तैल-विन्दुः, इव, अम्भसि ॥

**अन्वयः**

आसनात्, शयनात्, यानात्, सङ्गतेः, भोजनात् च अम्भसि तैलविन्दुः इव कृते पापं सञ्चरते ।

**सरलार्थः**

पापिभिः सह एकाधिष्ठाने उपवेशात्, एकशयने शयनात्, युगपद्गमनात्, निरन्तरं सङ्गमनात्, एकसमूहे भोजनात् च तेषां पापमस्मान् स्पृशति । यथा जले तैलविन्दुः सञ्चरति, तथैव पापमपि अस्माकं कृत्येषु सञ्चरति । अतः कथञ्चन पापिनां सङ्गतिर्न विधेया ।

**४**
**पदच्छेदः**

अमृतम्, शिशिरे, वह्निः, अमृतम्, प्रिय-दर्शनम्, अमृतम्, राज-सम्मानम्, अमृतम्, क्षीर-भोजनम् ।

**अन्वयः**

शिशिरे वह्निः अमृतं (भवति) । प्रियदर्शनं च अमृतं (भवति) । राजसम्मानम् (अपि) अमृतं भवति । क्षीरभोजनम् (अपि) अमृतं (भवति) ।

**सरलार्थः**

शीतकाले जनः अग्निममृततुल्यं मनुते । यदा प्रियस्य दर्शनं भवति, तदापि जनः अमृतस्यानुभवं करोति । राज्ञा यदि स्वस्य सम्मानं विधीयते, तदापि जनः अमृतमनुभवति । पयसा साकं कृते भोजनेऽपि जनः अमृतानुभूतिं करोति । अतोऽमृतं नाम सुखमेव । यस्मात् सुखप्राप्तिर्भवति, तदेव वस्तु जनस्य कृतेऽमृततुल्यं भवति ।

## शिक्षणालोकः

अस्य पाठस्याधारे छात्राः भोजनस्य, भोजनाचारस्य, श्रमस्य च महत्त्वविषये बोधनीयाः । जीवनाय भोजनस्य, भोजनाय च श्रमस्यापरिहार्यत्वं संसूच्य 'भोजनं कथं कर्तव्यम्, कीदृशं च भोजनं कर्तव्यम् ?' इति विषये च छात्रा ज्ञापनीयाः । तदर्थं शिक्षकेण भोजनसम्बद्धानन्यान् श्लोकान्, कथाप्रसङ्गान्, सात्त्विकभोजनतालिकादिकं चान्विष्य कक्षायां तेषां प्रयोगः कार्यः ।

# अभ्यासः

## पाठानुशीलनम्

१. **शुद्धमुच्चारयत**

भोज्यकाले, वक्त्रे, दृष्ट्वा, भूशय्या, यद्वत्, सङ्गतेः, अम्भसि, वह्निः ।

२. **अधः प्रदत्तानां पदानां शुद्धतया पुनर्लेखनं कुरुत**

हस्तोद्यमम्, कथञ्चन, शयने, प्रहरन्ति, भूशय्या, सेवकस्य, सञ्चरते, क्षीरभोजनम् ।

३. **अधःस्थानां पदानां श्लोकसम्मतमर्थं लिखत**

पश्य, वक्त्रे, अन्तरम्, अरयः, कृशत्वम्, यतेः, यानात्, अम्भसि, वह्निः

४. **अधःप्रदत्तं श्लोकं शुद्धतयोच्चारयत**

आसनाच्छयनाद्यानात् सङ्गतेश्चापि भोजनात् ।
कृते सञ्चरते पापं तैलविन्दुरिवाम्भसि ॥

**५. अधस्तनस्य श्लोकस्य पदच्छेदं कृत्वा श्रावयत**

भूशय्या ब्रह्मचर्यं च कृशत्वं लघुभोजनम् ।
सेवकस्य यतेर्यद्वद्विशेषः पापधर्मजः ॥

**६. प्रदत्तस्य श्लोकस्यान्वयं कथयत**

अमृतं शिशिरे वह्निरमृतं प्रिय-दर्शनम् ।
अमृतं राज-सम्मानममृतं क्षीर-भोजनम् ॥

**७. अधो लिखितस्य श्लोकस्य स्वमातृभाषायामर्थं वदत**

पश्य कर्मवशात् प्राप्तं भोज्यकालेऽपि भोजनम् ।
हस्तोद्यमं विना वक्त्रे प्रविशेन्न कथञ्चन ॥

**८. रिक्तस्थानं पूरयत**

(क) भाग्यस्य फलीभवनाय ........ अपरिहार्यो वर्तते ।

(ख) शत्रूणां ............. शत्रवः अनेकान् उपायान् कुर्वन्ति ।

(ग) सेवकः स्वस्य .......... निवारणाय भूशय्यादिकं करोति ।

(घ) ........ सङ्गत्या पापमस्मान् स्पृशति ।

(ङ) यस्मात् सुखप्राप्तिर्भवति, तद् जनस्य कृते .......... भवति ।

**९. परस्परं मेलयत**

| | |
|---|---|
| पश्य | पापधर्मजः |
| आसने | भोजनम् |
| भूशय्या | अम्भसि |
| आसनात् | कथञ्चन |
| अमृतम् | अरिषु |

**१०. अधोऽङ्कितस्य श्लोकस्य संस्कृतभाषायां सरलार्थं निगदत**

आसने शयने याने पानभोजनवस्तुषु ।
दृष्ट्वान्तरं प्रमत्तेषु प्रहरन्त्यरयोऽरिषु ॥

**११. पाठस्य पञ्चमं श्लोकमाधृत्य उत्तरयत**

(क) शिशिरर्तौ किममृततुल्यं भवति ?

(ख) प्रियदर्शनं केन तुल्यं भवति ?

(ग) केन विहितं सम्मानममृतेन समं मन्यते ?

(घ) केन साकं कृतं भोजनममृतोपमं कथ्यते ?

(ङ) अमृतं नाम किम् ?

**१२. अधस्तनान् प्रश्नानुत्तरयत**

(क) केन विना भोजनं मुखे न प्रविशति ?

(ख) स्वकर्मसम्पादनाय भाग्यं कस्य साहाय्यमपेक्षते ?

(ग) कियत्कालपर्यन्तं शत्रवः मौनमाकलयन्ति ?

(घ) शत्रवः कथं शत्रूणां छिद्रान्वेषणं कुर्वन्ति ?

(ङ) कौ स्वल्पमेव भोजनं कुरुतः ?

(च) यतेर्भूमिशयनादीनां प्रयोजनं किम् ?

(छ) पापिभिः सह युगपद्गमनात् किं जायते ?

(ज) कथञ्चन केषां सङ्गतिर्न विधेया ?

(झ) कस्य दर्शनममृतेन समं मन्यते ?

**१३. पाठस्य प्रथमं श्लोकमाधृत्य उद्यमस्य महत्त्वं स्वभाषया प्रकाशयत ।**

**१४. दुःसङ्गतेः फलं किम् ? पाठस्य चतुर्थं श्लोकमनुसृत्य वर्णयत ।**

**१५. केषु विषयेषु जनैः सावधानताऽवलम्बनीया ? पाठगतं द्वितीयं श्लोकमाधृत्य लिखत ।**

**१६. यतिसेवकयोः को भेदः ? पाठस्य तृतीयश्लोकानुसारेण लिखत ।**

**१७. 'अमृतं क्षीरभोजनम्' इति विषये स्वभाषया एकमनुच्छेदं रचयत ।**

**१८. योगः कस्य दुःखं नाशयति ? शिक्षकस्य साहाय्येनाधस्तनस्य पद्यस्यार्थं बुद्ध्वा लिखत**

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥

**१९. कीदृशं फलं न भक्षणीयम् ? अधस्तनं पद्यमाधृत्य प्रस्तुत**

व्याधितं कृमिजुष्टं च पाकातीतमकालजम् ।
वर्जनीयं फलं सर्वमपर्यागतमेव च ॥

**२०. अधस्तनम् अनुच्छेदं पठित्वा प्रश्नानुत्तरयत**

अस्मिन् संसारे सर्वे प्राणिन आहारं गृह्णन्ति । जीवनरक्षार्थमाहारस्य अतीवावश्यकता भवति । 'मानवस्याहारः कीदृशो भवेत्' इति विषये विज्ञा उपदिशन्ति-'बाल्यकालाद् वृद्धावस्थापर्यन्तमस्माकमाहारः सन्तुलितो भवेत् ।' सद्यःप्रसूतः शिशुर्मातुर्दुग्धमेव पिबति । मातुर्दुग्धं पौष्टिकं भवति । पौष्टिकेनाहारेण शिशवः संवर्धन्ते । सर्वेभ्यो जनेभ्य आहारे पौष्टिकताया महती आवश्यकता भवति नोचेत् ते दुर्बला अशक्ताश्च भविष्यन्ति । अस्माकमाहार उष्णः, स्निग्धः, स्वादयुक्तश्च भवेत् । मानवो मितभोगी भवेद् अन्यथा अजीर्णं भविष्यति, वैद्याः कथयन्ति- 'अजीर्णत्वं रोगस्य प्रमुखं कारणमस्ति ।' प्रसन्नचित्तः सन् स्वच्छस्थाने संयमेन उपविश्य जनो नात्यधिकं नातिद्रुतमाहारं कुर्यात् । आहारः सात्त्विको भवति चेत् विचारः सात्त्विको भवति । सात्त्विकेन विचारेण युक्तो जनः कदापि दुःखं नानुभवति, स दीर्घायुष्यं च लभते । अतः सर्वथा सात्त्विक आहारो ग्रहीतव्यः । सात्त्विकाहारस्य विषये श्रीमद्भगवद्गीता कथयति-

**आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्धनाः ।**
**रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः ॥**

**(क) एकपदेनोत्तरयत**

(अ) सर्वे प्राणिनः किं गृह्णन्ति ?

(आ) कीदृशः शिशुर्मातुर्दुग्धं पिबति ?

(इ) किं रोगस्य प्रमुखं कारणमस्ति ?

(ई) सात्त्विकेन विचारेण युक्तो जनः किं नानुभवति ?

**(ख) एकवाक्येनोत्तरयत**

(अ) किमर्थमाहारस्यावश्यकता भवति ?

(आ) कुतः कदापर्यन्तमाहारः सन्तुलितो भवेत् ?

(इ) केन शिशवः संवर्धन्ते ?

(ई) जनाः कदा दुर्बला अशक्ताश्च जायन्ते ?

(उ) जनः कथमाहारं कुर्यात् ?

(ऊ) को दीर्घायुष्यं लभते ?

**(ग) अनुच्छेदे प्रदत्तस्य श्लोकस्याधारेण सात्त्विकमाहारं परिभाषयत ।**

## व्यवहारानुशीलनम्

१. **अस्माभिः प्रतिदिनं प्रायेण वारद्वयं वारत्रयं वा भोजनं क्रियते । युष्माकं गृहे प्रतिदिनं प्रतिवारं किं किं भोजनं निर्मितमासीत् । एकस्य सप्ताहस्य सारिणीं निर्माय प्रस्तुत ।**

२. **स्वस्थकराणां हानिकराणां च भोजनानां सूचीं निर्माय कक्षायां प्रदर्शयत ।**

३. **'भोजनं कीदृशं कार्यम् ?' इति विषये कक्षायाः सर्वेषां सखीनां मतं श्रुत्वा निष्कर्षं श्रावयत ।**

४. **समुचिते विकल्पे स्वविचारेण (✓) चिह्नं दत्त**

(क) तुभ्यं कीदृशं भोजनं रोचते ?

(अ) सात्त्विकम् (आ) राजसम् (इ) तामसम्

(ख) मार्गे कश्चन वणिग् जलपुरिकाया व्यापारं कुर्वन् अस्ति । तव सुहृत् तद् भुञ्जानो वर्तते । त्वं किं करोषि ?

(अ) अहमपि तत्र गत्वा खादामि ।

(आ) सुहृदम् अपि निवारयामि ।

(इ) किमपि अकृत्वा ततो गच्छामि ।

(ग) विद्यालयाद् गृहं प्रति प्रत्यावर्तने विलम्बोऽभवत् । बुभुक्षयाऽत्यन्तं पीडितोऽसि । गृहं प्राप्य किं करोषि ?

(अ) प्रथमं महानसं प्रविश्य आहारान्वेषणं करोमि ।

(आ) शय्यां सुप्त्वा आहारप्रदानार्थं मातरमाकारयामि ।

(इ) पुस्तकादिकं संस्थाप्य हस्तौ पादौ प्रक्षाल्य मातरमाहारं याचे ।

(घ) त्वं भोजनपीठिकायां स्थितोऽसि । माता तव पुरो भोजनमस्थापयत् । पिता भोजनं गृहीत्वा देवेभ्यो भोजनं समर्प्य भोजनं प्रार्थयन्नस्ति । त्वं किं करोषि ?

(अ) किमपि अकृत्वा भोजनमारभे ।

(आ) भोजनं प्रार्थयित्वा खादितुमारभे ।

(इ) पितरमन्धविश्वासिनं मत्वा तथा न कर्तुं कथयामि ।

# कर्तव्यपालनं धर्मः

प्राचीनकाले कस्मिँश्चित् वने एको मुनिर्वसति स्म । तपसा ततेन बहूनि वर्षाणि व्यतीतानि । वनस्य निकटे एव एको ग्राम आसीत् । स भिक्षाटनार्थं तत्रैव ग्रामे गच्छति स्म ।

एकदा स भोजनानन्तरं तरोर्नीचैश्छायायामुपविष्ट आसीत् । तरुशाखायां स्थिता एका बलाका विष्टामुदसृजत् । विष्टा मुनेर्मस्तकेऽपतत् । क्रुद्धो मुनिरुपरि शाखामपश्यत् । बलाका तत्रैवासीत् । मुनेः क्रोधदृष्ट्या बलाका भस्मसादभूत् । क्रोधदृष्ट्या दर्शनमात्रेण बलाका भस्मसात् कृतेति स्वकीयं तपःप्रभावं विज्ञायाश्चर्यान्वितः सोऽहङ्कारम् उपगतः ।



एकस्मिन् दिने स भिक्षाटनाय ग्रामं गत आसीत् । तत्र स एकं ब्राह्मणगृहं प्राप्य भिक्षामयाचत । तस्मिन् गृहे ब्राह्मणदम्पती आस्ताम् । गृहिणी श्वशुरयोः सेवायां निरताऽऽसीत् । अतः सा बहिरागत्य मुनिमवदत्, "प्रतीक्षस्व क्षणम्, यावत् श्वशुरयोः सेवां समापये" इति । एतन्निशम्य

अहङ्कारी मुनिः क्रोधदृष्ट्या तामपश्यत् । पतिव्रता सा विहस्य अवदत्, "मुने ! नाहं बलाका" इति । तच्छ्रुत्वा विस्मितो मुनिर्मौनीभूय तत्रैवोपाविशत् । यदा मुनेः क्रोधदृष्ट्या बलाका वने भस्मसात् सञ्जाता आसीत् तदा तत्र न कोऽपि आसीत् । अतो ब्राह्मणगृहिण्या तत् कथं ज्ञातमिति मुनेर्मनसि जिज्ञासा समुत्पन्ना ।

श्वशुरयोः सेवां समाप्य सा गृहिणी भिक्षां गृहीत्वा मुनेः समीपमागता । स च मुनिर्बद्धाञ्जलिः सन् तामपृच्छत्, "कथं भवत्या अनन्यज्ञेयो बलाकावृत्तान्तोऽवगतः ? उच्यताम् । तत एव भिक्षां ग्रहीष्यामि ।" साऽकथयत्, "मुने ! नहि श्वशुरसेवामृते कञ्चनापरं धर्मं करोमि । तत्प्रसादेनैव ममैतादृशं विज्ञानम् । विपण्यामेको धर्मव्याधनामको मांसविक्रयी वर्तते । तं प्रति गच्छतु । ततो भवतः कल्याणं जायते । भवान् निरहङ्कारश्च भविष्यति ।" एवं प्रकारेण सन्दिष्टो मुनिः भिक्षां स्वीकृत्य ततः प्रस्थितः ।

अपरेद्युर्मुनिर्विपणिस्थं धर्मव्याधमुपागच्छत् । धर्मव्याधो मांसानि विक्रीणान आसीत् । धर्मव्याधश्च मुनिं दृष्ट्वैवापृच्छत्, "मुने ! किं भवान् इह पतिव्रतया ब्राह्मण्या प्रेषितः ?" एतन्निशम्य मुनिः पुनश्च विस्मितो भूत्वाऽवदत्, "महाशय ! मांसविक्रयिणोऽपि भवतः कथमेतादृशं विज्ञानम् ?" स उदतरत्, "मुने ! मातापित्रोर्भक्तोऽहम् । तौ हि मम परायणम् । अहं तौ स्नापयित्वा एव स्नामि, भोजयित्वा भोजनं गृह्णामि, शाययित्वा च शयनं करोमि । तेन मे एतादृशं विज्ञानम् । मांसविक्रयार्थं पशून् नहि स्वयमेव निहन्मि । स्वधर्म इति मत्वा अन्यहतानां मृगादीनां मांसानि विक्रीणे । मांसविक्रयञ्च वृत्त्यर्थमेव करोमि, न तु धनसञ्चयलोभेन । हे मुने ! अहङ्कारस्तु ज्ञानविघ्नाय भवति । अतो निरहङ्कारः सन् स्वधर्मं चरतु । तेन परं कल्याणं प्राप्स्यसि ।"

धर्मव्याधस्योपदेशं प्राप्तवान् मुनिर्धर्मव्याधस्य गृहं गत्वा तस्य सर्वं क्रियाकलापं च दृष्टवान् । तेन सन्तुष्टो निरभिमानश्च सन् स वनं प्रति न्यवर्तत । पुनस्तपश्चरणेन स परां सिद्धिं प्राप्तवान् । अत एव भगवद्गीतायां प्रोक्तं भगवता श्रीकृष्णेन –

**"स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः ।"**

## शिक्षणालोकः

मातृदेवो भव, पितृदेवो भव इत्यादिवचनानां परिपालनाय, स्वस्य सर्वेषु क्षेत्रेषु स्वकर्तव्यस्य सम्यक् निर्वाहाय च छात्राः प्रेरयितव्याः ।

# अभ्यासः

## पाठानुशीलनम्

१. **पाठस्यान्तिमयोरनुच्छेदयोरनुलेखनं कुरुत ।**

२. **पाठं सस्वरं साभिनयं च पठत ।**

३. **पदविच्छेदं भावयन् सम्यगुच्चारयत**

अनन्यज्ञेयः, बलाकावृत्तान्तः, धर्मव्याधनामकः, मांसविक्रयिणः, अन्यहतानाम्, धनसञ्चयलोभेन, ज्ञानविघ्नाय, क्रोधदृष्ट्या, तपःप्रभावम्, दर्शनमात्रेण, प्राचीनकाले, ब्राह्मणगृहम्, तरुशाखायाम्, कर्तव्यपालनम् ।

४. **पदानि संशोध्य लिखत**

वसती स्म, भीक्षाटनार्थम्, उपविश्टः, मष्तिष्के, वीज्ञाय, मुनेः !, वलाका, मौनिभूय, प्रचीनकाले, समिपम्, स्विकृत्य, मांसविक्रयीणः, शाययीत्वा, प्राप्ष्यसि, संसिद्धीम्, लभति, श्रीकृश्णेन, सन्तुस्टः, न्यावर्तत ।

५. **पाठाधारेण उचितम् ☑ अनुचितं ☒ च कथनं निर्दिशत**

(क) मुनिर्भिक्षाटनाय नगरं गत आसीत् । ☐

(ख) विष्टा मुनेरङ्केऽपतत् । ☐

(ग) मुनिः स्वकीयं तपःप्रभावं ज्ञातवान् । ☐

(घ) पतिव्रता सा रुदित्वाऽवदत् । ☐

(ङ) मुनेर्नाम महातपा आसीत् । ☐

(च) ग्रामो वनस्य निकटे आसीत् । ☐

(छ) अग्निना ज्वलित्वा बलाका भस्मसात् कृता । ☐

(ज) मुनिर्धर्मव्याधस्य सर्वं क्रियाकलापं दृष्टवान् । ☐

६. **विशेषणानि चित्वा लिखत**

निरता, बद्धाञ्जलिः, क्रुद्धः, विपणिस्थः, निरभिमानः, आश्चर्यान्वितः, पतिव्रता, विक्रीणानः, सन्तुष्टः, अहङ्कारी ।

| मुनिः | गृहिणी | धर्मव्याधः |
|---|---|---|
| क्रुद्धः, ...... | ........ | ....... |

७. **पाठाधारेण उचितमुत्तरं लिखत** **वक्ता/वक्त्री** **श्रोता/श्रोत्री**

(क) प्रतीक्षस्व क्षणम् । ................ ................

(ख) कथं भवत्या अनन्यज्ञेयो बलाकावृत्तान्तेऽवगतः ? ............... ...............

(ग) मुने ! मातापित्रोर्भक्तोऽहम् । ............... ...............

(घ) न हि श्वशुरसेवार्मते कञ्चनापरं धर्मं करोमि । ............... ...............

(ङ) "महाशय ! मांसविक्रयिणोऽपि भवतः कथमेतादृशं विज्ञानम् ? ............... ...............

(च) निरहङ्कारः सन् स्वधर्मं चरतु । ............... ...............

८. **पदेषु प्रयुक्तानुपसर्गान् पृथक् कुरुत**

यथा– निरभिमानः = निर् + अभिमानः

प्रसिद्धिम्, उपविष्टः, उदसृजत्, प्रभावम्, विज्ञाय, प्राप्य, निरता, आगत्य, प्रतीक्षस्व, परिचर्याम्, समापये, निशम्य, विस्मितः, सञ्जाता, समुत्पन्ना, अवगतः, विक्रीणे, उपदेशम्, संसिद्धिम्, प्रोक्तम् ।

९. **एकवाक्येनोत्तरयत**

(क) मुनिः कुत्र वसति स्म ?

(ख) ग्रामः कस्य निकटे आसीत् ?

(ग) मुनेः क्रोधदृष्ट्या का भस्मसादभूत् ?

(घ) गृहिणी कस्य सेवायां निरताऽऽसीत् ?

(ङ) विस्मितो मुनिर्मौनीभूय किमकरोत् ?

(च) व्याधः किं करोति स्म ?

(छ) अपरेद्युर्मुनिः कमुपागच्छत् ?

(ज) मुनिः किं कृत्वा परां सिद्धिं प्राप्तवान् ?

**१०. पाठस्य सारांशं कथयत ।**

**११. कथां पठित्वा प्रश्नानुत्तरयत**

श्रवणकुमारस्य कथा रामायणे उल्लिखिता वर्तते । श्रवणकुमारः पितृभक्त आसीत् । स पित्रोः सेवायां दिनानि यापयति स्म । तस्य पितरौ द्रष्टुं न शक्नुतः स्म । एकदा दृष्टिरहितयोस्तयोः सेवायां निरतः स स्कन्धे दण्डं संस्थाप्य तस्य उभयत्र दोलकं निर्माय एकत्र पितरमपरत्र च मातरं समस्थापयत् । ततस्तौ नीत्वा वनं विहर्तुमगच्छत् । दिनस्य घर्मवशात् तौ पिपासाकुलौ अभवताम् । तौ पुत्रमकथयताम्, "पुत्र, आवां पिपासयाऽत्यन्तमाक्रान्तौ स्वः, कुत्रचिज्जलमस्ति चेदानय । तावत्कालपर्यन्तमावामत्रैव तिष्ठावः ।" तयोराज्ञया स वने जलमन्वेष्टुमगच्छत् ।

तस्मिन्नेव वने राजा दशरथ आखेटक्रीडार्थं गत आसीत् । श्रवणकुमारो कूपं प्राप्नोत् । तच्चानेतुं यदा भाण्डं जले न्यक्षिपत् तदा ध्वनिरागतः । दशरथो ध्वनिमशृणोत् । सोऽचिन्तयत्, "तत्रावश्यमेव कश्चित् मृगो भवेत्, जलपानार्थमागतः स्याद्" इति । ततो ध्वनिं लक्ष्यीकृत्य स बाणेन प्राहरत् । तस्य बाणेन श्रवणकुमारो हतः । तज्ज्ञात्वा सोऽतीव खिन्नो जातः । श्रवणकुमारस्य पित्रोः स एक एव सेवक आसीत् । तस्य वियोगस्य पीडां सोढुं तौ नाशक्नुताम् । ताभ्यां दशरथः शप्तः, "तवापि मरणं पुत्रवियोगेन भवेत्" इति । ततस्ताभ्यां प्राणाश्च विसृष्टाः । नेपालदेशस्य स्याङ्जामण्डलस्य 'आँधीखोला' इति नद्याः उद्गमस्थानमेव तत्स्थानं मन्यते यत्र श्रवणकुमारस्य मृत्युरभवत् । अद्यापि कर्तव्यपालकस्य पितृभक्तस्य चर्चायां प्राथम्येन श्रवणकुमारस्य नामैव गृह्यते ।

**(क) एकपदेनोत्तरयत**

(अ) श्रवणकुमारस्य कथा कुत्र प्राप्यते ?

(आ) श्रवणकुमारः पितरौ नीत्वा कुत्रागच्छत् ?

(इ) को जलमन्वेष्टुमगच्छत् ?

(ई) राजा केन प्राहरत् ?

(उ) काभ्यां दशरथः शप्तः ?

**(ख) एकवाक्येनोत्तरयत**

(अ) पित्रोः सेवायां निरतः श्रवणकुमारः किमकरोत् ?

(आ) पितरौ श्रवणकुमारं किमादिशताम् ?

(इ) कथं ध्वनिरागतः ?

(ई) दशरथः किमचिन्तयत् ?

(उ) दशरथः किमर्थं शप्तः ?

**१२. अधस्तनं पद्यं पठित्वा प्रश्नानुत्तरयत**

भोगे रोगभयं कुले च्युतिभयं वित्ते नृपालाद् भयम्,
माने दैन्यभयं बले रिपुभयं रूपे जराया भयम् ।
शास्त्रे वादभयं गुणे खलभयं काये कृतान्ताद् भयम्,
सर्वं वस्तु भयावहं भुवि नृणां वैराग्यमेवाभयम् ॥

**(अ) एकपदेनोत्तरयत**

(क) वृद्धावस्थायौ कुतो भयं भवति ?

(ख) शरीरे कस्माद् भयं भवति ?

**(आ) एकवाक्येनोत्तरयत**

(क) कुत्र दुष्टेभ्यो भयं भवति ?

(ख) भयरहितं किं वर्तते ?

(इ) **परस्परं मेलयत**

| **खण्डः 'क'** | **खण्डः 'ख'** |
|---|---|
| बले | दीनताया भयम् |
| कुले | रोगाद् भयम् |
| वित्ते | शत्रुभ्यो भयम् |
| माने | पतनाद् भयम् |
| भोगे | राज्ञो भयम् |

(ई) **पद्यस्योचितं शीर्षकं लिखत ।**

१३. **अधस्तनस्य पद्यस्य भावार्थं कक्षायां श्रावयत**

आकाशे चन्द्रमा भाति पद्मं भाति सरोवरे ।

सुपुत्रस्तु कुले भाति सज्जना धरणीतले ॥

चन्द्रमसः कारणेनाकाशस्य शोभा वर्धते । पद्मपुष्पाणां कारणेन सरोवरस्य शोभा वर्धते । सुपुत्रस्य कारणेन कुलस्य (परिवारस्य) शोभा वर्धते । सज्जनानां कारणेन च धरणीतलस्य शोभा वर्धते ।

## व्यवहारानुशीलनम्

१. **स्वस्य एकदिवसीयां दिनचर्यां वाक्यशो लिखित्वा स्वकर्तव्यपालनाय कृतानि कार्याणि चिह्नेन निर्दिशत ।**

२. **'कर्तव्यपालनं धर्मः' इति पाठस्य पठनानन्तरं यष्माकं व्यवहारे कीदृशं परिवर्तनं जातम् ? कक्षायां श्रावयत ।**

३. **धर्मव्याधस्य दिनचर्यां पाठाधारेण विलिख्य स्वस्य दिनचर्यायास्तया तुलनां विधत्त ।**

४. **समूहं निर्माय विद्यार्थिनः, नागरिकस्य, सन्ततेः, अभिभावकस्य च कर्तव्यविषये लिखित्वा कक्षायां विमृशत ।**

५. **समुचितविकल्पं चिनुत**

**(क) भगिनी गृहकार्यं शिक्षयितुं त्वामनुरुणद्धि चेत् किं करोषि ?**

(अ) शिक्षयामि । (आ) क्रुध्यामि ।

(इ) समयो नास्तीति वदामि । (ई) शिक्षकं प्रष्टुं कथयामि ।

**(ख) विद्यालयस्य पर्यावरणं दूषितमस्ति चेत् छात्रैः किं करणीयम् ?**

(अ) स्वच्छीकरणाय प्रधानाध्यापकः अनुद्धवेयः ।

(आ) सर्वैरेकीभूय पर्यावरणस्य शुद्धतायै कार्यं करणीयम् ।

(इ) नगरपालिकायै ग्रामपालिकायै वा सूचना दातव्या ।

(ई) विद्यालयस्य शुल्कस्य न्यूनतायै कथनीयम् ।

**(ग) मार्गे कञ्चनास्वस्थं जनं पश्यसि चेत् किं करोषि ?**

(अ) किमपि कर्तुं न शक्नोमि ।

(आ) तस्मै रूप्यकाणि यच्छामि ।

(इ) चिकित्सालये नेतु केनचिद् माध्यमेन तस्य परिवारजनं सूचयामि ।

(ई) कश्चिद् अवश्यमेव सहयोगं करोति इति मत्वा स्वगन्तव्यं प्रति चलामि ।

**(घ) क्रीडनसमये मित्रस्य पादे व्रणो जातश्चेत् प्रथमं किं कर्तव्यम् ?**

(अ) यस्य कारणेन व्रणो जातः अस्ति स ताडनीयः ।

(आ) कथं क्रीडनीयमिति शिक्षणीयम् ।

(इ) किमपि खाद्यकं दानीयम् ।

(ई) मित्रं विद्यालयस्योपचारकक्षे नयनीयम् ।

# स्वधर्मे निधनं श्रेयः

विद्वद्भिः सेवितः सद्भिर्नित्यमद्वेषरागिभिः ।
हृदयेनाभ्यनुज्ञातो यो धर्मस्तं निबोधत ॥१॥
अस्थिरं जीवितं लोके अस्थिरे धनयौवने ।
अस्थिराः पुत्रदाराश्च धर्म एको हि सुस्थिरः ॥२॥
आत्मधर्मं परित्यज्य परधर्मं समाश्रिताः ।
स्वयमेव लयं यान्ति यथा राज्यमधर्मतः ॥३॥
यो ध्रुवाणि परित्यज्य ह्यध्रुवं परिषेवते ।
ध्रुवाणि तस्य नश्यन्ति ह्यध्रुवं नष्टमेव हि ॥४॥
श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥५॥

**१**
**पदच्छेदः**

विद्वद्भिः, सेवितः, सद्भिः, नित्यम्, अद्वेषरागिभिः, हृदयेन, अभ्यनुज्ञातः, यः, धर्मः, तम्, निबोधत ।

### अन्वयः

यो धर्मः अद्वेषरागिभिः विद्वद्भिः नित्यं सेवितः (अस्ति), सद्भिः हृदयेन अभ्यनुज्ञातः (अस्ति) तं (धर्मम्) निबोधत ।

### सरलार्थः

रागद्वेषरहिता विद्वांसो यं मार्गं नित्यमनुसरन्ति, तथैव असूयादिदोषरहिता महात्मान आत्मना अनुसरणीयं मत्वा यं मार्गं हृदयेन स्वीकुर्वन्ति, तमेव मार्गं धर्ममार्गं ज्ञात्वा लोके सर्वैरपि मानवैः स एव मार्गोऽनुसरणीयः ।

**२**
**पदच्छेदः**

अस्थिरम्, जीवितम्, लोके, अस्थिरे, धनयौवने, अस्थिराः, पुत्रदाराः, च, धर्मः एकः, हि, सुस्थिरः ।

**अन्वयः**

लोके जीवितम् अस्थिरम् (अस्ति), धनयौवने अस्थिरे (स्तः), पुत्रदाराः अस्थिराः (सन्ति) । एकः धर्मः हि सुस्थिरः (अस्ति) ।

**सरलार्थः**

संसारे सर्वेषामपि प्राणिनां जीवनमस्थिरमस्ति, यतः प्राणिनां मृत्युर्यस्मिन् कस्मिन्नपि समये सम्भाव्यते । संसारेऽधुना प्रायशो मनुष्या धनार्जनायैव प्रयतमानाः सन्ति । धनार्जनाय स्वधर्ममपि त्यक्तुं ते उद्यता दृश्यन्ते । परं तद् धनमपि अस्थिरमस्ति, तद् धनं यस्मिन् कस्मिन्नपि समये नष्टं भवितुं शक्नोति । मानवा यौवनं प्राप्य दर्पं कुर्वन्ति । तद् यौवनमपि कालानन्तरं विनङ्क्ष्यति । अतस्तदपि अस्थिरमस्ति । एवं जनस्य स्त्रीपुत्रादयोऽपि अस्थिराः सन्ति । ते कियत्कालात्पूर्वमपि नासन्, पश्चादपि अवश्यमेव न भविष्यन्ति । संसारे धर्म एव सुस्थिरोऽस्ति । स एवास्मिन् संसारे हितं सम्पाद्य परलोकेऽपि सुखं दास्यति । अतो धर्मस्य पालनार्थं सर्वथा यतनीयम् ।

**३**
**पदच्छेदः**

आत्मधर्मम्, परित्यज्य, परधर्मम्, समाश्रिताः, स्वयम्, एव, लयम्, यान्ति, यथा, राज्यम्, अधर्मतः ।

**अन्वयः**

यथाऽधर्मतः राज्यं (स्वयमेव लयं याति), तथा आत्मधर्मं परित्यज्य परधर्मं समाश्रिताः जनाः स्वयमेव लयं यान्ति ।

**सरलार्थः**

यथाऽधर्मस्य वृद्ध्या राज्यं नष्टं भवति, तथैवाधर्ममाश्रिता जना अपि नष्टा भवन्ति । ये स्वस्य

धर्मं परित्यज्य अन्येषां धर्ममाश्रयन्ति, तेऽपि अधर्माश्रितं राज्यमिव, अधर्माश्रिता जना इव च स्वयमेव विनश्यन्ति । अतः कथञ्चिदपि स्वधर्मो न त्याज्यः ।

**४**
**पदच्छेदः**

यः, ध्रुवाणि, परित्यज्य, हि, अध्रुवम्, परिषेवते, ध्रुवाणि, तस्य, नश्यन्ति, हि, अध्रुवम्, नष्टम्, एव, हि ।

**अन्वयः**

यः ध्रुवाणि परित्यज्य अध्रुवं हि परिषेवते, तस्य ध्रुवाणि हि नश्यन्ति, हि अध्रुवं नष्टमेव (अस्ति)।

**सरलार्थः**

यः स्वधर्मरूपं निश्चितं वस्तु परित्यज्य परधर्मरूपमनिश्चितं वस्तु आश्रयति, स शून्यहस्तो भवति । यतः स्वजनाः स्वधर्माद् विच्युतं तं विधर्मिणं मत्वा न स्वीकुर्वन्ति चेत् परधर्मिणोऽपि तमन्यत आगतं मत्वा अपमानमेव कुर्वन्ति । अतस्तस्य निश्चितं स्वधर्मरूपं वस्तु अपि नश्यति परधर्मरूपमनिश्चितं वस्तु तु तस्य कृते आदित नष्टमेवासीत् ।

**५**
**पदच्छेदः**

श्रेयान्, स्वधर्मः, विगुणः, परधर्मात्, स्वनुष्ठितात्, स्वधर्मे, निधनम्, श्रेयः, परधर्मः, भयावहः ।

**अन्वयः**

स्वनुष्ठितात् परधर्माद् विगुणः अपि स्वधर्मः श्रेयान् (भवति) । स्वधर्मे निधनमपि श्रेयः (भवति चेत्) परधर्मः भयावहः (भवति) ।

**सरलार्थः**

परधर्मस्य आश्रयेण धनानि प्राप्यन्ते, ऐश्वर्यं लभ्यते, यदिष्यते तदधिगम्यते, स्वधर्मस्याश्रये दुःखमेव लभ्यते किञ्चिदपि ऐश्वर्यं न लभ्यते चेदपि स्वधर्मस्य आश्रय एव ग्रहणीयः । परधर्मः सर्वथा त्याज्यः । यतो गुणयुक्तात् परधर्माद् विगुणोऽपि स्वधर्मः श्रेयस्करो भवति ।

स्वधर्मस्याश्रयेण प्राप्तं निधनमपि श्रेयस्करं भवति चेत् परधर्मः सर्वदा भयङ्करो भवति । परधर्ममाश्रिता जनाः सर्वदा भयेन एव जीवन्ति ।

## शिक्षणालोकः

अस्य पाठस्य माध्यमेन छात्राः स्वधर्मस्य महत्त्वविषये बोधनीयाः । स्वधर्मं परित्यज्य दुःखं प्राप्तानां जनानां स्वधर्मपालनेन सफलतामधिगतानां जनानाञ्चोदाहरणेन सदैव स्वधर्मपालनार्थं छात्राः प्रेरणीयाः ।

# अभ्यासः

## पाठानुशीलनम्

१. **शुद्धमुच्चारयत**

विद्वद्भिः, अद्वेषरागिभिः, अस्थिरम्, पुत्रदाराः, परित्यज्य, समाश्रिताः, ध्रुवाणि, नश्यन्ति, श्रेयान्, स्वनुष्ठितात् ।

२. **अधः प्रदत्तानां पदानां शुद्धतया पुनर्लेखनं कुरुत**

सद्भिः, अभ्यनुज्ञातः, जीवितम्, सुस्थिरः, समाश्रिताः, अध्रुवम्, नष्टम्, विगुणः, निधनम् ।

३. **अधःस्थानां पदानां श्लोकसम्मतमर्थं लिखत**

नित्यम्, निबोधत, पुत्रदाराः, सुस्थिरः, परित्यज्य, लयम्, अध्रुवम्, परिषेवते, श्रेयान्, निधनम् ।

४. **अधोऽङ्कितं पद्यं शुद्धतया उच्चारयत**

विद्वद्भिः सेवितः सद्भिर्नित्यमद्वेषरागिभिः ।

हृदयेनाभ्यनुज्ञातो यो धर्मस्तं निबोधत ॥

**५. अधस्तनस्य पद्यस्य शुद्धतया लेखनं कुरुत**

आत्मधर्मं परित्यज्य परधर्मं समाश्रिताः ।
स्वयमेव लयं यान्ति यथा राज्यमधर्मतः ॥

**६. अधस्तनस्य पद्यस्य पदच्छेदं कृत्वाऽन्वयं च श्रावयत**

अस्थिरं जीवितं लोके अस्थिरे धनयौवने ।
अस्थिराः पुत्रदाराश्च धर्म एको हि सुस्थिरः ॥

**७. नेपालीभाषायामर्थं लिखत**

यो ध्रुवाणि परित्यज्य ह्यध्रुवं परिषेवते ।
ध्रुवाणि तस्य नश्यन्ति ह्यध्रुवं नष्टमेव हि ॥

**८. संस्कृतभाषायामर्थं लिखत**

श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥

**९. भावार्थं प्रकाशयत**

श्रेयान् स्वधर्मो विगुणः ।

**१०. पाठस्य प्रथमं पद्यमाधृत्य धर्मस्य लक्षणं प्रतिपादयत ।**

**११. परधर्मं समाश्रितस्य जनस्यावस्था कीदृशी भवति ? पाठगतस्य तृतीयश्लोकस्याधारेण उल्लिखत ।**

**१२. पाठस्य द्वितीयपद्यस्य सरलार्थमाधृत्य प्रदत्तान् प्रश्नानुत्तरयत**

(क) किमर्थं प्राणिनां जीवनमस्थिरमस्ति ?

(ख) धनार्जनाय जनाः किं त्यक्तुमुद्यता दृश्यन्ते ?

(ग) मानवाः किं प्राप्य दर्पं कुर्वन्ति ?

(घ) कः परलोकेऽपि सुखं ददाति ?

(ङ) सुस्थिरः कः ?

**१३. पाठस्य चतुर्थं श्लोकमनसृत्य ध्रुवाध्रुवयोः परिषेवणफलं निर्दिशत ।**

**१४. सङ्क्षेपेण उत्तरयत**

(क) सर्वैर्मानवैः कीदृशो मार्गोऽनुसरणीयः ?

(ख) लोके केऽस्थिराः सन्ति ?

(ग) राज्यं कथं नष्टं भवति ?

(घ) कीदृशा जनाः स्वयमेव लयं यान्ति ?

(ङ) कः शून्यहस्तो भवति ?

(च) स्वधर्माद् विच्युतं जनं स्वजनाः किमर्थं न स्वीकुर्वन्ति ?

(छ) कः श्रेयस्करो भवति ?

(ज) के सदा भयेन जीवन्ति ?

**१५. परस्परं मेलयत**

| | |
|---|---|
| विद्वद्भिः सेवितः | स्वधर्मः |
| अस्थिरम् | परधर्मः |
| अधर्मः | धर्ममार्गः |
| निश्चितः | जीवनम् |
| अनिश्चितः | नाशकरः |

**१६. रिक्तस्थानं पूरयत**

(क) महात्मानः............... मार्गं अनुसरन्ति । (धर्मस्य, दुष्कर्मणः, दुःखस्य)

(ख) ................अस्थिरं नास्ति । (धनम्, धर्मः, यौवनम् )

(ग) राज्यं ........... लयं याति । (लोकतन्त्रात्, गणतन्त्रात्, अधर्मात्)

(घ) परधर्मिणोऽन्यधर्मादागतस्य जनस्य ........ कुर्वन्ति । (पूजनम्, अपमानम्, सम्मानम्)

(ङ) स्वधर्मः ........... भवति । (श्रेयस्करः, कष्टकरः, पापकरः)

**१७. सत्यासत्यं विवेचयत**

(क) जनैर्विदुषां मार्गोऽनुसरणीयः ।

(ख) संसारे यौवनमस्थिरमस्ति ।

(ग) परधर्माश्रिता जनाः स्वयमेव विनश्यन्ति ।

(घ) जनस्याध्रुवं नष्टं न भवति ।

(ङ) परधर्मोऽभयं ददाति ।

**१८. अधस्तनं पद्यं पठित्वा प्रदत्तानां प्रश्नानाम् उत्तराणि दत्त**

को लाभो गुणिसङ्गमः किमसुखं प्राज्ञेतरैः सङ्गतिः,
का हानिः समयच्युतिर्निपुणता का धर्मतत्त्वे रतिः ।
कः शूरो विजितेन्द्रियः प्रियतमा काऽनुव्रता किं धनम्,
विद्या किं सुखमप्रवासगमनं राज्यं किमाज्ञाफलम् ॥

**(क) एकपदेनोत्तरयत**

(अ) लाभः कः ?

(आ) समयच्युतिः का ?

(इ) शूरः कः ?

(ई) धनं किम् ?

**(ख) एकवाक्येनोत्तरयत**

(अ) किमसुखं मन्यते ?

(आ) वस्तुतः का निपुणता अस्ति ?

(इ) का प्रियतमा भवति ?

(ई) राज्यं किम् अस्ति ?

**(ग) 'अप्रवासगमनं सुखम्' इति विषये स्वभाषया एकमनुच्छेदं लिखत ।**

**१९. वस्तुतो बान्धवाः के ? अधस्तनं पद्यं पठित्वा लिखत**

सत्यं माता पिता ज्ञानं धर्मो भ्राता दया सखा ।
शान्तिः पत्नी क्षमा पुत्रः षडेते मम बान्धवाः ॥

२०. **गद्यांशं पठित्वा प्रदत्तान् प्रश्नानुत्तरयत**

विज्ञानं प्रकृतेर्नियमानामध्ययनमस्ति । प्रकृतेः परिवर्तनस्य, प्रभावस्य, गुणानां च क्रियाप्रतिक्रियाणामध्ययनमनुसन्धानं च विज्ञानस्य क्षेत्रमस्ति । 'धारणाद् धर्ममित्याहुः' इत्युक्त्या धर्मः प्रकृतेर्मानवीयमूल्यानां च धारणमस्ति । प्रकृतिः स्वधर्मं सदा धारयति । मानवानां कृते धर्मधारणाय नियमानामावश्यकत्वं भवति । तेनाधुना 'धर्मः' इत्यनेन मानवीयमूल्यानि एव प्रायेण गृह्यन्ते । अतो मानवीयानां सद्गुणानां विवेचनं धर्मस्य क्षेत्रमस्ति । धर्मो मानवान् कुमार्गतो निराकृत्य सन्मार्गं निर्दिशति । मानवानां सच्चरित्रनिर्माणमेव धर्मस्योद्देश्यं वर्तते । धर्मस्य विज्ञानस्य च मुख्यमुद्देश्यं मानवजीवनस्य समृद्धिरेवास्ति । विज्ञानं मानवीयानामिच्छानां परिपूर्तये साधनानामन्वेषणं करोति चेद् धर्मः मानवानामसीमितान् मनोरथान् सन्तुलितान् विदधाति । अतो विज्ञानं धर्मस्य प्रतिपक्षी नास्ति अपि तु एतौ मिथः परिपूरकौ वर्तेते । मानवस्य हितसाधनाय एतयोरुभयोरपरिहार्यत्वं वर्तते । भौतिकसुखलाभाय विज्ञानमावश्यकमस्ति चेदात्मिकशान्तये शुद्धाचरणाय च धर्म आवश्यको भवति । अद्य धार्मिका भौतिकसाधनानामभावेन दुःखिनो विद्यन्ते चेद् भौतिकसाधनेन समृद्धा आत्मिकशान्तेरभावेन पीडिताः सन्ति । उभयोः समन्वयो भवति चेत् संसारे सर्वेऽपि जनाः सुखिन एव भविष्यन्ति । 'मा कश्चिद् दुःखभाग् भवेत्' इति उपनिषद्वाक्यं धर्मविज्ञानयोः समन्वये एव फलीभवति । विज्ञानं तदाऽसमीचीनं भवति, यदा तस्याधिकेन प्रयोगेण मानवमनसो धर्मो विलुप्तो भवति । तदा च धर्मो दुःखदायी भवति यदा विज्ञानं पूर्णतो निषिध्यते । अतो धर्मविज्ञानयोः समन्वयेन सन्तुलितेन प्रयोगेण च मानवः उभयत सुखं लभते ।

**(क) एकवाक्येनोत्तरयत**

(अ) विज्ञानस्य क्षेत्रं किम् ?
(आ) धर्मः कोऽस्ति ?
(इ) अधुना 'धर्मः' इत्यनेन प्रायेण किं गृह्यते ?
(ई) धर्मस्य विज्ञानस्य च मुख्यमुद्देश्यं किम् ?
(उ) किमर्थं धर्मविज्ञानयोरपरिहार्यत्वं विद्यते ?
(ऊ) विज्ञानं कदाऽसमीचीनं भवति ?

**(ख) धर्मविज्ञानयोः को भेदः ? अनुच्छेदमाधृत्य उत्तरयत ।**

**(ग) धर्मविज्ञानयोः समन्वयः किमर्थमावश्यकः ? स्वभाषया लिखत ।**

**२१. अनुच्छेदं पठित्वा धर्मस्य स्वरूपं महत्त्वं च स्वभाषया प्रतिपादयत ।**

कस्यचिदपि वस्तुनोऽपरिवर्त्यं वैशिष्ट्यं धर्मोऽस्ति । उष्णत्वमग्नेः धर्मोऽस्ति, गन्धवत्त्वं बीजप्ररोहकत्वं च पृथिव्या धर्मोऽस्ति, शुष्कीकरणं प्राणिनां प्राणरक्षणं च वायोर्धर्मोऽस्ति । एतेऽग्निभूमिवायवः कदाचिदपि स्वस्य तान् गुणान् न परित्यजन्ति, अतस्ते गुणास्तेषां धर्मरूपा वर्तन्ते । एवं मानवस्यापरिवर्त्यं वैशिष्ट्यं मानवता अस्ति, अतः प्रथमं मानवता एव मानवस्य धर्मो विद्यते । मानवतायामेव दया-दाक्षिण्यादयो मानवीया गुणाः समाहिता भवन्ति । मानवधर्मस्य दश लक्षणानि मनुना निर्दिष्टानि सन्ति । तानि एवं वर्तन्ते-

**धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।**
**धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ॥**

मानवतारूपो धर्म एव मानवस्य परिचयो वर्तते । एतेन धर्मेण युतो मानवो मानवोऽस्ति । धर्मेण हीनः मानवस्तु पशुतुल्य एव । नीतिः कथयति-

**आहारनिद्राभयमैथुनं च सामान्यमेतत्पशुभिर्नराणाम् ।**
**धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिः समानाः ॥ इति ।**

## व्यवहारानुशीलनम्

**१. स्वधर्मपालनेन छात्राः कान् लाभानवाप्तुं शक्नुवन्ति ? सूचीं निर्माय कक्षायां दर्शयत ।**

**२. 'धार्मिकी सहिष्णुता' अस्मिन् विषये कक्षायाम् एकां वक्तृत्वस्पर्धां कुरुत ।**

**३. कस्यापि धर्मगुरोरन्तर्वार्तया वास्तविकस्य धर्मस्य स्वरूपविषये एकं निबन्धं रचयत ।**

**४. अधस्तनान् प्रश्नानुत्तरयत**

(क) त्वं पुत्रः/पुत्री असि । पितरौ प्रति तव धर्मः कः ?

(ख) त्वं भ्राता/भगिनी असि । भ्रातरं भगिनीं वा प्रति तव धर्मः कः ?

(ग) त्वं छात्रः/छात्रा असि । छात्रत्वे तव धर्मः कः ?

(घ) त्वं मानवः असि । मानवत्वे तव धर्मः कः ?

# अद्भुतो नकुलः

महाभारतस्य युद्धे समाप्तिङ्गते महाराजो युधिष्ठिरो द्वौ अश्वमेधयागौ पूरितवान् । तृतीयो यागश्च समाप्तिङ्गच्छन्नेवाऽऽसीत्, स ब्राह्मणेभ्यो निर्धनेभ्यश्च भूयसीं दक्षिणां प्रादात् । तस्य दानशीलतायाः प्रशंसा सर्वत्र प्रसारमवाप्नोत् । जनास्तस्य यशोगानं कर्तुं प्रारभन्त । तत्सर्वं वीक्षमाणास्तस्य भ्रातरोऽचिन्तयन् यत्, युधिष्ठिरस्य दानशीलता सर्वश्रेष्ठा, अनुपमेया चास्तीति ।

युधिष्ठिरात् प्रभूतां दक्षिणां प्राप्य काँश्चन पुरोहितान् विहाय अन्ये सर्वे ब्राह्मणा अतिथयश्च स्वनिवासं प्रति प्रस्थिताः । तदानीमेव सहसा एकोऽद्भुतो नकुलस्तत्र समायातः । नकुलस्य देहस्यैको भागः स्वर्णमय आसीत्, नेत्रे च पीतवर्णे आस्ताम् ।

नकुलो यज्ञभूमौ अलुण्ठत् । क्षणं लुण्ठनानन्तरं स उच्चैर्गर्जनमकरोत् । तेन निकटस्थाः सर्वेऽपि प्राणिनो भयत्रस्ता अभवन् । पुनः स पाण्डवान् वीक्षमाणो मानववाण्याऽभाषत, “पाण्डवाः ! युष्माकं यज्ञस्तु सम्पन्नः परन्तु एतस्य पुण्यफलमत्यन्तं न्यूनं खलु ।”



नकुलस्य कथनं श्रुत्वा तत्रत्याः पाण्डवाः पुरोहिताश्च सर्वेऽपि आश्चर्यान्विता अभवन् । पुरोहिता महाराजस्य युधिष्ठिरस्य दानशीलतां प्रशंसन्तोऽभाषन्त, "नकुल ! कोऽसि त्वम् ? अत्र कुतः सम्प्राप्तः ? महाराजस्य यज्ञकर्म तुच्छमस्तीति किं ब्रूषे ?" नकुलः प्रत्युदतरत्, "ब्राह्मणाः ! नाहं भवद्भिः सम्पादितं युधिष्ठिरस्य यज्ञं तुच्छं वदन्नस्मि, न च स्वस्मिन् गर्वं प्रदर्शयन्नस्मि । असत्यभाषणमपि मह्यं न रोचते । अहन्तु तदेव कथयन्नस्मि यदहं स्वस्यैव चक्षुर्भ्यामपश्यम् ।"

सर्वेऽपि आश्चर्यभावेन नकुलमपश्यन् । नकुलः क्षणं मौनमाकलय्य पुनरभाषत यत्, श्रोतुमिच्छन्ति भवन्तः मयानुभूतां सत्यकथाम् ? श्रूयतां तावत्–

केभ्यश्चित् वर्षेभ्यः पूर्वं कुरुक्षेत्रे एको ब्राह्मणो निवसति स्म । तस्य परिवारे चत्वारः सदस्या आसन् । तस्य भार्या, पुत्रः, पुत्रवधूः, स च सर्वे एव धर्मनिष्ठाः पुण्यात्मान आसन् । यत्र कृषकाः क्षेत्रात् शस्यकर्तनं समाप्य नयन्ति स्म, तत्रैव क्षेत्रे पतितान् शस्यकणान् सङ्कलय्य ते गृहमानयन्ति स्म, तेनैव च जीविकामर्जयन्ति स्म ।

कदाचिन्महद् दुर्भिक्षमापतितम् । जलवर्षणाभावेन क्षेत्रेषु अङ्कुरितान्यपि शस्यानि फलान्वितानि नाभवन् । एकोऽप्यङ्कुरः शस्यदो नाभवत् । मानवाः, पशवः, पक्षिणश्च बुभुक्षया मृत्युमुखं प्रवेष्टुमारभन्त । तस्य ब्राह्मणस्य गृहे तु कदाप्यतिरिक्तमन्नं न भवति स्म । अतस्तस्य परिवारः प्रतिदिनमुपवासं कर्तुं प्रारभत परन्तु सर्वदोपवासकरणमसम्भवमेव । अत एकस्मिन् दिने ब्राह्मणोऽन्नसङ्कलनाय विपणिं प्रति प्रस्थितः । तत्र क्वचन भूमौ विकीर्णान् यवान् सोऽपश्यत् । महता परिश्रमेण यवान् सङ्क य्यय स गृहं प्रत्यागच्छत् । यद्यपि यवा अतीव स्वल्पा आसन् तथापि तस्य भार्या तान् प्राप्य प्रसन्नाऽभवत् । सा भ्राष्ट्रे यवानां भर्जनं कृत्वा तेषां पेषणेन सक्तुकं रचितवती ।

ब्राह्मणो देवपूजनानन्तरं परिवारेण सह भोजनार्थमासने उपाविशत् । ब्राह्मणभार्या सक्तुकं चतुर्धा विभज्य परिवारस्य चतुर्णामेव सदस्यानां पुरत एकैकं भागं स्थापितवती । यदा ते भोक्तुं प्रारभमाणा आसन्, तदानीमेव एको ब्राह्मणस्तत्र सम्प्राप्तः । अतिथिर्ब्राह्मणोऽतीव बुभुक्षित आसीत् । स तत्रात्यन्तं करुणाभावेन स्वस्य कृते भोजनमयाचत ।

अतिथर्ब्राह्मणस्य करुणाभरितेन वचसा ब्राह्मणमनसि दया समुद्भूता । स समादरभावेनातिथिब्राह्मणं तत्रोपवेश्य श्रद्धया तस्य चरणौ प्रक्षालितवान् । ततः स्वस्य सक्तुकभागं तस्मै प्रायच्छत् । अत्यन्तं बुभुक्षितोऽतिथिब्राह्मणः प्रदत्तं सक्तुकं खादित्वा

पुनर्याचनाभावेन ब्राह्मणं प्रति अपश्यत् । ब्राह्मणश्चिन्तितोऽभवत् । एतद् वीक्षमाणा ब्राह्मणी स्वकीयं सक्तुकभागं च अतिथिब्राह्मणाय प्रादात् । तस्य भोजनेन च अतिथिब्राह्मणस्तृप्तिं नागच्छत् । अन्त्ये ब्राह्मणस्य पुत्रः, पुत्रवधूश्च स्वकीयौ सक्तुकभागौ अतिथिब्राह्मणाय प्रादत्ताम् । तत्क्षणमेव अतिथिब्राह्मणोऽदृश्योऽभवत्, तत्स्थाने च परमोज्ज्वलः प्रकाशः समुत्पन्नः । प्रकाशाद् गम्भीरा वाणी प्रस्फुटिता, "ब्राह्मणश्रेष्ठ ! अहं धर्मोऽस्मि । बुभुक्षितस्य ब्राह्मणस्य वेषं धृत्वाऽहं भवतः परीक्षायै समागत आसम् । भवतस्त्यागभावेन दानशीलतया चाहमतीव प्रसन्नोऽभवम् । नात्र भुवि स्थेयं भवद्भिः, स्वर्गलोकं प्रति गम्यताम् । भवतां तत्र गमनेन तत्रत्या शोभापि वर्धिष्यते ।"

धर्मेणैवं कथिते हि तत्रैकं स्वर्णविमानं समागच्छत् । ब्राह्मणः स्वस्य परिवारेण सह विमानमारुह्य स्वर्गं प्रति प्रस्थितः । तदानीं यावदहं स्वबिले आसम् । ब्राह्मणे प्रस्थिते हि बिलाद् बहिर्निर्गत्य अतिथिब्राह्मणेन सक्तुकं भुक्त्वा यत्र हस्तौ प्रक्षालितौ, तत्रैव गत्वा पङ्केऽलुण्ठम् । मम शरीरस्य तत्र विकीर्णैः सक्तुककणैः स्पृष्टो भाग एव स्वर्णमयोऽभवत् । यदा तु शरीरस्य समग्र एव भागः स्वर्णमयो भविष्यति तदैव सर्वाङ्गसुन्दरो भविष्यामीति विचारेणानेकेषु पुण्यस्थलेषु भ्रामं भ्राममत्र सम्प्राप्तोऽस्मि । परन्तु अत्र सम्प्राप्य लुण्ठनेनापि मम शरीरस्यावशिष्टो भागः स्वर्णमयो न सञ्जातः । अत एव वच्मि- "ब्राह्मणस्य स्वल्पस्य सक्तुकदानस्य यो महिमाऽऽसीत्, न स महिमा युधिष्ठिरस्य यज्ञस्य ।"

नकुलः क्षणं मौनीभूय पुनरकथयत्- "युधिष्ठिरेणाऽत्र अनल्पा ब्राह्मणा भोजिताः । तत्र ब्राह्मणेन केवलमेक एवातिथिब्राह्मणो भोजितः, परं तत्र त्यागस्य महत्ता गरीयसी आसीत् । स्वयं बुभुक्षुः सन्नपि ब्राह्मणपरिवारो भोजनदानमकरोत् । दानस्य महिमा त्यागे वर्तते न त्वादातृसंख्यायाम् ।" नकुलस्य वचनं श्रुत्वा तत्रत्याः पुरोहिता युधिष्ठिरादिपाण्डवाश्च शिरांसि अवनमय्य स्थिताः ।

## शिक्षणालोकः

'अतिथिदेवो भव' इति वैदिकोपदेशस्य परिपालनाय, पौरस्त्यसंस्कृतेर्विविधानामनुकार्याणां पक्षाणां निःस्वार्थभावेन स्वजीवने समभ्यसनाय च छात्राः सातत्येन प्रेरणीयाः ।

# अभ्यासः

## पाठानुशीलनम्

१. **प्रदत्तानि पदानि सार्थबोधमुच्चारयत**

अतिथिब्राह्मणाय, युधिष्ठिरः, बुभुक्षुः, अङ्कुरः, सङ्कलय्य, काँश्चन, प्रत्युदतरत्, अलुण्ठत् ।

२. **सङ्क्षेपेण उत्तरयत**

(क) महाराजो युधिष्ठिरः कदा अश्वमेधयागौ पूरितवान् ?

(ख) जनाः कस्य यशोगानं कर्तुं प्रारभन्त ?

(ग) ब्राह्मणा अतिथयश्च कुत्र प्रस्थिताः ?

(घ) यज्ञस्थले कीदृशो नकुलः समायातः ?

(ङ) नकुलस्य नेत्रे कीदृशे आस्ताम् ?

(च) नकुलः कथमभाषत ?

(छ) ब्राह्मणस्य परिवारे कति सदस्या आसन् ? के च ते ?

३. **पाठाधारेण सत्यकथने 'आम्' असत्यकथने 'न' इति लिखत**

(क) ब्राह्मणस्य परिवारः शस्यकणान् सङ्कलय्य जीविकामर्जयति स्म ।

(ख) कदाचित् ईषद् दुर्भिक्षमापतितम् ।

(ग) तदानीं क्षेत्रेषु जलवर्षणं च नाभवत् ।

(घ) सर्वेऽपि प्राणिनो बुभुक्षया गुहामुखं प्रवेष्टुमारभन्त ।

(ङ) ब्राह्मणस्य गृहे किञ्चिदेवातिरिक्तमन्नं भवति स्म ।

(च) विपण्यां क्वचन भूमौ तण्डुला विकीर्णा आसन् ।

(छ) अतिथिब्राह्मणोऽतीव बुभुक्षित आसीत् ।

(ज) ब्राह्मणस्तिरस्कारभावेन अतिथिब्राह्मणमुपावेशयत् ।

४. **पाठस्य सार्थबोधं सस्वरं वाचनं कुरुत ।**

५. **पाठस्य कथायाः सन्देशं लिखित्वा श्रावयत ।**

**६. पाठाधारेण ब्राह्मणस्य चारित्रिकं वैशिष्ट्यमेकस्मिन्ननुच्छेदे वर्णयत ।**

**७. पाठाधारेण रिक्तस्थानं पूरयत**

(क) ......... एको भागः स्वर्णमय आसीत् ।

(ख) नकुलः ......... अलुण्ठत् ।

(ग) ......... कथनं श्रुत्वा सर्वेऽपि आश्चर्यान्विता अभवन् ।

(घ) नकुलाय ......... न रोचते ।

(ङ) नकुलः क्षणं ........... पुनरभाषत ।

(च) जलवर्षणाभावेन क्षेत्रेषु .............. फलान्वितानि नाभवन् ।

(छ) ब्राह्मणस्य परिवारः प्रतिदिनम् .............. कर्तुं प्रारभत ।

(ज) ब्राह्मणभार्या .............. चतुर्धा विभाजितवती ।

(झ) अतिथिब्राह्मणोऽत्यन्तं करुणाभावेन स्वस्य कृते भोजनम् ............ ।

(ञ) ............ तृप्तिं नागच्छत् ।

**८. पाठस्य द्वितीयस्यानुच्छेदस्य श्रुतिलेखनं कुरुत ।**

**९. विपर्ययौ परस्परं मेलयत**

| **'अ' समूहः** | **'आ' समूहः** |
|---|---|
| समाप्तिः | पश्चात् |
| प्रशंसन्तः | निन्दन्तः |
| अनुपमेया | दूरस्थाः |
| दानम् | प्रारम्भः |
| निकटस्थाः | उपमायुक्ताः |
| पुण्यम् | आदानम् |
| न्यूनम् | तिरस्कारः |
| पूर्वम् | पापम् |
| स्वस्य | अधिकम् |
| स्वीकारः | परस्य |

**१०. प्रदत्तानि पर्यायौ परस्परं मेलयत**

| **'अ' समूहः** | **'आ' समूहः** |
|---|---|
| अन्नम् | विप्रः |
| गृहम् | शस्यम् |
| ब्राह्मणः | सदनम् |
| गर्वः | पानीयम् |
| पुनः | तनयः |
| भार्या | अग्रे |
| यज्ञः | अहङ्कारः |
| जलम् | भूयः |
| पुत्रः | पत्नी |
| पुरतः | यागः |

**११. पदानि प्रयुज्य वाक्यानि रचयत**

महत्ता, केवलम्, विमानम्, यज्ञकर्म, असत्यभाषणम्, इच्छन्ति, अङ्कुरः, उपवासधारणम्, खादित्वा, वाणी, तत्र, सर्वाङ्गसुन्दरः, महिमा, तत्रत्याः, प्रसन्नः, स्वर्णमयः, शरीरस्य, वच्मि ।

**१२. पदानि संशोध्य लिखत**

युधिस्ठिरात्, समाप्तीङ्गच्छन्, ब्राम्हणाः, पितवर्णे, श्वनिवासम्, चक्षुभ्याम्, पुन्यात्मानः, शष्यकणान्, विकिर्णान्, पेशणेन, बुभूक्षितः, समदरभावेन, विक्षमाणा, स्वार्गलोकम्, गरियसी ।

**१३. प्रदत्तं प्रेरकप्रसङ्गं पठित्वा प्रश्नानुत्तरयत**

मदनमोहनमालवीयः इति नामधेयेन विदुषा काश्यां हिन्दुविश्वविद्यालयः संस्थापित आसीत् । स मधुरभाषी, सदाचारी, दृढनिश्चयः, संस्कृतसेवी, भगवद्भक्तश्च आसीत् । न केवलं सामान्या जना एव अपि तु विशिष्टा विद्वांसश्च तस्य आदर्शमयाद् व्यक्तित्वात् प्रभाविता आसन् ।

एकदा मालवीयात् स्वस्य प्रशंसां वाञ्छन् कश्चन महाशयस्तेन सह मेलितुं समागतः। तत्रागत्य मालवीयं सम्बोध्य सोऽवदत्, "महोदय! भवान् मह्यं शतसङ्ख्यिका गालीः प्रयच्छतु तथापि अहं न क्रोत्स्यामि।" एतन्निशम्य मालवीयस्त्वरितं प्रत्युदतरत्, "महाशय! भवतु, एतेन भवतः सहनशीलतायाः परीक्षणं भविष्यति परन्तु परीक्षणे प्रारप्स्यमाने हि मम वाणी दूषिता भविष्यति। अतः क्षम्यताम्, न शक्नोमि अहमेतत् कर्तुम्।" मालवीयस्य कथनं निशम्य लज्जितो भूत्वा स ततो निरगच्छत्।

**(अ) एकपदेनोत्तरयत**

(क) काश्यां हिन्दुविश्वविद्यालयं कः संस्थापितवान्?

(ख) मालवीयेन सह मेलितुं कः समागतः?

(ग) महाशयो मालवीयात् किं वाञ्छति स्म?

(घ) को लज्जितोऽभवत्?

**(आ) एकवाक्येनोत्तरयत**

(क) मालवीयस्य आदर्शव्यक्तित्वात् के प्रभाविता आसन्?

(ख) मदनमोहनो मालवीयः कीदृश आसीत्?

(ग) मालवीयः किं दातुं नैच्छत्?

(घ) गालीदानेन का दूषिता भविष्यति?

**(इ) विशेषणपदानि विशेष्यपदैर्मेलयत**

| **'अ' समूहः** | **'आ' समूहः** |
|---|---|
| सामान्याः | परीक्षणे |
| कश्चन | वाणी |
| शतसङ्ख्यिकाः | जनाः |
| प्रारप्स्यमाने | महाशयः |
| दूषिता | गालीः |

**(ई) प्रेरकप्रसङ्गस्य समुचितं शीर्षकं परिकल्प्य लिखत।**

**१४. अतिथिना सह अस्माभिः कीदृशो व्यवहारः कर्तव्यः ? एकस्मिन्ननुच्छेदे स्वमतं प्रकटयत ।**

## व्यवहारानुशीलनम्

**१. 'अतिथिदेवो भव' इति वेदवाक्यं सार्थं विलिख्य स्वस्य गृहस्य मूलद्वारे भित्तौ संयोजयत ।**

**२. पाठस्य कथां पठित्वा स्वकीये चिन्तने समागतान् विचारान् अन्योन्यं श्रावयत ।**

**३. अतिथिसत्कारविषयिणीं कथामन्विष्य कक्षायां श्रावयित्वा ततः प्राप्तानां सन्देशानां परिचर्चां विधत्त ।**

**४. निःस्वार्थभावेन विहिताया अतिथिसेवायाः शोभनानां परिणामानां विषये कक्षायां परस्परं विमृशत ।**

**५. सर्वोपयुक्तं विकल्पं चित्वा प्रश्नानुत्तरयत**

**(अ) विद्यालये तव सखा उपाहारमानेतुं विस्मृतवान् । उपाहारग्रहणसमये त्वं किं करोषि ?**

(क) सख्युर्दूरीभूय एकाकी उपाहारं भुञ्जे ।

(ख) किमर्थं नानीतम् ? इति कथयित्वा सखायं तर्जयामि ।

(ग) स्वकीयमुपाहारं द्विधा विभज्य सख्या सह भुञ्जे ।

(घ) आत्मनः सर्वमुपाहारं सख्ये दत्त्वा स्वयमुपवासं करोमि ।

**(आ) परीक्षायां प्रथमस्थाने लब्धे तव सखा अहङ्कारं प्रदर्शयति चेत् तं किं परामृशसि ?**

(क) लब्धप्रथमस्थानेन छात्रेण अहङ्कारस्तु करणीय एव इति ।

(ख) प्रथमो यत् करोति तदुचितमिति ।

(ग) अथ तव कृते परिश्रमो नावश्यकः, यतः प्रथमस्योपरि लब्धव्यं पदं नास्तीति ।

(घ) प्रथमेन छात्रेण अधिकां नम्रतां प्रदर्श्य अन्येषां कृते मार्गदर्शनं कार्यमिति ।

(इ) **गृहे मातापित्रोरनुपस्थितौ कश्चन भिक्षुर्भिक्षायै प्राप्नोति चेत् किं करोषि ?**

(क) भिक्षोर्याचनां तिरस्कृत्य गृहाद् बहिरेव न निष्क्रामयामि ।

(ख) सश्रद्धं भिक्षवे भिक्षां प्रयच्छामि ।

(ग) गृहे मातापितरौ न स्तः, पश्चादागम्यतामित्युक्ता तं प्रत्यागमयामि ।

(घ) किमर्थं याचसे ? उद्यमेन खादनीयमिति सरोषं कथयित्वा तं तिरस्करोमि ।

(ई) **सायं भोजनसमये कश्चनापरिचितोऽतिथिर्गृहमायाति चेत् किं करोषि ?**

(क) भोजनाय, वासाय च सत्कारपूर्वकमनुरुणध्मि ।

(ख) रात्रौ परेषां गृहगमनं नोचितम्, चौरोऽसि किम् ? इत्युक्त्वा तमाक्षिपामि ।

(ग) गृहद्वारं पिधाय अन्तस्तिष्ठामि ।

(घ) रात्रौ गृहे आगमनस्य कारणं पृच्छामि ।

# सत्पात्रता

अमृतमिहैव संसारे वर्तते विषमपि इहैव । सामान्यतोऽमृतं हितकरं विषञ्च विनाशकरं मन्यते, परन्तु उभयोरेव समुचितप्रयोगे हितकरता सिध्यति । उचिते पात्रे उचितस्य वस्तुनो योजना आवश्यकी भवति । एवं रीत्या योजनया संसारस्य समेषामपि वस्तूनामुपयोगिता सम्पद्यते । कस्मैचित् भिक्षवे तृणानि दीयन्ते चेत् सोऽस्मभ्यं क्रुध्यति परन्तु तान्येव तृणानि यदि गोभ्यः प्रदीयेरन्, ता दुग्धं प्रदास्यन्ति । तद् दुग्धं वयं पिबामः, शरीरे सद्यः शक्तिः समुद्भवति । यदि तदेव दुग्धं सर्पेभ्यो दीयते चेत् तेषां केवलं विषवर्धनं भवति । वर्धितविषो विषधरः कञ्चिद् दशति चेत् तन्मृत्युर्निश्चित एव ।



तथैव विद्याया धनस्य च प्रदानाय अपि आदातरि सत्पात्रता निश्चेतव्या । प्रियशिष्यायार्जुनं ब्रह्मास्त्रविद्यां शिक्षितवानाचार्यो द्रोणः केवलं पुत्रमोहवशादसत्पात्रमश्वत्थामानमपि तां

विद्यामध्यापितवान् । ततो द्रोणपुत्रस्यैव हानिः सञ्जातेति कथा महाभारते पठितुं शक्यते । गृहस्याङ्गणे भिक्षार्थं समागताय भिक्षवे किञ्चिदन्नदानं समुचितं भवति परन्तु तदेव अन्नं यदि गृहमार्गेण गच्छन्तं कञ्चिद् धनिकमाहूय दीयते चेद् धनिकः क्रुध्यति ।

'कस्मै किं दातव्यम् ? कः कथं सम्बोधनीयः ?' इति मूर्खो न जानाति । परं सज्जनो व्यवहारं विचार्य स्थानं स्थितिं समयं च निश्चित्याचरति । सत्पात्रतां परीक्ष्यैव च स केनापि सह व्यवहरति । अतः स सर्वदा सफलः सुखी शान्तश्च भवति । केचन जना अनाहूता अपि स्वच्छन्दं प्रविशन्ति, अपृष्टाश्च परामर्शं यच्छन्ति । धनस्य दानायैव न अपि तु परामर्शदानाय भावनाविनिमयार्थञ्च पात्रतापरीक्षणमावश्यकं भवति । सत्पात्रतां निश्चित्य उचिते स्थाने काले च प्रदत्तमेव वस्तुसात्त्विकं भवतीति भगवता श्रीकृष्णेन प्रोक्तं वर्तते-

**'देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम् ।'**

अतः सत्पात्रतां विचार्य उचिते पात्रे उचितस्य वस्तुनो विनियोजनमानन्ददं सुपरिणामि च भवतीति व्यवहारविदां नीतिरस्ति । व्याससमृतिर्दानाय सुपात्रत्वचयनस्यावश्यकत्वं तन्महत्त्वञ्च प्रतिपादयति-

**सुक्षेत्रे वापयेद्बीजं सुपात्रे दापयेद्धनम् ।**
**सुक्षेत्रे च सुपात्रे च क्षिप्तं नैव विदुष्यति ॥**

यथा क्षारमृत्तिकायुक्ते क्षेत्रे उप्तं बीजं न प्ररोहति तथैव कुपात्रे दानं निरर्थकं प्रत्युत्पादकञ्च भवति । कुपात्रे दानं निषेधयन् व्यासस्मृतिरुपदिशति-

**ऊषरे वापितं वीजं भिन्नभाण्डेषु गोदुहम् ।**
**हुतं भस्मनि हव्यञ्च मूर्खे दानमशाश्वतम् ॥**

अस्माकं शास्त्राणि 'दानादृते नोपकारः', 'दानमेव कलौ युगे', 'दानेन पाणिर्न तु कङ्कणेन' इत्यादिभिर्वचनैरस्मान् सश्रद्धं दानाय सततं प्रेरयन्ति । सहैव 'गुणान्विताय दातव्यं नास्ति मूर्खे व्यतिक्रमः', 'मूर्खे दानमशाश्वतम्' 'अपात्रेषु तु यद्दत्तं दहत्यासप्तमं कुलम्' इत्यादिभिरुपदेशैः सदैव सुपात्रे एव दानायापि अस्मान् सावधानान् कारयन्ति । अतोऽस्माभिः सदा दानशीलैर्भवितव्यं परन्तु दानात् पूर्वं देशकालौ सुविचार्य यस्मै दानं प्रदीयते तस्य सुपात्रतायाः परीक्षणे च सचेष्टैर्भाव्यम् ।

## शिक्षणालोकः

महाभारतादीनां सत्पात्रताविषयकान् प्रसङ्गान् श्रावयित्वा छात्राः सत्पात्रताविषये बोधनीयाः । कस्मैचित् कस्यचिदपि वस्तुनः प्रदानकाले तस्य सत्पात्रता सम्यग् विचारणीया इति पाठस्य माध्यमेन छात्राः शिक्षणीयाः ।

# अभ्यासः

## पाठानुशीलनम्

१. **अधस्तनानां पदानां शुद्धोच्चारणं विधाय तदर्थाँश्चान्विषत**

सत्पात्रता, अश्वत्थाम्ने, द्रोणपुत्रस्य, प्रदत्तवान्, ब्रह्मास्त्रविद्याम्, क्रुध्यति, सचेष्टैः, व्यतिक्रमः ।

२. **सङ्क्षेपेण उत्तरयत**

(क) किं हितकरं भवति ?

(ख) समेषामपि वस्तूनामुपयोगिता कथं सम्पद्यते ?

(ग) गावः किं प्रददति ?

(घ) कस्य पानेन सर्पाणां विषवर्धनं भवति ?

(ङ) कोऽर्जुनं ब्रह्मास्त्रविद्यां शिक्षितवान् ?

(च) भिक्षवे कस्य दानं समुचितं भवति ?

(छ) मूर्खः किं न जानाति ?

(ज) सज्जनः कथं व्यवहरति ?

(झ) दानस्याधिकारी कः ?

(ञ) कस्मै न दातव्यम् ?

३. **पाठाधारेण संशोध्य लिखत**

(क) संसारेऽमृतमेव वर्तते, नहि विषम् ।

(ख) अमृतं विनाशकरं मन्यते ।

(ग) तृणानां प्रदानेन भिक्षवः प्रसीदन्ति ।

(घ) गोदुग्धपानेन शरीरे शक्तिर्नश्यति ।

(ङ) आचार्यो द्रोणः पुत्रमश्वत्थामानं ब्रह्मास्त्रविद्यां नाध्यापितवान् ।

(च) धनिकाय भिक्षादानेन स प्रमोदते ।

४. **पाठस्यान्तिमस्यानुच्छेदस्यानुलेखनं कुरुत ।**

५. **श्रीमद्भगवद्गीताया उद्धृतस्य प्रदत्तस्य श्लोकस्य सरलार्थं लिखत**

दरिद्रान् भर कौन्तेय ! मा प्रयच्छेश्वरे धनम् ।
व्याधितस्यौषधं पथ्यं नीरुजस्य किमौषधैः ॥

६. **पाठस्य प्रथमस्यानुच्छेदस्य श्रुतिलेखनं कुरुत ।**

७. **अधस्तनान् श्लोकान् पठित्वा तदनुवर्तिनः प्रश्नानुत्तरयत**

किञ्चिद्वेदमयं पात्रं किञ्चित् पात्रं तमोमयम् ।
पात्राणामुत्तमं पात्रं क्षुद्रान्नं यस्य नोदरे ॥
देयं भेषजमार्तस्य परिश्रान्तस्य चासनम् ।
तृषितस्य च पानीयं क्षुधितस्य च भोजनम् ॥
मातापित्रोर्गुरौ मित्रे विनीते चोपकारिणि ।
दीनानाथविशिष्टेषु दत्तं तत्सफलं भवेत् ॥

(अ) **एकवाक्येनोत्तरयत**

(क) सर्वोत्तमं पात्रं किम् ?

(ख) आर्ताय किं देयम् ?

(ग) कस्मै आसनं दातव्यम् ?

(घ) क्षुधितस्योपकारकं वस्तु किम् ?

(ङ) केषु दत्तं सफलं भवति ?

(आ) **उपरितनानां श्लोकानां साहाय्येन सत्पात्रताविषयेऽनुच्छेदमेकं लिखत ।**

८. **पाठाधारेण पदावलीनां समुचितक्रियाभिः सह मेलनं विधाय वाक्यानि लिखत**

| ‘अ’ खण्डः | ‘आ’ खण्डः |
| --- | --- |
| अमृतमिहैव संसारे | अपेक्ष्यते । |
| विषं विनाशकरं | दशति । |
| दुग्धपानेन शरीरे शक्तिः | प्रदत्तवान् । |
| वर्धितविषो विषधरः कश्चित् | मन्यते । |
| द्रोणोऽर्जुनाय ब्रह्मास्त्रविद्यां | समुद्भवति । |
| परामर्शदानाय च पात्रतापरीक्षणम् | वर्तते । |

९. **मञ्जूषायाः पदानां साहाय्येन रिक्तस्थानं पूरयत**

(क) विद्यायाः, ............... च प्रदानाय अपि आदातरि ............... निश्चेतव्या ।

(ख) आचार्यो द्रोणः ............... अर्जुनं ब्रह्मास्त्रविद्यां शिक्षितवान् ।

(ग) स केवलं पुत्रमोहवशात् ............... अश्वत्थामानं ब्रह्मास्त्रविद्यामध्यापितवान् ।

(घ) अत एव पश्चाद् द्रोणपुत्रस्यैव ............... सञ्जातेति कथा ............... पठितुं शक्यते ।

(ङ) गृहस्य ............... भिक्षार्थं समागताय ............... किञ्चिदन्नदानं समुचितं भवति ।

(च) अन्नं यदि ............... गच्छन्तं कञ्चिद् धनिकमाहूय ............... चेद् धनिकः क्रुध्यति ।

धनस्य, असत्पात्रम्, भिक्षवे, दीयते, प्रियशिष्यम्, महाभारते, गृहमार्गेण, सत्पात्रता, हानिः, अङ्गणे

१०. **पदानि प्रयुज्य वाक्यानि रचयत**

दुग्धम्, हानिः, धनिकः, सज्जनाः, सात्त्विकम्, परामर्शः, विद्वांसः, व्यवहारः, आचरति, सर्वदा ।

११. **शुद्धमुच्चारयत**

वस्तूनाम्, क्रुध्यति, प्रदास्यन्ति, समुद्भवति, विषवर्धनम्, आदातरि, ब्रह्मास्त्रविद्या, पुत्रमोहवशात्, आङ्गणे, गृहमार्गेण, सम्बोधनीयः, निश्चित्य, सत्पात्रता, व्यवहरति ।

१२. **पर्यायपदे परस्परं मेलयत**

| 'अ' समूहः | 'आ' समूहः |
|---|---|
| धनम् | अनन्तरम् |
| अमृतम् | कुप्यति |
| आनन्ददम् | वित्तम् |
| पश्चात् | सुधा |
| क्रुध्यति | बलम् |
| आदाता | विषधरः |
| शक्तिः | सुखदम् |
| सर्पः | ग्रहीता |

१३. **मञ्जूषातः पदानि विचित्य समुचितस्थाने लिखत**

(क) ................ = प्रथमा, एकवचनम्

(ख) ................ = चतुर्थी, एकवचनम्

(ग) ................ = प्रथमा, बहुवचनम्

(घ) ................ = सप्तमी, एकवचनम्

(ङ) ................ = तृतीया, एकवचनम्

(च) ................ = षष्ठी, बहुवचनम्

(छ) ................ = द्वितीया, एकवचनम्

(ज) ................ = षष्ठी, एकवचनम्

धनस्य, भिक्षवे, स्थितिम्, देशे, विद्वांसः, गृहमार्गेण, अस्माकम्, अमृतम्

१४. पाठाधारेण सत्पात्रताया महत्त्वं वर्णयत ।

१५. शिक्षकाद् विविधमाध्यमेभ्यो वा यथावश्यकं साहाय्यमवाप्य 'स्वावलम्बनम्' इति विषयेऽनुच्छेदमेकं रचयत ।

## व्यवहारानुशीलनम्

१. समाजसेवायाः क्षेत्रे केषां कार्याणां कुत्र कुत्र सत्पात्रता ? इति सारिण्यां प्रदर्शयत ।

२. सत्पात्राय किञ्चिद् दत्त्वा प्राप्तस्य प्रसादस्य, असत्पात्राय किञ्चिद् दत्त्वा प्राप्तस्य विषादस्य वैकं स्वानुभूतं परानुभूतं वा प्रसङ्गं लिखित्वा कक्षायां श्रावयत ।

३. पाठे उद्धृतो 'देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम्' इति श्रीमद्भगवद्गीतायाः सप्तदशस्याध्यायस्य विंशतितमः पद्यांशो वर्तते । श्रीमद्भगवद्गीतायाः पुस्तकमानीय तत्र उल्लिखितस्य राजसस्य, तामसस्य च दानस्य विषये कक्षायां विमृशत ।

४. अस्य पाठस्य पठनानन्तरं विचारे कीदृशं परिवर्तनमपेक्ष्यते, तत्कक्षायां श्रावयत ।

५. स्वकीयाचारव्यवहारयोराधारेण सर्वोपयुक्तं विकल्पं विचित्य प्रश्नानुत्तरयत

(अ) स्वकीये जन्मदिवसे कस्मिन् कर्मणि अधिकमानन्दमनुभवसि ?

(क) दीन-दरिद्राणां भोजनवस्त्रादिभिः सहयोगदाने ।

(ख) मित्रैः सह भ्रमणे ।

(ग) बहुभिः सखिभिः सह गणभोजने ।

(घ) रुच्यनुसारेण बहुमूल्यवस्तूनां क्रयणे ।

(आ) विद्यालयादुपहाररूपेण प्राप्तस्य पुस्तकस्य सदुपयोगः कथं करोषि ?

(क) पुस्तकं विक्रीय मिष्टान्नं खादामि ।

(ख) पुस्तकं स्वप्रकोष्ठस्य भित्तौ संस्थापयामि ।

(ग) पुस्तकं प्रियतमाय मित्राय ददामि ।

(घ) पुस्तकं पठित्वा तत्रोक्तान् ग्राह्यविषयान्नुशीलयामि ।

**(इ) अपरिचितो जनस्त्वया सह धनस्य सहयोगं याचते चेत् किं करोषि ?**

(क) मम पार्श्वे यत् किमप्यस्ति तद् ददामि ।

(ख) यत् किमपि याचते तत् परेभ्यो गृहीत्वापि ददामि ।

(ग) तस्यावश्यकतां प्रयोजनञ्च विचार्य पात्रताञ्च परीक्ष्य यथाशक्ति ददामि ।

(घ) याचितस्य दशांशं ददामि ।

**(ई) व्यसने प्रवृत्तेन तव सख्या केषुचन रूप्यकेषु याचितेषु किं करोषि ?**

(क) सख्युर्वचनमनवज्ञाय रूप्यकाणि ददामि ।

(ख) रूप्यकाणि न ददामि, व्यसनाद् विमोचनस्योपायान् च परामृशामि ।

(ग) तस्योपेक्षणं कृत्वा स्वमार्गे गच्छामि ।

(घ) तं ताडयामि ।

# एकोनविंशः पाठ

# गार्गी

नेपाले बहोः कालान्नारीभिः सुकर्मभिः ख्यातिर्लब्धा वर्तते । अत्र बह्व्यो वीराङ्गना विदुष्यश्च समजायन्त । एतासु प्रथितासु नारीषु विदुषी गार्गी उत्कृष्टं स्थानमधितिष्ठति । गार्ग्या उपनिषत्कालिकेषु नारीरत्नेषु गणना भवति । गर्गगोत्रोत्पन्नतायाः कारणेन सा गार्गी अभवत् ।

गर्गो यादवस्य पुरोहितः प्रसिद्धो ज्योतिर्विच्चासीत् । गर्गस्य प्रसङ्गो विष्णुपुराणे वायुपुराणे च द्रष्टुं शक्यते । श्रीमद्भागवतपुराणस्यानुसारेण गर्गः श्रीकृष्णस्य बलरामस्य च नामकरणमुपनयनं चाकारयत् । असौ गायत्रीमन्त्रान् चोपादिशत् । वसुदेवस्य प्रार्थनया कदाचिद् गर्गो नन्दस्य व्रजं वव्राज । स युधिष्ठिरस्य राजसूययज्ञे आमन्त्रित आसीत् । स शेषनागाज्ज्योतिर्विद्यां जज्ञौ । गर्गः श्रीकृष्णस्य चरितं वर्णयित्वा द्वादशसहस्राणां श्लोकानां ग्रन्थं लिलेख इति मन्यते । 'गर्गसंहिता' इति नामकं ज्योतिषग्रन्थं च असौ एवालिखत् । काठकसंहितायां 'गर्गाः प्रावरेयाः' इत्युल्लिखितं वर्तते । कात्यायनसूत्रस्य भाष्यकाररूपेणापि गर्गः परिगण्यते । व्यतीते काले गर्गस्य गणना गोत्रर्षौ अभवत् । गर्ग उतथ्यस्य पुत्र आसीत् । गर्गस्य पुत्रो गार्ग्यः पुत्री च गार्गी आस्ताम् ।



गार्गी ब्रह्मवादिनी आसीत् । गार्ग्या ब्रह्मज्ञानवैदुष्यं बृहदारण्यकोपनिषदो ज्ञायते । एकदा विदेहराजो जनको बहुदक्षिणानामकं यज्ञमायोजयत् । तत्र ब्रह्मसभा सञ्चलिताऽऽसीत् । जनक उदघोषयत्, “य आत्मानं महान्तं दार्शनिकं प्रमाणयितुं शक्नोति तस्मै स्वर्णपत्रेण सुशोभितैः शृङ्गैर्युताः सहस्रं गावो दीयन्ते ।” ब्रह्मसभायां महान् ब्रह्मज्ञानी महर्षिर्याज्ञवल्क्य आसीत् । स स्वशिष्यान् गा आश्रमं नेतुमादिदेश । तद् दृष्ट्वा अन्ये विद्वांसः क्रुद्धा अभवन् । महाराजस्य जनकस्य होता ऋत्विगश्वलो याज्ञवल्क्यं पप्रच्छ, “हे याज्ञवल्क्य ! त्वं ब्रह्मवित्सु वरिष्ठोऽसि ?” उपस्थिता अन्ये विद्वांसोऽपि याज्ञवल्क्येन सह शास्त्रार्थं चक्रुः । आर्तभागः, भुज्यः, उशस्तिः, कहोलः, उद्दालकश्च याज्ञवल्क्यं जटिलान् प्रश्नान् पप्रच्छुः । तेषु गार्गी चासीत् । याज्ञवल्क्यः सद्य एव समेषां प्रश्नान् उदतरत् ।

सर्वे ब्रह्मवादिनः प्रश्नकरणात् पराङ्मुखा अभवन् । गार्गी बहून् प्रश्नानुदभावयत् । तेनेषद् विचलितो याज्ञवल्क्यो जगाद, “गार्गि ! प्रश्नस्य सीमातिक्रमणं करोषि, तन्मा कुरु । बहु न पृच्छ अन्यथा तव शिरो निपतिष्यति ।” तदपि गार्गी तूष्णीं न तस्थौ । सा याज्ञवल्क्यं पुनः प्रश्नद्वयं प्रष्टुं सभाया ब्रह्मविद्भ्योऽनुमतिं ययाचे । तदनुमत्या सा द्वौ गभीरौ प्रश्नौ याज्ञवल्क्यमपृच्छत् । तस्य विलक्षणोत्तरं प्रदाय याज्ञवल्क्यो गार्गीं विदुषश्च समतोषयत् ।

याज्ञवल्क्यस्य व्याख्यानेन तुष्टा गार्गी निजगाद, “भो पूज्या विद्वांसः ! याज्ञवल्क्यं नमस्कुरुत । ब्रह्मचर्चायाममुं न कोऽपि पराजेतुं समर्थः । एतस्य पराजयस्य कल्पनापि असम्भवा प्रतीयते ।” तदुक्त्वा गार्गी मौनमतिष्ठत् । याज्ञवल्क्यस्य गार्ग्याश्च मुखदीप्तिर्वृद्धिङ्गताऽदृश्यत ।

गार्गी स्वप्रश्नामुत्तरयितुं याज्ञवल्क्यं बाध्यं चकार । गार्ग्याः प्रश्नानामुत्तरणक्रमे एव याज्ञवल्क्यः स्वदर्शनं प्रत्यपादयत् । याज्ञवल्क्यसमेन ब्रह्मविदा सह शास्त्रार्थं विदधाना गार्गी इदानीन्तनीनामपि निखिलानां नारीणां प्रेरणायाः स्रोतस्विनी वर्तते । तस्या योगशास्त्रसम्बद्धः ‘गार्गीसंहिता’ नामको ग्रन्थोऽपि प्रसिद्धोऽस्ति । नेपाले गार्ग्या नाम्नि कन्यागुरुकुलं स्थापितं वर्तते ।

## शिक्षणालोकः

विशिष्टं कार्यं कृतवतीनां प्राचीनानामर्वाचीनानामाधुनिकानां वा नारीणां वैयक्तिकवृत्तं संश्राव्य तत्कर्मानुसरणाय विद्यार्थिनः प्रेरणीयाः । नेपालस्य विविधक्षेत्रेषु लब्धख्यातीनां नारीणां नामानि निगद्य तासां सत्कर्मणां विषये विद्यार्थिनामभिरुचिश्च वर्धनीया ।

# अभ्यासः

## पाठानुशीलनम्

१. **शुद्धमुच्चारयत**

विदुष्यश्च, गर्गगोत्रोत्पन्नतायाः, द्रष्टुम्, वव्राज, ब्रह्मज्ञानवैदुष्यम्, बृहदारण्यकोपनिषद्, वरिष्ठोऽसि ।

२. **सन्धिविच्छेदं कुरुत**

स्थानमधितिष्ठति, इत्युल्लेखनादस्य, सीमातिक्रमणम्, ब्रह्मविद्भ्योऽनुमतिम्, प्रश्नानामुत्तरणक्रमे, इदानीन्तनीनामपि ।

३. **वचनानि वदत**

कालाद्, गायत्रीमन्त्रान्, गोत्रर्षौ, गाः, पप्रच्छुः, विदुषः, प्रश्नौ, स्रोतस्विनी ।

४. **वाक्येषु प्रयोगं कुरुत**

विदुषी, उच्चैः, लिलेख, ब्रह्मवादिनी, तस्मै, शास्त्रार्थम्, पराङ्मुखाः, ब्रह्मचर्चा, कन्यागुरुकुलम् ।

५. **अशुद्धीर्निराकृत्य लिखत**

(क) प्रथितेषु नारीषु गार्गी च वर्तते ।

(ख) गर्गस्य प्राचीनत्वं सिद्धति ।

(ग) याज्ञवलक्यो ब्रम्ह्निष्ठ आसीत् ।

(घ) विदुषः क्रुद्धा अभवन् ।

(ङ) गार्गी बहूनि प्रश्नानि उदभावयत् ।

६. **पदक्रममनुसृत्य पुनर्लेखनं कुरुत**

(क) गर्गस्य गार्गी पुत्री आसीत् ।

(ख) यज्ञमुदघोषयद् जनकः ।

(ग) ब्रह्मविदः पप्रच्छुः याज्ञवल्क्यम् ।

(घ) शिष्या अनयन् गा आश्रमम् ।

(ङ) विलक्षणं याज्ञवल्क्यस्य व्याख्यानमासीत् ।

**७. पाठाधारेण कोष्ठकाद् विचित्य उचितं पर्यायं लिखत**

| | |
|---|---|
| (क) कालः ........ | (यमराजः, समयः) |
| (ख) प्रथितः ..... | (प्रसिद्धः, सक्रियः) |
| (ग) प्रसङ्गः ..... | (मेलः, सन्दर्भः) |
| (घ) तूष्णीम् ...... | (मौनम्, स्थिरम्) |
| (ङ) जनकः ....... | (पिता, विदेहराजः) |
| (च) युधिष्ठिरः ...... | (धीरः, कुन्तीपुत्रः) |

**८. परस्परं योजयत**

| 'अ' खण्डः | 'आ' खण्डः |
|---|---|
| अजानात् | चक्रुः |
| तस्थौ | अयाचत |
| अवदत् | अपृच्छन् |
| चकार | लिलेख |
| ययाचे | जज्ञौ |
| पप्रच्छुः | जगाद |
| अलिखत् | अकरोत् |
| अकुर्वन् | अतिष्ठत् |

९. **सत्यकथने 'सत्यम्' असत्यकथने च 'असत्यम्' लिखत**

(क) गार्गी उपनिषत्कालिकं नारीरत्नमासीत् । ( )

(ख) गर्गः पाण्डवानां पुरोहित आसीत् । ( )

(ग) जनको राजसूययज्ञमायोजयत् । ( )

(घ) याज्ञवल्क्यः सर्वेषां प्रश्नानुदतरत् । ( )

(ङ) ब्रह्मविदो गार्गीमनुमतिमयच्छन् । ( )

१०. **पाठाधारेण रिक्तस्थाने कथयितुर्नाम लिखत**

(क) य आत्मानं महान्तं दार्शनिकं प्रमाणयितुं शक्नोति तस्मै स्वर्णपत्रेण सुशोभितैः शृङ्गैः युताः सहस्रं गावो दीयन्ते । ..........

(ख) गार्गि ! प्रश्नस्य सीमातिक्रमणं करोषि, तन्मा कुरु । ..........

(ग) हे याज्ञवल्क्य ! त्वं ब्रह्मवित्सु वरिष्ठोऽसि ? .......

(घ) भो पूज्या विद्वांसः ! याज्ञवल्क्यं नमस्कुरुत । ब्रह्मचर्चायाममुं न कोऽपि पराजेतुं समर्थः । ......

(ङ) बहु न पृच्छ अन्यथा तव शिरो निपतिष्यति । ..........

(च) एतस्य पराजयस्य कल्पनापि असम्भवा प्रतीयते । ........

११. **एकपदेनोत्तरयत**

(क) का उच्चैः स्थानमधितिष्ठति ?

(ख) गर्गः श्रीकृष्णबलरामौ किमुपादिशत् ?

(ग) गर्गः कस्माद् ज्योतिषविद्यां जज्ञौ ?

(घ) 'गर्गाः प्रावरेयाः' इति कुत्र उल्लिखितमस्ति ?

(ङ) गर्गस्य पुत्रः कः ?

(च) जनकस्य यज्ञस्य नाम किम् ?

(छ) गार्गी केभ्योऽनुमतिं ययाचे ?

(ज) याज्ञवल्क्यस्य उत्तरं कीदृशमासीत् ?

१२. **एकवाक्येन उत्तराणि दत्त**

(क) गर्गस्य प्रसङ्गः कुत्र प्राप्यते ?

(ख) गर्गः किं किमलिखत् ?

(ग) जनकः किमुदघोषयत् ?

(घ) अश्वलो याज्ञवल्क्यं किं पप्रच्छ ?

(ङ) याज्ञवल्क्यः किमर्थं विचलितोऽभवत् ?

(च) याज्ञवल्क्यः कान् समतोषयत् ?

(छ) याज्ञवल्क्यस्य व्याख्यानेन तुष्टा गार्गी किं जगाद ?

(ज) याज्ञवल्क्यः कथं स्वदर्शनं प्रत्यपादयत् ?

(झ) गार्गी किं शास्त्रमाधृत्य ग्रन्थं लिलेख ?

(ञ) गार्गी कासां प्रेरणायाः स्रोतस्विनी वर्तते ?

१३. **अधो लिखितं गद्यांशं पठित्वा निर्दिष्टानि कार्याणि कुरुत**

विश्वामित्रस्तपोलीन आसीत् । देवराज इन्द्रस्तपसा इन्द्रासनं सङ्कटमेष्यतीति शशङ्के । स विश्वामित्रस्य तपो भङ्क्तुमैच्छत् । सः सुराङ्गनां मेनकां मर्त्यलोकं गत्वा विश्वामित्रं तपसो निवारयितुमादिदेश । मेनका विश्वामित्रस्य संसर्गेण पुत्रीमसूत । ततः ससम्भ्रमं विश्वामित्रः पुत्रीं परित्यज्य पुनस्तपः समाचरत् । मेनका च इन्द्रादेशं परिपाल्य वनवृक्षस्याधः पुत्रीं निधाय च इन्द्रलोकं ययौ । बालिका उच्चै रुरोद । नातिदूरे महर्षेः कण्वस्याश्रम आसीत् । स रोदनं सुश्राव । तत्र आगम्य स बालिकामाश्रममनयत् । स पितुः कर्तव्यं पूरयामास । बालिकाया नाम शकुन्तला बभूव । शकुन्तलाया अनसूया-प्रियंवदानामधेयं सखिद्वयमासीत् । शकुन्तला शनैः शनैर्यौवनमारुरोह । तदा हस्तिनापुरे दुष्यन्तो नाम प्रतापी राजा शासनं सञ्चालयति स्म । कदाचित् स आखेटाय कण्वस्याश्रमं निकषा आजगाम । नवयौवनां शकुन्तलां विलोक्य तस्य मनसि प्रीत्यङ्कुरः समजनि । शकुन्तलायाश्च मनो दुष्यन्तमध्यवसत् । तौ गान्धर्वविधिना विवाहमकुरुताम् । शकुन्तलया समं कतिपयं रसमयं समयं प्रयाप्य दुष्यन्तो हस्तिनापुरं प्रतिजगाम । कतिचित्कालानन्तरं कण्वः आश्रमबन्धुसहितां शकुन्तलां भूरिश आशीर्वचोभिः पतिगृहं प्रैषयत् । दुर्वाससः श्रापवशाद् दुष्यन्तः सर्वं पूर्ववृत्तान्तं शकुन्तलां च व्यस्मरत् । स तां पत्नीं न स्वीचकार, प्रासादप्रवेशनं

च रुरोध । परित्यक्ता शकुन्तला महर्षेर्मारीचस्याश्रमस्य शरणमनुससार । सा तत्रैव पुत्रं जनयामास । तस्य नाम भरत आसीत् । स आश्रमं परितः क्रीडति स्म । स सिंहस्य दन्तान् च निर्भयं गणयति स्म । दुष्यन्त इन्द्राय साहाय्यं प्रदाय स्वर्गलोकादवनिमवतरन् आसीत् । स तपोवनस्य सौन्दर्येण वशीभूय आश्रमं निकषा अवातरत् । स तमद्भुतं बालकं ददर्श, उपगत्य स्नेहेन पस्पर्श च । तदैव शकुन्तला तत्र आजगाम । दुष्यन्तस्य विस्मृतिदोषो दूरमपगतः । दुष्यन्तः शकुन्तलां क्षमां ययाचे । दुष्यन्त-शकुन्तला-भरतानां संयोगो बभूव । मुदितमानसास्ते तपोधनानामाशीर्वचांसि सङ्गृह्य हस्तिनापुरं प्रययुः ।

**(क) अधो लिखितसंरचनायां शकुन्तलाया वैयक्तिकविवरणं निर्मात**

(अ) मातापितरौ -

(आ) धर्मपिता-

(इ) पतिः -

(ई) पुत्रः -

(उ) विवाहप्रकारः-

(ऊ) सखिनाम-

**(ख) सङ्क्षेपेण उत्तरयत**

(अ) शकुन्तलां कः शशाप ?

(आ) शकुन्तलाया दुष्यन्तेन सह कुत्र पुनर्मेलनमभवत् ?

(इ) इन्द्रः किं शशङ्के ?

(ई) भरतः किं करोति स्म ?

(उ) दुष्यन्तः किमर्थं स्वर्गलोकं गतवानासीत् ?

**(ग) शिक्षकसाहाय्येन अर्थं लिखत**

तपः, सुराङ्गना, प्रीत्यङ्कुरः, नवयौवना, गान्धर्वविधिः, आशीर्वचोभिः, शरणम्, वशीभूय, विस्मृतिदोषः, मुदितमानसाः ।

**१४. शिक्षकसाहाय्येन महाभारतस्य कुन्त्याः सङ्क्षिप्तं जीवनचरितं निर्मात ।**

**१५. पौराणिकवाङ्मये उल्लिखितानां केषाञ्चन पञ्चानामनुसरणीयानां नारीचरितानां नामानि लिखत ।**

## व्यवहारानुशीलनम्

**१. नारीणां के गुणाः प्रशस्याः सन्ति ? तैरात्मनि कीदृशः प्रभावः सृष्टः ? स्वानुभवं लिखत ।**

**२. परिवारस्य नारीसदस्यैरात्मानं प्रति विहितं व्यवहारं वर्णयत ।**

**३. कक्षायाः सर्वे विद्यार्थिनो मिलित्वा नारीदिवसस्योपलक्ष्ये विद्यालयस्य वयसा वरिष्ठायाः शिक्षिकायाः सम्मानकार्यक्रममायोजयत ।**

**४. इदानीं विद्यालयेष्वध्ययनरतानां बालिकाछात्राणां कृते भविष्यति आजीविकायै अधो लिखितेषु किं क्षेत्रमुचितं भवेत् ? तर्कानुपस्थापयत**

(क) शिक्षणम्
(ख) सर्वकारीयसेवा
(ग) सुरक्षासेवा
(घ) उड्डयनसेवा
(ङ) कृषिकर्म
(च) व्यापारः
(छ) आधुनिकस्वास्थ्यसेवा
(ज) उद्योगसञ्चालनम्
(झ) राजनीतिः
(ञ) साहित्यलेखनम्
(ट) क्रीडा
(ठ) यानचालनम्
(ड) योगप्रशिक्षण-ध्यानायुर्वेद-प्राकृतिकचिकित्सासेवा ।

**५. पारिवारिकं व्यवहारमाश्रित्योपयुक्तं चिह्नं (✓) दत्त**

(क) अहं नारीभिस्सह कलहं करोमि । ( )
(ख) अहं नारीणां कथनं न शृणोमि । ( )
(ग) अहं नारीः दुर्वचसा निन्दामि । ( )
(घ) मम गृहे नारीणां सम्मानो विधीयते । ( )
(ङ) मम परिवारे नारीभ्यो विभेदः क्रियते । ( )